3959

॥ जयउ सव्वन्नुसासणं ॥

॥ श्रीमदात्म-कमल-वीर-दान-प्रेमसूरीश्वरगुरुभ्यो नमः ॥

॥ टीकासमलङ्कृतं सूरिपुरन्दर-श्रीहरिभद्रविरचितं

# विंशतिविंशिकाप्रकरणम् ॥

टीकाकृत्

श्रीविजयकुलचन्द्रसूरिः

प्रकाशकः

श्री जैनसंघः शिहोर (सौराष्ट्र)

# विंशतिविंशिकाग्रन्थस्य विषयानुक्रमः


| | | पृष्ठ सङ्ख्या |
|---|---|---|
| १ | अधिकारविंशिका | १ |
| २ | लोकानादित्वविंशिका | ७ |
| ३ | कुलनीतिलोकधर्मविंशिका | १४ |
| ४ | चरमपरिवर्तविंशिका | २१ |
| ५ | धर्मबीजादिविंशिका | २७ |
| ६ | शुद्धधर्मविंशिका | ३४ |
| ७ | दानविंशिका | ४० |
| ८ | पूजाविधिविंशिका | ४८ |
| ९ | श्रावकधर्मविंशिका | ५६ |
| १० | श्रावकप्रतिमाविंशिका | ६३ |
| ११ | यतिधर्मविंशिका | ७० |
| १२ | यतिशिक्षाविंशिका | ७८ |
| १३ | शुद्धभिक्षाविधिविंशिका | ८५ |
| १४ | अशुद्धिलिङ्गान्तभिक्षान्तरायविंशिका | ९२ |
| १५ | आलोचनाविधानविंशिका | ९५ |
| १६ | प्रायश्चित्तविधिविंशिका | १०१ |
| १७ | योगविधानविंशिका | १०७ |
| १८ | केवलज्ञानविंशिका | ११६ |
| १९ | सिद्धविभक्तिविंशिका | १२२ |
| २० | सिद्धसुखविंशिका | १२८ |


मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

## ॥ आचार्यपुङ्गव-श्रीमद्-हरिभद्रसूरिविनिर्मिता विंशतिर्विंशिकाः ॥

श्रीवीरं जिनपान् गुरूंश्च निखिलान् नत्वा च वागीश्वरीं,
कुर्वे विंशतिविंशिकाप्रकरणग्रन्थस्य टीकां स्फुटाम्।
गूढार्थस्य तनुश्रुतोऽपि गतये मत्तोऽल्पमेधाविना–
मालम्ब्य श्रुतभृत्कृतीः समुदयं शिष्टञ्च लोकं क्वचिद् ॥१॥

आचार्यपुङ्गवो विशिष्टशिष्टाचारपालनाय दूरितदूरीकरणार्थं निर्विघ्नं च प्रारिप्सितप्रकरणपारप्राप्त्यै इष्टदेवतानमस्कारपूर्वं प्रवर्तमानः प्रेक्षावत्प्रवृत्तये च सम्बन्धाभिधेयप्रयोजनानि गाथाद्वयेनाह—

**नमिऊण वीयरायं सव्वन्नुं तियसनाहकयपूयं**
**जहनायवत्थुवाइं सिद्धं सिद्धालयं वीरं ॥१॥**

**वुच्छं केइ पयत्थे लोगिगलोगुत्तरे समासेण।**
**लोगागमाणुसारा मंदमइविबोहणट्ठाए ॥२॥**

**अक्षरगमनिका**—वीतरागं सर्वज्ञं त्रिदशनाथकृतपूजं यथान्याय(ज्ञात)वस्तुवादिनं सिद्धं सिद्धालयं वीरं नत्वा मन्दमतिविबोधनार्थाय लोकागमानुसारात् कांश्चित्लौकिकलोकोत्तरान् पदार्थान् समासेन वक्ष्ये ॥१–२॥

**टीका**—**नत्वा** प्रणम्य मनोवाक्कायैः कं? **वीतरागं** वीतः अपगतो विशेषेण समूलं रागो यस्मात् स वीतरागस्तम् उपलक्षणं चैतद् वीतद्वेषादेः, पुनः कीदृशं? **सर्वज्ञं** सर्वं चराचरं विश्वं जानातीति सर्वज्ञस्तम् उपलक्षणात् सर्वदर्शिनम्, पुनः कथम्भूतं? **त्रिदशनाथकृतपूजं** त्रिदशाः सुराऽसुरास्तेषां नाथाः शक्रेन्द्राद्यास्तैः कृता विहिता पूजा अष्टमहाप्रातिहार्यादिरूपा यस्य स त्रिदशनाथकृतपूजस्तम्, पुनः कीदृशं? यथान्यायवस्तुवादिनं न्यायमनतिक्रम्य हेतुयुक्तिदृष्टान्तपूर्वकं वस्तु जीवाजीवात्मकं वदति निरूपयतीति यथान्यायवस्तुवादी तम्, यदि वा **यथाज्ञातवस्तुवादिनं**—केवलालोकेन यथा ज्ञातं वस्तु तथा वदतीति यथाज्ञातवस्तुवादी तम्। अनेन विशेषणकदम्बकेन घातिकर्मक्षयात् आर्हन्त्यप्रकाशकम् अपायापगम–ज्ञान–पूजा–वचनातिशयचतुष्कं सूचितं भवति। अतः परम् अघातिकर्मक्षयात् सिद्धत्वमपुनरावृत्तित्वं च प्रदर्शयति—**सिद्धं** सध्यति स्म सिद्धो मुक्तस्तम् यदि वा सिद्धानि निष्ठितानि प्रयोजनानि कृतकृत्यत्वाद् यस्य स सिद्धस्तम्, **सिद्धालयं** सिद्धा मुक्तास्तेषाम् आलयो निवासक्षेत्रं सिद्धशिलोपलक्षितं लोकाग्रम् आलयो यस्य स सिद्धालयस्तम्। एवम्भूतं कं? वीरश्चरमतीर्थपतिस्तं **वीरं** तस्यासन्नोपकारित्वात्। एवम्भूतं श्रीवीरं नत्वा किमित्याह—**वक्ष्ये** कथयिष्ये **कांश्चिद्** रहस्यभूतान् हृदयस्थान् **पदार्थान्** पद्यते अर्थजातं एभ्यस्ते पदास्तेषामर्था आशयाः पदार्थास्तान्, कीदृशान्? **लौकिकलोकोत्तरान्** लोके प्रसिद्धाः लौकिकास्ते च लोकोत्तराः श्रीजिनशासने प्रख्याताश्च लौकिकलोकोत्तरास्तान् **समासेन** संक्षेपेण प्रकरणरूपत्वात् ग्रन्थस्येत्यनेनाभिधेयमुक्तम्। अधुना स्वमतिकल्पनानिरासार्थमाह—

**लोकागमानुसारात्** लोकश्चागमश्च लोकागमौ तयोरनुसारः अनुसरणं तस्माद् न स्वमनीषिकया। 'लोकागमानुसारः' पाठान्तरमाश्रित्य लोकागमौ अनुसरतीति लोकागमानुसारः एतच्चाचार्यस्य विशेषणम्। सम्प्रति प्रयोजनमाह—**मन्दमतिविबोधनार्थाय** मन्दा अतीक्ष्णा मतिर्मेधा येषां ते मन्दमतयस्तेषां विबोधनं

विशेषेण प्रज्ञापनं तस्मै। परेषां ज्ञानादिसंपादनं विहाय परमार्थतः अन्यः परोपकारो न संभवतीति ॥१-२॥

अथ प्रस्तुतप्रकरणरचनौचित्तीं विरचयन्नाह—

**सुंदरमिइ अन्नेहि वि भणियं च कयं च किंचि वत्थुं ति।**
**अन्नेहि वि भणियव्वं कायव्वं चेति मग्गोऽयं॥३॥**

**अक्षरगमनिका**—सुन्दरमित्यन्यैरपि भणितं च कृतं च किञ्चिद्वस्त्विति अन्यैरपि भणितव्यं कर्तव्यं चेति मार्गोऽयम् ॥३॥

**टीका**—**सुन्दरं** शोभनं हितकरत्वाद् **इति** हेतोः **अन्यैरपि** पूर्वमहापुरुषैरपि **भणितं** कथितं चः समुच्चये **कृतं** विहितं चः पूर्ववत् **किञ्चित्** सारभूतं **वस्तु** सूक्तात्मकम् अनुष्ठानरूपं च **इति** हेतोः **अन्यैरपि** उत्तरकालभाविपुरुषैरपि भणितव्यं **वक्तव्यं च** यथाक्षयोपशमं **कर्तव्यं चः** समुच्चयेऽनुष्ठातव्यञ्च स्वशक्त्यनुरूपम् **इति** एवम्भूतो मृग्यतेऽन्विष्यतेऽभिमतस्थानावाप्तये पुरुषैर्यः स **मार्गः**, स च द्रव्यभावभेदात् द्वेधा–द्रव्यमार्गो ग्रामादेः, भावमार्गो मुक्तिपुरस्य, स च सम्यग्दर्शनज्ञानचारित्रात्मकस्तेनेहाधिकारः। उक्तं च—सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः (तत्त्वार्थसूत्र १-१) अयं च पक्षः सदातनत्वात् महाजनो येन गतः स पन्था इति न्यायाच्च। साम्प्रतमपि दृश्यन्ते हि महात्मानो शुभोपदेशाचरणविषये प्रयतमाना इति ॥३॥ अन्यथा महापायं दर्शयन्नाह—

**इहरा उ कुसलभणिईण चिट्ठियाणं च इत्थ वुच्छेओ।**
**एवं खलु धम्मो वि हि सव्वेण कओ ण कायव्वो॥४॥**

**अक्षरगमनिका**—इतरथा तु कुशलभणितीनां चेष्टितानां चेह व्युच्छेदः। एवं खलु धर्मोऽपि हि सर्वेण कृतो न कर्तव्यः ॥४॥

**टीका**—**इतरथा**–महापुरुषैर्भणितानां सूक्तानामभणने तथा तैस्तैः पुरुषसिंहैः समाचीर्णस्याऽसमाचरणे च **तुर्विशेषद्योतने** विशेषश्च महापायः स च प्रदर्श्यत एव, तथाहि—पूर्वमहापुरुषभणितानां **कुशलभणितीनां** शास्त्ररूपेण लब्धाऽऽत्मलाभानां शोभनसूक्तीनां **चेष्टितानां** प्रवृत्तसमाचाराणां **चः** समुच्चये **इह** लोके **व्युच्छेद** आत्यन्तिको नाशः स्यात्।

पूर्वभणितानामिव भणने चेष्टितानां च चेष्टने किं कोऽपि नियोगोऽस्तीति, अथवा पूर्वं बहुभिर्भणितं चेष्टितं चेति कृतं साम्प्रतकालीनानां भणितेन चेष्टितेन चेत्याशङ्क्याह–**एवं** कुशलभणितीनामभणने शुभचेष्टितानां चाऽचेष्टने यो हेतुरुदाहृतः स एव हेतुर्धर्माऽकरणेऽपि किं न स्यात्, तथाहि—**खलु** सान्त्वने **धर्मोऽपि** दानशीलादिरूपः श्रुतचारित्रात्मको वा **हिर्यस्मात्** **सर्वेण** बालवृद्धादिना बहु **कृतो** विहितस्तस्मात् **न** नैव **कर्तव्य** आचरितव्य इति प्रसज्येत। अनिष्टं चैतदिति ॥४॥ अस्मिन्नेव विषयेऽन्येषामभिप्रायमाह—

**अन्ने आसायणाओ महाणुभावाण पुरिससीहाण।**
**तम्हा सत्तणुरूवं पुरिसेण हिए पयइयव्वं॥५॥**

**अक्षरगमनिका**—अन्ये–आशातनातो महानुभावानां पुरुषसिंहानां तस्मात् शक्त्यनुरूपं पुरुषेण हिते प्रयतितव्यम् ॥५॥

**टीका**—**अन्ये** स्वव्यतिरिक्ता आचार्या आहुः, 'अन्नं' इति पाठान्तरं वा संभाव्य अन्यद्–

दोषान्तरमाह—यथा—यस्माद् **महानुभावानाम्**—अनल्पप्रभावाणां **पुरुषसिंहानां**—तीर्थकृतां भगवतां मार्गोच्छेदरूपा **आशातना** ज्ञानादिनाशरूपा जायते, तथाहि—एकदीपाद् अनेके दीपा दीप्यन्ते एकबीजाच्चानेकानि बीजानि प्ररोहन्ति तथैव एकजीवस्य धर्मे प्रवृत्तितः अनेकजीवानां धर्मे प्रवृत्तिर्जायते, भावाद्भावप्रसूतिरिति न्यायात्। एवं धर्मवृद्धिः कृता भवति। वैपरीत्ये तु धर्महानिः स्यात् परम्परया च समूलमार्गोच्छेदरूपा महाशातना, **तस्मात्** कारणात् **शक्त्यनुरूपं** यथासामर्थ्यं **पुरुषेण** कल्याणकाङ्क्षिणा **हिते** शुभोपदेशे सदाचारे च **प्रयतितव्यम्** उद्यन्तव्यमिति ॥५॥ एवं प्रस्तुतप्रकरणरचनौचिती फलितेति प्रदर्शयन्नाह—

**तेसिं बहुमाणाओ ससत्तिओ कुसलसेवणाओ य।**
**जुत्तमिणं आसेवियगुरुकुलपरिदिट्ठसमयाणं ॥६॥**

**अक्षरगमनिका**—तेषां बहुमानात् स्वशक्तितः कुशलसेवनातश्च युक्तमिदम् आसेवितगुरुकुलपरिदृष्ट-समयानाम् ॥६॥

**टीका—तेषां**—तीर्थङ्कराणां **बहुमानात्** उपादेयतया हृदयदेशे गुणप्रकर्षस्थापनात् **स्वशक्तितो**

मार्गदर्शक :

निजसामर्थ्यानुरूपं **कुशलसेवनातः** स्वपरहितकरणात् **चः** समुच्चये **युक्तमिदम्** उचितं ह्यदः प्रस्तुतप्रकरणविरचनम् केषाम्? **आसेवितगुरुकुलवासपरिदृष्टसमयानाम्** आसेवितं सम्यगाराधितम् अन्तेवासित्वेन गुरुकुलं गुणरत्नरत्नाकरस्थानीयम् गुरुकुलासेवनं हि सतां प्रथमो धर्म इति, अत एव परितः समन्ताद् दृष्टा अवगाढाः समयाः स्वपरशास्त्राणि यैस्ते तथा तेषाम्। स्वसामर्थ्यतः शुभे प्रवृत्तिरेव तीर्थकृतां विषये बहुमानलिङ्गमिति ॥६॥ प्रस्तुतस्यैवाभ्युच्चयार्थमाह—

**जत्तो उद्धारो खलु अहिगाराणं सुयाओ ण उ तस्स।**
**इय वुच्छेओ तद्देसदंसणा कोउगपवित्ती ॥७॥**

**अक्षरगमनिका**—यतः श्रुतात् खलु अधिकाराणाम् उद्धारस्तस्यैवं नैव व्युच्छेदस्तद्देशदर्शनात् कौतुकतः प्रवृत्तिरिति ॥७॥

**टीका—यतो**—यस्माद् **उद्धारो** निर्यूहणं **खलुर्**वाक्यालङ्कारे **अधिकाराणां** प्रस्तुतप्रकरणनिबद्धविषयाणां **श्रुतात्**—शास्त्ररूपात् **न** नैव **तुर**वधारणे **तस्य** श्रुतस्य **एवं** प्रकरणरूपेणोद्धाराद् **व्युच्छेद** आत्यन्तिकनाशः। कस्मात्? **तद्देशदर्शनात्**—तत्तच्छ्रुतस्य देशः अंशस्तस्य दर्शनाद् अवलोकनात् **कौतुकप्रवृत्तिः** कौतुको विशेषदर्शने जिज्ञासा ततः प्रवृत्तिः अध्ययनाध्यापनरूपा तत्र तत्र श्रुते भविष्यति। एवं यस्मात् श्रुतात् प्रस्तुतप्रकरणस्योद्धारस्तस्य व्युच्छेदो न भविष्यति प्रत्युत पुनरुज्जीवनं स्यादिति ॥७॥ अत्रैव दोषमाशङ्क्य परिहारमाह—

**इक्को उण इह दोसो जं जायइ खलजणस्स पीड त्ति।**
**तह वि पयट्टो इत्थं दट्ठुं सुयणाण मइतोसं ॥८॥**

**अक्षरगमिनका**—एक पुनरिह दोषो यज्जायते खलजनस्य पीडेति तथापि प्रवृत्त एवं दृष्ट्वा सुजनानां मतितोषम् ॥८॥

**टीका**—यद्यपि **एको** मात्रः केवल इति यावत् **पुनर्**विशेषे स विशेषः प्रदर्श्यत एव **इह**—प्रस्तुतप्रकरणरचनायां **दोषः** क्षतिः **यद्** यस्माद् **जायते** उत्पद्यते **खलजनस्य** दुर्जनस्य **पीडा** बाधा

मनःसंतापरूपा तथास्वाभाव्याद् **इति** हेतो**स्तथापि** खलजनपीडोत्पादरूपं दोषमुपेक्ष्य **प्रवृत्तः** समुद्यत **इत्थम्** एवं प्रकरणरचनायां, किं कृत्वा ? **दृष्ट्वा** विलोक्य **सुजनानां** सज्जनानां **मतितोषं** मनस्तृप्तिम् ॥८॥ सुजन-मतितोषजन्यकुशलादपि खलजनपीडापरिहारं दृढीकृत्य स्वप्रवृत्तिनिर्दोषतामाह–

**तत्तो वि य जं कुसलं तत्तो तेसिं पि होहिइ ण पीडा।**
**सुद्धासया पवित्ती सत्थे निद्दोसिया भणिया ॥९॥**

**अक्षरगमनिका**–ततोऽपि यत्कुशलं ततस्तेषामपि भविष्यति न पीडा। शुद्धाशया प्रवृत्तिः शास्त्रे निर्दोषिका भणिता ॥९॥

**टीका**—**ततः** सज्जनानां मतितोषाद् **अपि चः** समुच्चये आस्तां मच्छुभभावादित्यपेरर्थः **यत् कुशलं** पुण्यं भविष्यति **ततः** कुशलाद् अथवा ग्रन्थगुणविलोकनात् **तेषामपि** खलजनानामपि **भविष्यति**–उत्पत्स्यते **न नैव पीडा** उक्तस्वरूपा। अपरञ्च शुद्धो विमल आशयः अभिसन्धिर्यत्र सा **शुद्धाशया प्रवृत्तिः** क्रिया प्रारम्भरूपा **शास्त्रे** आप्तोपदेशरूपे **निर्दोषिका** निरपराधिका **भणिता** कथिता तीर्थकरगणधरैरिति ॥९॥ अन्यथा छद्मस्थस्य कुशलमार्गे प्रवर्तनाऽनवकाश एव स्यादित्याह—

**इहरा छउमत्थेणं पढमं न कयाइ कुसलमग्गम्मि।**
**इत्थं पयट्टियव्वं सम्मं ति कयं पसंगेण ॥१०॥**

**अक्षरगमनिका**–इतरथा छद्मस्थेन प्रथमं न कदापि कुशलमार्ग इत्थं सम्यक् प्रवर्तितव्यमिति कृतं प्रसङ्गेन ॥१०॥

**टीका**—**इतरथा** अनन्तरोक्तप्रस्तुतप्रकरणरचनानिर्दोषिताऽनभ्युपगमे **छद्मस्थेन** छद्म ज्ञानावरणीयादि घातिकर्म तत्र वर्तमानः छद्मस्थस्तेन **प्रथमम्** आदौ **न** नैव **कदापि** कस्मिन्नपि काले **कुशलमार्गे** धर्ममार्गे **इत्थम्** एवं **सम्यग्** यथाविधि **प्रवर्तितव्यम्** आरब्धव्यं स्यादिति **कृतम्** अलं **प्रसङ्गेन** आनुषङ्गिकेन। इदमुक्तं भवति–अन्यथाभ्युपगमे सदाशयेन छद्मस्थस्य कुशलमार्गे प्रवर्तनानवकाश एवापद्येतेत्यलं प्रसङ्गेन ॥१०॥ अधुना प्रकृतं प्रस्तावयन् प्रकरणनिबद्धार्थाधिकारान् पञ्चभिर्गाथाभिः सूचयन्नाह–

**अहिगारसूयणा खलु—लोगाणादित्तमेव बोद्धव्वं।**
**कुलनीइलोगधम्मा, सुद्धो वि य चरमपरियट्टो ॥११॥**

**तब्बीजाइकमो वि य, तं पुण सम्मत्तमेव विन्नेओ।**
**दाणविहि य तओ खलु, परमो पूयाविही चेव ॥१२॥**

**सावगधम्मो य तओ, तप्पडिमाओ य हुंति बोद्धव्वा।**
**जइधम्मो इत्तो पुण, दुविहा सिक्खा य एयस्स ॥१३॥**

**भिक्खाइ विही सुद्धो, तयंतराया असुद्धिलिंगंता।**
**आलोयणाविहाणं, पच्छित्ता सुद्धिभावो य ॥१४॥**

**तत्तो जोगविहाणं, केवलनाणं च सुपरिसुद्धं ति।**
**सिद्धविभत्ती य तहा, तेसिं परमं सुहं चेव ॥१५॥**

**अक्षरगमिनिका**—अधिकारसूचना खलु प्रथमा विंशिका१। लोकाऽनादित्वमेव बोद्धव्यमिति द्वितीया विंशिका२। कुलनीतिधर्मास्तृतीयायां विंशिकायामिति३। एवमग्रेऽपि विंशिकाक्रमोऽवसेयः, तथाहि—शुद्धोऽपि च धर्मश्चरमपरिवर्ते४। 'चरमपरियट्टे' इति पाठः सम्भाव्यते॥११॥

तद्बीजादिक्रमोऽपि च तदा शुद्धधर्मः अवसेय इति५। स पुनः सम्यक्त्वमेव विज्ञेय इति६। दानविधिश्चेति७। ततः खलु परमो पूजाविधिरेवेति८॥१२॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

श्रावकधर्मश्चेति९। ततस्तत्प्रतिमाश्च भवन्ति बोद्धव्यास्तदा श्रावको ग्राह्य इति१०। यतिधर्म इति११। अतः पुनर्द्विधा शिक्षा चैतस्य यतेरिति १२॥१३॥

यतेरेव भिक्षाया विधिः शुद्ध इति १३। तदन्तरायाश्च शुद्धिलिंङ्गान्तास्तदा भिक्षा बोद्धव्येति१४। तत आलोचनाविधानमिति१५॥ प्रायश्चित्तानि शुद्धिभावश्चेति१६॥१४॥

ततो योगविधानमिति१७। केवलज्ञानं च सुपरिशुद्धमिति१८। सिद्धविभक्तिः सिद्धानां भेदा इति१९। तथा तेषां सिद्धानामेव परमं सुखमिति२०॥१५॥

एता गाथा निगदसिद्धा इति टीका न वितन्यते। अर्थाधिकारानाश्रित्यैवाह—

**एए इहाहिगारा वीसं वीसाहि चेव गाहाहिं।**
**फुडवियडपायडत्था नेया पत्तेयपत्तेयं॥१६॥**

**अक्षरगमनिका**—एत इहाधिकारा विंशतिः प्रत्येकं प्रत्येकं विंशत्यैव गाथाभिः स्फुटविकटप्रकटार्था ज्ञेयाः॥१६॥

**टीका**—**एते** अनन्तरोक्ता अधिकारा **इह** प्रस्तुतग्रन्थे सङ्ख्यया **विंशतिरवसेयाः**। ते च **प्रत्येकं प्रत्येकं विंशत्यैव** न न्यूनाधिकाभिर्गाथाभिः स्फुटो विशदश्च विकटः स्पष्टश्च प्रकटो व्यक्तश्चेति एकार्था वैते स्फुटविकटप्रकटः अर्थो येषां ते **स्फुटविकटप्रकटार्था अधिकारा** अर्थाधिकारा **ज्ञेया** अवसेया इति॥१६॥ एवंविधाधिकारश्रवणफलमाह—

**एए सोऊण बुहो परिभावंतो उ तंतजुत्तीए।**
**पाएण सुद्धबुद्धी जायइ सुत्तस्स जोग्ग त्ति॥१७॥**

**अक्षरगमनिका**—एतानधिकारान् श्रुत्वा शुद्धबुद्धिर्बुधस्तन्त्रनीत्या परिभावयन् प्रायो जायते सूत्रस्य योग्य इति॥१७॥

**टीका**—**एतान्** अनन्तरोक्तान् स्फुटविकटप्रकटार्थानधिकारान् **श्रुत्वा** निशम्य शुद्धा निर्दोषा बुद्धिर्मेधा यस्य स **शुद्धबुद्धिर्बुधः** पण्डितः **परिभावयन्** मुहुर्मुहुरनुप्रेक्षमाणस्तुर्विशेषे **तन्त्रयुक्त्या** शास्त्रनीत्या न तु स्वमनीषिकया **प्रायो** बाहुल्येन जायते निष्पद्यते **सूत्रस्य** श्रीजिनागमस्य योगमर्हतीति **योग्यः** अध्ययनाधिकारीति॥१७॥ अथ सूत्रस्य योग्यानुपदिशन्नाह—

**मज्झत्थयाइ नियमा सुबुद्धिजोएण अत्थियाए य।**
**नज्जइ तत्तविसेसो न अन्नहा इत्थ जइयव्वं॥१८॥**

**अक्षरगमनिका**—मध्यस्थतया शुद्धबुद्धियोगेनाऽर्थितया च नियमात्तत्त्वविशेषो ज्ञायते, नान्यथा तस्मादत्र यतितव्यमिति॥१८॥

**टीका—मध्यस्थतया नियमाद्** रागद्वेषयोर्मध्ये तिष्ठतीति मध्यस्थो निष्पक्षस्तस्य भावो मध्यस्थता तया अवश्यंतयाऽस्य ज्ञायत इत्यनेन सम्बन्धः, **शुद्धबुद्धियोगेन** शुद्धा बुद्धिः शुद्धबुद्धिस्तया योगः सम्बन्धः शुद्धबुद्धियोगस्तेन च तथा **अर्थितया** अर्थयते अभिलषत इत्यर्थी तस्य भावः अर्थिता तया **चः** समुच्चये नियमात् **ज्ञायते** अवबुध्यते किमित्याह—**तत्त्वविशेषः,** तस्य जीवाजीवादेर्भावः स्वरूपं तत्त्वं तस्य विशेषो भेदप्रभेदादिरिति **नान्यथा**—नैव रक्तद्विष्टमूढत्वानर्थितया। तस्माद् **अत्र** मध्यस्थतादौ गुणत्रये **यतितव्यं** चेष्टितव्यं परिशीलनीयमिति यावत् ॥१८॥ अपि च—यदि वानन्तरोक्तगुणत्रयप्राप्त्युपनिषदमाह—

**गुणगुरुसेवा सम्मं विणओ तेसिं तदत्थकरणं च।**
**साहूणमणाहाण य सत्तणुरूवं निओगेणं ॥१९॥**

**अक्षरगमनिका**—गुणगुरुसेवा सम्यग् विनयस्तेषां तदर्थकरणं च साधूनामनाथानां च शक्त्यनुरूपं नियोगेन कर्तव्यमिति शेषः ॥१९॥

**टीका**—गुणैर्हितोपदेशप्रदानादिभिर्गुरवः अथवा तत्त्वं गृणन्तीति गुरवो यदि वा शीलाङ्गरथरथाङ्गतुम्बभूतब्रह्मचर्यपालनोपार्जितपुण्यप्राग्भारेण गुरवः उक्तं च—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

व्रतानां ब्रह्मचर्यं हि निर्दिष्टं गुरुकं व्रतम्।
तज्जन्य पुण्यसंभार-संयोगाद् गुरुरुच्यते ॥१॥

**गुणगुरुसेवा** गुणगुरवस्तेषां सेवा चित्तानुवर्तनं तथा **सम्यग्** अवितथं **विनयः** अभ्युत्थानादिस्तेषां गुरूणामेव। किञ्च—**तेषां** गुरूणाम् अर्था प्रयोजनानि प्रतिलेखनादीनि तेषां करणं **तदर्थकरणं चः** समुच्चये। अपि च—निर्वाणसाधकान् योगान् साधयन्तेऽनिशमिति साधवः, उक्तं च—

निर्वाणसाधकान् योगान्, यस्मात् साधयतेऽनिशम्।
समश्च सर्वभूतेषु, तस्मात् साधु- रुदाहृतः ॥१॥

क्षान्त्यादिगुणसम्पन्नो, मैत्र्यादिगुणभूषितः अप्रमादी सदाचारे, भावसाधुः प्रकीर्तितः ॥२॥

उक्तस्वरूपाः साधवस्तेषां **साधूनां** तथा न विद्यते योगक्षेमकारी नाथो येषां ते अनाथास्तेषाम् **अनाथानां चः** समुच्चये अर्थकरणमित्यस्यानुवृत्तिः समवसेया **शक्त्यनुरूपं** यथासामर्थ्यं **नियोगेन** आवश्यकतया विधेयमितिशेषः ॥१९॥ अनन्तरोक्तस्य गुणगुरुसेवादेः फलमाह—

**भव्वस्स चरमपरियट्टवत्तिणो पायणं परं एयं।**
**एसो वि य लक्खिज्जइ भवविरहफलो इमेणं तु ॥२०॥**

**अक्षरगमनिका**—भव्यस्य चरमपरिवर्तवर्तिनो प्रापणं पावनं पाचनं वा परमेतत्—गुणगुरुसेवादि तथा एषोऽपि लक्ष्यते भवविरहफलः अनेन गुणगुरुसेवादिना तु ॥२०॥

**टीका—भव्यस्य** मुक्तिगमनयोग्यस्य महात्मनः, पुनः कीदृशः ? **चरमपरिवर्तवर्तिनः** चरमः अन्तिमः परिवर्तः पुद्गलपरावर्तः तन्त्रप्रसिद्धः अनन्तोत्सर्पिणीप्रमाणस्तस्मिन् वर्तमानस्तस्य प्रापणं ज्ञानादेः पावनं शोधनं वाऽऽत्मगुणानां **पाचनं** वा भवस्थितेः परिपाकहेतुत्वात् **परं** सर्वोत्कृष्टं **एतद्** अनन्तरोक्तं गुणगुरुसेवादि। **एष** भव्योऽपि **चः** पादपूर्तौ **लक्ष्यते** ज्ञायते **भवविरहफलः** भवः चतुर्गतिभ्रमणस्वरूपतस्य विरहो वियोग एव फलं यस्य स तथा मुक्तिगामीत्यर्थः **अनेन** गुणगुरुसेवादिनैव **तुरवधारणार्थः**। भावार्थस्त्वयम् चरमावर्ते

वर्तमानस्यैव जीवस्य भवस्थितेः परं परिपाकहेतुः गुणगुरुसेवादि पारमार्थिकं जायते तथा गुणगुरुसेवादिनैव एषोऽपि जीवः सिद्धिगामीति लक्ष्यते ॥ अपरञ्च–'भवविरह' इत्यनेनावयवेन प्रस्तुतप्रकरणप्रारब्धॄणां दाक्षिण्यमाध्यस्थौदार्यादिगुणरत्नरत्नाकराणां सुगृहीतनामधेयानामाचार्यपुंगवानां श्रीमतां हरिभद्रसूरीणामियं कृतिरिति सूचितं भवतीति ॥२०॥

**इति प्रथमा अधिकारविंशिका समाप्ता ॥१॥**

# लोकानादित्वनामा द्वितीया विंशिका

समाप्ता प्रथमा विंशिकाऽथ क्रमायाता द्वितीया विंशिका प्रारभ्यते। अस्याश्चेयमाद्या गाथा–

**पंचत्थिकायमइयो अणाइमं वट्टए इमो लोगो।**
**न परमपुरिसाइकओ पमाणमित्थं पवयणं तु ॥१॥**

**अक्षरगमनिका**—पञ्चास्तिकायमयः अयं लोकः अनादिमान् वर्तते न परमपुरुषादिकृतः, प्रमाणमत्र प्रवचनं तु ॥१॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका—पञ्चास्तिकायमयः,** पञ्चेति सङ्ख्यानिर्देशः पञ्चैव न तु चत्वारः षडादिः, अस्तयः प्रदेशास्तेषां कायाः समुदायाः पञ्चास्तिकायाः, तथाहि–धर्मास्तिकायः अधर्मास्तिकाय आकाशास्तिकायो जीवास्तिकायः पुद्गलास्तिकायश्चेति, त एव स्वरूपं यस्य स तथा कीदृशः? न आदिः प्रथमः प्रारम्भः अनादिः सोऽस्य **अनादिमान् वर्तते** विद्यते द्रव्यार्थतया **अयं** चराचरात्मा प्रत्यक्षत्वेनापह्नोतुमशक्यत्वात्, कः? केवलालोकेन लोक्यत इति **लोकः**,। **न** नैव **परमपुरुषादिकृतः** परमपुरुषः स्वयंभूः जगत्कर्तृत्वेनाभ्युपगतः अज्ञानतः, स आदौ येषां प्रधानादीनां ते परमपुरुषादयस्तैः कृतः सृष्ट इति इदमुक्तं भवति–अयं पञ्चास्तिकायमयो लोको द्रव्यार्थतयाऽनादित्वेन वर्तते, न तु परमपुरुषादिकृतः। किमत्र प्रमाणम्? उच्यते–**प्रमाणं** बाधविवर्जितः प्रत्ययः **अत्र** लोकानादित्वविषये **प्रवचनं** प्रकृष्टं वचनं ''कालओ णं अहेलोयखेत्तलोए न कयाइ नासि जाव निच्चे एवं जाव'' (भ.श.११उ.१०.सू.४२०) तच्च श्री जिनेश्वराणाम्, उक्तंच-वीतरागा हि सर्वज्ञा मिथ्या न ब्रुवते क्वचित्। यस्मात्तस्माद्वचस्तेषां, तथ्यं 'भूतार्थदर्शनम् ॥१॥ इत्यादि तुः पुनरर्थे। 'पमाणमित्थं च वयणं तु' इति पाठान्तरं सुगममिति ॥१॥ अधुना पञ्चास्तिकायमयं लोकं लक्षणतो निरूपयति–

**धम्माधम्मागासा गइठिइअवगाहलक्खणा एए ।**
**जीवा उवओगजुया मुत्ता पुण पुग्गला णेया ॥२॥**

**अक्षरगमनिका**—धर्माधर्माकाशाः क्रमशो गतिस्थित्यवगाहलक्षणा एते, जीवा उपयोगयुता मूर्ताः पुनः पुद्गला ज्ञेयाः ॥२॥

**टीका—धर्माधर्माकाशा** धर्मास्तिकायः अधर्मास्तिकाय आकाशास्तिकायश्च क्रमशो गतौ स्थितौ अवगाहनायां च जीवपुद्गलानामुपग्रहकारिण इत्थं **गतिस्थित्यवगाहलक्षणा एते** अनन्तरोक्ता धर्मादयो ज्ञेया इति

सम्बन्धः, तथा त्रिकालजीवनाद् **जीवाः** सत्त्वाः संसारिणो मुक्ताश्च, किंलक्षणाः? **उपयोगयुता** दर्शनज्ञानान्यतरोपयोगोपयुक्ताः। एते चत्वारोऽप्यस्तिकायाः स्वरूपतः अमूर्ताः, **मूर्ता** रूपिणः **पुनर्**विशेषे पूरणाद्गलनाच्च **पुद्गलाः** संघातभेदाच्च परमाण्वादयो **ज्ञेया** बोद्धव्या इति॥२॥ एते पञ्चास्तिकाया न केवलमनादिमन्तः अपि त्वनिधनाः, तथा कार्यकारणभावेन वर्तमाना अपि स्वं स्वं स्वरूपं न जहतीति दर्शयन्नाह–

**एए अणाइनिहणा तहा तहा नियसहावओ नवरं।**
**वट्टंति कज्जकारणभावेण भवे ण परसरूवे॥३॥**

**अक्षरगमनिका–**एते अनादिनिधनास्तथा तथा निजस्वभावतो केवलं वर्तन्ते कार्यकारणभावेन तथापि भवन्ति न परस्वरूपाः॥३॥

**टीका––एते** अनन्तरोक्तलक्षणा धर्मास्तिकायादयः **अनादिनिधना** आद्यन्तरहिताः, **तथा तथा** तेन तेन प्रकारेण **निजस्वभावतो** निजः सहजश्चासौ स्वः स्वकीयो भावो भवनं निजस्वभावस्तेन हेतुना **नवरं** प्राकृतत्वात् केवलं न त्वीश्वरादिप्रेरिता **वर्तन्ते** विद्यन्ते, किंरूपेण? **कार्यकारणभावेन** हेतुफलभावेन प्रतिस्वं परस्परं च, तथाहि–स्वकीयपूर्वपर्यायेण हेतुभूतेन स्वकीयोत्तरपर्यायरूपं फलं प्रतीति प्रतिस्वं कार्यकारणभावः, तथा द्वयोः परमाण्वोः कारणभूतयोः संघाताद् द्विप्रदेशरूपं कार्यमुत्पद्यते, द्विप्रदेशस्याणोश्च संघातात् त्रिप्रदेशः। एवं संख्येयानामसंख्येयानामनन्तानां प्रदेशानां संघातात् तावत्प्रदेशाः स्कन्धाः परमाणवश्च कार्यरूपेणोत्पद्यन्ते। अयं विशेषः–भेदादेव परमाणुरुत्पद्यते न संघातादिति परस्परं कार्यकारण भावः। जीवाजीवान् प्रति गतिस्थित्यवगाहोपग्राहका धर्माधर्माकाशा उक्ता एव। पुद्गला अपि जीवानां शरीरवाङ्मनःप्राणापान-सुखदुःखजीवितमरणोपग्रहे वर्तन्ते।

एवंभूतेन कार्यकारणभावेन एते सर्वे लोकाकाशे क्षीरनीरन्यायेन वर्तमाना अपि **भवन्ति** जायन्ते **न** नैव **परस्वरूपाः** पररूपेण, यथा–जीवाः पुद्गलरूपेण पुद्गलाश्च जीवरूपेण नैव परिणमन्ते, अपि तु सर्वे सदा स्वरूपेणैवावतिष्ठन्त इति॥॥३॥ आस्तामेतेषां पररूपेण परिणमनमभावोऽपि न जायत इति निरूपयन्नाह—

**ण वि य अभावो जायइ तस्सत्ताए य नियमविरहाओ।**
**एवमणाई एए तहा तहा परिणइसहावा॥४॥**

**अक्षरगमनिका–**अपि च–नाऽभावो जायते तत्सत्तायाश्च नियमविरहात्। एवमनादय एते तथा तथा परिणतिस्वभावाः॥४॥

**टीका––**आस्तां पररूपेण परिणमनम् **अपि चः** अभ्युच्चये **न** नैव **अभावः** सर्वथा विनाशो **जायते** भवति **तत्सत्तायास्**तेषां धर्मास्तिकायादीनां सत्त्वस्य **चः** समुच्चये कस्मात्? उच्यते, **नियमविरहाच्च**–'यद्यत् सत् तत्तत् सर्वथा विनाशी'ति नियमस्य व्याप्तेर्विरहात् अभावादिति हेतोः। यदि वा सतोऽपि द्रव्यस्याऽभावो जायेत तर्हि तत्सत्ता कादाचित्की स्यात्। एवमसत उत्पादोऽपि दुर्निवारः स्यात्।कस्मात्? नियमविरहाद्–नियामकाभावात्। न चैतद् दृष्टमिष्टं च। तस्मात् तेषां सर्वेषां धर्मास्तिकायादीनां शाश्वती सत्ताऽभ्युपगन्तव्या।

**एवम्** अनन्तरोक्तयुक्त्या **अनादय** आदिविरहिता **एते** धर्मास्तिकायादय**स्तथा तथा** तेन तेन प्रकारेण **परिणतिस्वभावाः** परिणतिः परिणमनं भवनमिति यावत् स्वभावः प्रकृतिर्येषां ते तथा ज्ञेयाः, तथाहि–यथा

स्वर्णं कटककुण्डलादिभिर्विविधपर्यायैः परिणममानमपि सर्वपर्यायेषु स्वर्णतयाऽन्वेत्येव। परिवर्तमानेष्वपि पर्यायेषु स्वर्णस्य नैवाभावो जायते। तथैवाऽऽत्मादयः पदार्था अपि नरामरतिर्यगादिभिः पर्यायैः परिणममाना अपि आत्मादिद्रव्यरूपेण सर्वदान्विता भवन्ति। न कदापि तेषां सर्वथाऽभावो जायते। उक्तं च-मूर्तामूर्तं द्रव्यं सर्वं न विनाशमेति नान्यत्वम्। (लोकतत्त्वनिर्णयः)॥४॥ युक्त्या धर्मास्तिकायादीनामनादित्वं साधयित्वाऽधुना तेषां तथास्वभावकल्पनातोऽपि आदिमत्त्वं निरस्यन्नाह-

**इत्तो उ आइमत्तं तहासहावत्तकप्पणाए वि।**
**एसिमजुत्तं; पुव्विं अभावओ भावियव्वमिणं॥५॥**

**अक्षरगमनिका**-इतस्त्वादिमत्त्वं तथास्वभावकल्पनयापि एतेषामयुक्तं पूर्वमभावतो भावयितव्यमिदम्॥५॥

**टीका**—**इतः** अनन्तरोक्तयुक्तित एव **तुरवधारणे** **आदिमत्त्वं** प्रथमप्रथमोत्पत्तिः सृष्टिर्वा आस्तां हेतुयुक्तिदृष्टान्ताभ्यां **तथास्वभावकल्पनयापि** तेन तेन प्रकारेण स्वभावस्य प्रकृतेः कल्पनया संवृत्यापि **एषां** धर्मादीनाम् **अयुक्तं** युक्त्यानुपपन्नम्। युक्तिमेव दर्शयति-**पूर्वं** प्राग् उत्पत्तेस्तेषां धर्मादीनाम् **अभावतः** असत्त्वात्। तथाहि-यदसत्तस्योत्पत्तिस्त्रिष्वपि कालेषु नास्त्येव यथा खरविषाणादीनाम्। आचार्यः अत्यन्तसौहार्देन कथयति-**भावयितव्यं** चिन्तनीयम् इदं तत्त्वं सूक्ष्मेक्षिकयेति॥५॥ यथैते धर्मादयस्तथास्वभावकल्पनयापि न सादिमन्तस्तथा परमपुरुषप्रभवा अपि न सन्तीति प्रदर्शयन्नाह-

**नो परमपुरिसपहवा पओयणाभावओ दलाभावा।**
**तत्तस्सहावयाए तस्स व तेसिं अणाइत्तं॥६॥**

**अक्षरगमनिका**-न परमपुरुषप्रभवाः प्रयोजनाभावात् दलाभावाच्च। तत्तत्स्वभावतया, तस्येव तेषाम् अनादित्वम् अभ्युपगन्तव्यमिति शेषः॥६॥

**टीका**—**न** नैव **परमपुरुषप्रभवाः** स्वयंभूजन्मान एते धर्मास्तिकायादयः। कस्मात्? तस्य स्वयंभुवो वीतरागत्वेनाभ्युपगतत्वात् **प्रयोजनाभावतः** कारणाभावात्। अपि च-सृष्टेः प्राग् **दलाभावात्** उपादानाभावाच्च।

अथ **तत्तत्स्वभावतया** तस्यानादिमतः स्वयंभुवः स स्वभाव एव तत्तत्स्वभावस्तस्य भावस्तत्तत्स्वभावता तया निष्प्रयोजनोऽपि स दलं विनैव तान् धर्मास्तिकायादीन् सृजति।

आचार्य आह-**तस्य** स्वयंभुव **इव** **तेषां** धर्मास्तिकायादीनामपि तत्स्वभावतया-**ऽनादित्वं** शाश्वतिकत्वमभ्युपगन्तव्यं न्यायस्य समानत्वादिति॥६॥ अत्र पर आह-

**न सदेव यऽस्स भावो को इह हेऊ? तहासहावत्तं।**
**हंताभावगयमिणं को दोसो तस्सहावत्तं॥७॥**

**अक्षरगमनिका**-न सदेव चास्य लोकस्य भावः। क इह हेतुः? तथास्वभावत्वमिति चेत्। हन्त! अभावगतमिदं तथास्वभावत्वमस्तु को दोषः?॥७॥

**टीका**—अत्र पर आह-**न** नैव **सदैव** त्रैकालिकः **चो** विशेषे **अस्य** पञ्चास्तिकायलोकस्य **भावः** सत्ता यथा स्वयंभुवः। आचार्यः-**कः** प्रश्ने **इह** स्वयंभूशाश्वतीसत्तायां **हेतुर्बीजम्**? अथ **तथास्वभावत्वमिति** चेत्। **हन्त!** आमन्त्रणे तर्हि तथाभूतसृष्टिस्रष्टुः स्वयंभुवः **अभावगतम्** असत्त्वविषयकम् **इदं** तथास्वभावत्वं

हेतुरस्तु। **को दोषः ?** न कोऽपि दोष इत्यर्थः। एवमेवेदं तथास्वभावत्वं लोकस्याऽनादित्वेऽपि हेतुर्भवतु दोषाभावादिति ॥७॥ अथ परपरिकल्पितचराचरजगत्कर्तुरीश्वरस्य निराकरणायाह–

**सो भावऽभावकारणसहावो भयवं हविज्ज नेयं पि।**
**सव्वाहिलसियसिद्धिओ अन्नहा भत्तिमत्तं तु ॥८॥**

**अक्षरगमनिका**–अथ स भावाभावकारणस्वभावो भगवान् भवेल्लोकस्यादिकारणमिति चेत्। नैतदपि, यतः सर्वाभिलषितसिद्धयः स्युः। अन्यथा भक्तिमात्रं तु ॥८॥

**टीका**—अथ **स** वक्ष्यमाणो **भावाभावकारणस्वभावः** भावश्च सत्ता भवनं वा अभावश्च अभवनं नाशो वा भावाभावौ तयोः कारणं निमित्तं भावाभावकारणं तदेव स्वभावो यस्य स तथाऽसौ **भगवान्** ईश्वरो **भवेत्** स्यादिति चेत्। **न** नैव **एतद्** लोकस्यादिकारणतया भगवत्कल्पनम् **अपिः** समुच्चये, आस्तां परमपुरुषादिकल्पनं, नैतदपि युक्तिक्षममित्यर्थः। युक्तिश्चात्र–एवंभूताद् भगवतः सकाशात् **सर्वाभिलषितसिद्धयः** सर्वेषां सर्वाणि वा युक्तान्ययुक्तानि चाभिलषितानि प्रार्थितानि तेषां सिद्धयः स्युः। तथा च जगति कोऽपि दारिद्र्यादिदुःखोपहतो न स्यात्। **अन्यथा** अभिलषितसिद्ध्यभावेऽपि तथास्वभावभगवत्कल्पनं **भक्तिमात्रं** केवलम् आदर एव **तुरवधारणे** ॥८॥ एवं परपरिकल्पितस्वभावं भगवन्तं निराकृत्याधुना भगवतः सत्स्वरूपमावेदयति—

**धम्माधम्मनिमित्तं नवरमिहं हंत होइ एसो वि।**
**इहरा उ थयक्कोसाइ सव्वमेयम्मि विहलं तु ॥९॥**

**अक्षरगमनिका**–धर्माधर्मनिमित्तं नवरमिह हंत भवत्येषोऽपि भगवान्। इतरथा तु स्तवाक्रोशादि सर्वमेतस्मिन् विषये विफलं तु ॥९॥

**टीका**—धर्मः पुण्यं सम्यग्दर्शनज्ञानादिस्वभावो वाऽधर्मः पापं मिथ्यात्वादिविभावो वा धर्माधर्मौ तयोर्निमित्तं हेतु**र्धर्माधर्मनिमित्तं नवरं** प्राकृतत्वात् केवलम् **इह** जगति **हंत** आमन्त्रणे **भवति** जायते **एष** भगवान् **अपिः** समुच्चये आस्तां जीवस्य स्वकीयः शुभाशुभभाव इति। **इतरथा** धर्माधर्मयोर्निमित्ताभावे **तु**र्विशेषे **स्तवाक्रोशादि** स्तोत्रावर्णवादपूजाशातनादि **सर्वं** निरवशेषम् **एतस्मिन्** भगवति विषये **विफलं**–निष्फलमेव स्यात् **तु**रवधारणे ॥९॥ यथा स्तावकादेर्धर्माधर्मौ भवतस्तथा भगवतोऽपि किञ्चित् स्यादित्याशङ्कायामाह—

**न य तस्स वि गुणदोसा अणासयनिमित्तभावओ हुंति।**
**तम्मयचेयणकप्पो तहासहावो खु सो भयवं ॥१०॥**

**अक्षरगमनिका**–न च तस्यापि गुणदोषौ अनाशयनिमित्तभावतो भवतः। तन्मयचेत(वेद)-नकल्पस्तथास्वभावः खलु स भगवान् ॥१०॥

**टीका**—**न** नैव **चो** विशेषे **तस्यापि** भगवतः स्तवाक्रोशादितो **गुणदोषौ** लाभहानी **भवतो** जायेते। कस्मात् ? **अनाशयनिमित्तभावतो** वीतरागत्वात् कृतकृत्यत्वाच्च हानादानपरिणामरूपाऽऽशयाभावाद् अनाशयोऽपि स्तावकादेर्धर्माधर्मौ प्रति निमित्तं भवतीति अनाशयनिमित्तभावस्तस्मात् हेतोरिति। पठ्यते च 'अण्णासयनिमित्तभावओ' तथा च–अन्येषां स्तावकाक्रोशकादीनां स्वविषयकस्तवाक्रोशादितः शुभाशुभपरिणामात्मकाशयं प्रति स भगवान् केवलं निमित्तं भवतीति। अत्रापि को हेतुः ? उच्यते, स

एवानाशयनिमित्तभावरूपश्चेतन आत्मा यस्य स तन्मयचेतनः, तथाभूतश्चासौ कल्पः समर्थ इति **तन्मयचेतनकल्पः**। 'तम्मयवेयणकप्पो' इति पाठान्तरमाश्रित्य कर्मजन्यसुख-दुःखादिवेदनाभावात् अन्याशयनिमित्तभाववेदनकल्पः **स भगवान् तथास्वभावः** अनाशयनिमित्तभावस्वभाव एव **खुः** प्राकृतत्वादवधारणे। अयमर्थ :—रागद्वेषादिरहिततया निमित्तभावस्वभावात् तस्य भगवतो गुणदोषौ न भवत इति ॥१०॥ अत्रार्थे दृष्टान्तमाह—

**रयणाई सुहरहिया सुहाइहेऊ जहेव जीवाणं।**
**तह धम्माइनिमित्तं एसो धम्माइरहिओ वि॥११॥**

**अक्षरगमनिका**—रत्नादयः सुखरहिताः सुखादिहेतव एव यथा जीवानां तथा धर्मादिनिमित्तम् एष भगवान् धर्मादिरहितोऽपि ॥११॥

मार्गदर्शक जी महाराज

**टीका**—**रत्नादयः** चिन्तामणिकामकुम्भादयः **सुखरहिता** अनुकूलसंवेदनशून्या अपि **सुखादिहेतवः** अनुकूलप्रतिकूलसंवेदनकारणानि भवन्तीति शेषः, **यथा** यद्वद् **एव**कारोऽवधारणे भिन्नक्रमश्च **जीवानां** सत्त्वानां **तथा** तद्वदेव **धर्मादिनिमित्तं** पुण्यपापहेतुर्भवति **एष** मुक्तो भगवान् **धर्मादिरहितः** पुण्यपापकर्मशून्यः **अपि,** आस्तां भवस्थो भगवान् धर्मादिसहित इत्यपिशब्दार्थः ॥११॥ अनन्तरोक्तभवस्थभगवद्वार्तामसहमानः पर आह—

**एसो अणाइमं चिय सुद्धो य तओ अणाइसुद्धुत्ति।**
**जुत्तो य पवाहेणं, न अन्नहा सुद्धया सम्मं॥१२॥**

**अक्षरगमनिका**—एष भगवान् अनादिमान् शुद्धश्च। आचार्य आह—

सः अनादिशुद्ध इति हेतोर्युक्तश्च प्रवाहेण, नान्यथा शुद्धता सम्यक्॥१२॥

**टीका**—**एषः** अस्मदभिमतो भगवान् स्वयंभूः **अनादिमान्** आदिरहितः **शुद्धश्च**। आचार्य आह—**तको** भवदभ्युपगतो भगवान् **अनादिशुद्ध** आकालं रागादिदोषविरहित **इति** हेतोः स उक्तस्वरूपो भवभावविनिर्मुक्तो **युक्तो** युक्त्या घटमानः **चो** विशेषे **प्रवाहेण** पारम्पर्येण समष्टिसव्यपेक्षः, **न** नैव **अन्यथा** व्यक्तितः अनादिशुद्ध इति। उक्तं च—इत्याज्ञाराधनपरा, अनन्ताः परिनिर्वृताः।

निर्वान्ति चान्ये क्वचन, निर्वास्यन्ति तथाऽपरे ॥१॥

एवं प्रवाहतः अनन्तमुक्तात्मापेक्षयाऽनादिमत्त्वं शुद्धत्वं चोपपद्यते, न तु कञ्चिदेकं विवक्षितमात्मान-माश्रित्यानादित्वं **शुद्धता** शुद्धत्वं च **सम्यग्** घटामाटीकेतेति॥१२॥ अत्रार्थे दृष्टान्तमाह—

**बंधो वि हु एवं चिय अणाइमं होइ हंत कयगो वि।**
**इहरा उ अकयगत्तं निच्चत्तं चेव एयस्स॥१३॥**

**अक्षरगमनिका**—बन्धोऽपि खल्वेवमेवानादिमान् भवति हन्त कृतकोऽपि। इतरथा त्वकृतकत्वं नित्यत्वं चैतस्य स्यादिति ॥१३॥

**टीका**—न केवलमेष भगवान् प्रवाहतः अनादिमान् **बन्धः** जीवकर्मसम्बन्धोऽ**पि हुः** प्राकृतत्वान्निश्चयार्थः अवश्यम् **एवं** प्रवाहत **एवानादिमान्** आदिविरहितो **भवति** जायते **हन्त** आमन्त्रणे **कृतको** जन्यः **अपि**। **इतरथा** प्रवाहतो बन्धस्याऽनादित्वानभ्युपगमे **तु**र्विशेषे किं? **अकृतकत्वम्** अजन्यत्वं **नित्यत्वं**

सदातनत्वं **चैव एतस्य** बन्धस्य प्रसज्येत। तथा च न कस्यचिन्मुक्तिवार्तापि स्यादिति ॥१३॥ अत्र परः शङ्कते—

**जह भव्वत्तअकयगं न य निच्चं एवं किं न बंधोवि ?।**
**किरियाफलजोगो जं एसो ता न खलु एवं ति ॥१४॥**

**अक्षरगमनिका**—यथा भव्यत्वम् अकृतकं न च नित्यमेवं किं न बन्धोऽपि ?
आचार्य :—क्रियाफलयोगो यद् एष तस्मान्न खल्वेवमिति ॥१४॥

**टीका—यथा** औपम्ये भवदभ्युपगतं **भव्यत्वं** तन्त्रप्रसिद्धो मुक्तिगमनहेतुर्जीवस्यानादिपारिणामिको भावः **अकृतकम्** अजन्यं **न** नैव **चः** पुनरर्थे **नित्यं** सदातनम्। **एवं** भव्यत्ववत् **किं** प्रश्ने **न** नैव **बन्ध** उक्तस्वरूपः **अपिः** समुच्चये अकृतकः पुनर्न नित्यः ? अयं भावार्थ :—यथा भव्यत्वम् अकृतकं तथापि न नित्यं तथैव बन्धोऽपि किं नाऽकृतकः सन् न नित्यः स्यात् ? आचार्य आह—क्रिया जीवसत्का हिंसादिचेष्टा रागाद्यध्यवसायरूपा वा तस्याः फलं कार्यं कर्मपरमाणुश्लेषरूपं तेन जीवस्य योगः सम्बन्धः **क्रियाफलयोगो यद्** यस्मात् कारणात् **एष** बन्धस्**तस्मात्** कारणात् **न** नैव **खलु**रवधारणे **एवं** भव्यत्ववत् बन्धः अकृतक **इतिः** समाप्तौ ॥१४॥ ननु यद्यदकृतकं तत्तन्नित्यं यथाकाशं भव्यत्वं पुनः अकृतकं सत् अनित्यमित्यत्र को हेतुः ? आचार्य आह—

**भव्वत्तं पुणमकयगमणिच्चो चेव तहसहावाओ।**
**जह कयगो वि हु मुक्खो निच्चो वि य भाववइचित्तं ॥१५॥**

**अक्षरगमनिका**—भव्यत्वं पुनः अकृतकमनित्यमेव तथास्वभावात्, यथा कृतकोऽपि खलु मोक्षो नित्योऽपि चात्र हेतुः केवलं भाववैचित्र्यमिति ॥१५॥

**टीका—भव्यत्वम्** उक्तस्वरूपं **पुन**र्विशेषे **अकृतकम्** अजन्यं सत् **अनित्यं** गत्वरमेव **तथास्वभावात्** हेतोः। **यथा** प्रदर्शने **कृतकोऽपि** जन्योऽपि **हु** प्राकृतत्वादवधारणे खलु **मोक्षः** शुद्धात्मस्वरूपलाभो **नित्योऽपि** शाश्वत**श्चः** समुच्चये। अत्र हेतुः केवलं **भाववैचित्र्यं** पदार्थानां वैविध्यमिति। इदं तु ध्येयम्–अत्र जगति कोऽपि नियमो नास्ति यदुत यन्नित्यं तदनादिमदेव यच्चानादिमत्तन्नित्यमेवेति ॥१५॥ भव्यत्वमिवाऽकृतकमपि चानित्यं किञ्चित्तत्त्वं नामान्तरेणान्यैरपि मोक्षवादिभिर्वर्ण्यते तदुपदर्श्यते—

**एवं चेव दिदिक्खा भवबीजं वासणा अविज्जा य।**
**सहजमलसद्दवच्चं वन्निज्जइ मुक्खवाईहिं ॥१६॥**

**अक्षरगमनिका**—एवमेव दिदृक्षा भवबीजं वासनाऽविद्या च सहजमल इति शब्दवाच्यं वर्ण्यते मोक्षवादिभिरिति ॥१६॥

**टीका—एवमेव** यथानन्तरं भव्यत्वमकृतकमपि चानित्यं वर्णितं तथैव सांख्यैः शैवैर्बौद्धैर्वेदान्तिभिर्जैनैश्च यथाक्रमं **दिदृक्षा भवबीजं वासनाऽविद्या सहजमल इतिशब्दवाच्यं** किञ्चित्तत्त्वम् अकृतमपि चानित्यं **वर्ण्यते** निरूप्यते **मोक्षवादिभिः** शुद्धात्मस्वरूपलाभवदनशीलैरिति ॥१६॥ अथ किंस्वरूपं तत्तत्त्वमित्याह—

**एयं पुण तह कम्मेयराणुसंबंधजोगयारूवं।**
**एतदभावे णायं सिद्धाणाभावणागम्मं ॥१७॥**

**अक्षरगमनिका**—एतत् पुनस्तथाकर्मेतरानुसम्बन्धयोग्यतारूपम्। एतदभावे ज्ञातं सिद्धानाम् आभावनागम्यमिति ॥१७॥

**टीका**—**एतत्** सहजमलादिशब्दवाच्यं तत्त्वं **पुन**र्विशेषे यथा कर्म ज्ञानावरणीयादि पुद्गलरूपं तदितरो जीव एतदुभयोरनुसम्बन्धः परस्परं क्षीरनीरन्यायेन संयोगः स्यात् तथा जीवगतयोग्यतारूपं **तथाकर्मेतरानुसम्बन्धयोग्यतारूपं** समवसेयम्। **एतदभावे** सहजमलादिशब्दवाच्यानादिरागादिदोषाभावे **ज्ञातं** दृष्टान्तः **सिद्धानां** मुक्तात्मनाम् **आभावनागम्यं** समन्ताद् विचारणातो ज्ञेयम्, तथाहि—आत्मगतसहजमल एव कर्मसम्बन्धयोग्यता। एतदभावे सिद्धानां न कर्मसम्बन्ध इति ॥१७॥ ततः किमित्याह—

**इय असदेवाणाइयमग्गे तम आसि एवमाई वि।**
**भेयगविरहे वइचित्तजोगओ होइ पडिसिद्धं ॥१८॥**

**अक्षरगमनिका**—एवम् असदेवानादिकमग्रे तम आसीदेवमादिकल्पनाजालं भेदकविरहे वैचित्र्ययोगतो भवति प्रतिषिद्धम् ॥१८॥

**टीका**—**एवम्** अनन्तरोक्तरीत्या भवभावेषु हेतुभूते तथाकर्मेतरानुसम्बन्धयोग्यतारूपे तत्त्वे सिद्धे सति किमित्याह—**असदेव** शून्यमेव **अनादिकम्** आदिविरहितम् **अग्रे** प्राक् सृष्टेः **तमः** अन्धकार **आसीत्** अभवत्, श्रूयते च—"तम आसीत् तमसा गूढमग्रे प्रकेतम्", "ईसरेण कडे लोए", "सयंभुणा कडे लोए", "अण्डकृतं जगत्" **एवमादि** अनन्तरोक्तप्रभृतिकल्पनाजालम् **अपिः** समुच्चये प्रतिषिद्धं भवतीति सम्बन्धः। तथाहि—**भेदकविरहे** सदसतोः शून्यसृष्ट्योः संसारमोक्षयोश्च विभेदकृदसदन्धकारादिव्यतिरिक्तकिञ्चित्तत्त्वाभावे सति वैचित्र्यं यथा कश्चिद्भवभावविनिर्मुक्तः, कश्चित् सुखसौभाग्यादिभाक् कश्चिच्च दुःखदौर्गत्यदुर्योनिजन्मादिक्लेशविह्वल इत्यादि प्रत्यक्षानुभूयमानं वैविध्यं तेन योगात् सम्बन्धात् **वैचित्र्ययोगतो** हेतोः सृष्टिवादादिकल्पनाजालं **प्रतिषिद्धं**—प्रत्युक्तं **भवति**। यदि वा प्राकृतत्वेनाऽकारप्रश्लेषाद् भेदकविरहे वैचित्र्याऽयोगाद् जगद्वैचित्र्यस्याघटनाद् असत्कल्पनाजालं निरस्तं भवति। भेदकं विना न ह्येकस्यैव पदार्थस्य विभिन्नावस्थाद्वयमिति ॥१८॥ अपि च—

**भेयगविरहे तस्सेव तस्सऽभावत्तकप्पणमजुत्तं।**
**जम्हा सावहिगमिणं नीई अवही य णाभावो ॥१९॥**

**अक्षरगमनिका**—भेदकविरहे तस्यानन्तरोक्तसृष्टिकल्पनाजालस्येव तस्य जगतः अभावकल्पनमयुक्तम् यस्मात् सावधिकमिदं जगदभावत्वम्। नीत्याऽवधिश्च नाभावः ॥१९॥

**टीका**—**भेदकविरहे**—जीवकर्मसम्बन्धाभावे **तस्य** सृष्टिवादादिकल्पनाजाल**स्येव** सादृश्ये **तस्य** जगतः **अभावत्वकल्पनम्** असत्त्वबुद्धिरपि **अयुक्तं** युक्तिशून्यम्, **यस्मात्** कारणात् **सावधिकमिदं** जगद् यदि वा सावधिकोऽयं जगदभावस्तथाहि—अमुककाले जगन्नासीद् अमुककाले चास्योत्पत्तिर्जाता। एवं सावधिको जगदभावः संजातः। **नीत्या** युक्त्या विचार्यमाणः **अवधिश्च** कालमर्यादा **नाभावात्मकः**, यतः अमुककाले जगन्नासीदित्यत्र कालः कः पदार्थः ? जीवाजीववर्तनारूप इति चेत्। तर्हि सिद्धं सदातनं जीवाजीवात्मकजगदस्तित्वमिति ॥१९॥ उपसंहरन्नाह—

**इय तन्तजुत्तिसिद्धो अणाइमं एस हंदि लोगो त्ति।**
**इहरा इमस्सऽभावो पावइ परिचिंतियव्वमिणं ॥२०॥**

॥ इति अनादिविंशिका द्वितीया ॥२॥

**अक्षरगमनिका**—एवं तन्त्रयुक्तिसिद्धः अनादिमान् एष हन्त लोक इति। इतरथास्याभावः प्राप्नोति। परिचिन्तयितव्यमिदमिति ॥२०॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका—एवम्** अनन्तरोक्तरीत्या **तन्त्रयुक्तिसिद्धः** तन्त्रात् "जीवाणं भंते! केवइयं कालं अवट्ठिया? सव्वद्धं।" (भ. श. ५ उ. ३८ सू. २२२) तथा-

न कर्तृत्वं न कर्माणि, लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं, स्वभावस्तु प्रवर्तते ॥१॥　(गीता. अ. ५ श्लोक-१४)

इत्यादिशास्त्रवचनात् प्रागुक्तयुक्तितश्च सिद्धो न्यायप्राप्तः **अनादिमान्** आदिविरहित **एष** प्रत्यक्षानुभूयमानो **हन्त** आमन्त्रणे **लोक**श्चराचररूप **इतिः** परिसमाप्तौ। **इतरथा** परमपुरुषोत्पादितोऽयं तमसो वोत्पन्नो लोक इत्याद्यभ्युपगमे परमपुरुषस्य कृतकृत्यत्वेन प्रयोजनाभावाद् उपादानाभावाच्च तथा भेदकविरहे केवलं तमसो जगद्वैचित्र्यानुपपन्नत्वाद् **अस्य** लोकस्य **अभावो** विरहः **प्राप्नोति** आपद्यते। स चानिष्ट एव दृष्टेष्टबाधितत्वात्। अतः सूक्ष्मेक्षिकया **परिचिन्तयितव्यम्** अन्वयव्यतिरेकाभ्यां भावनीयम् **इदं** लोकानादित्वमिति ॥२०॥

॥ इति द्वितीया लोकानादित्वविंशिका समाप्ता ॥२॥

# तृतीया विंशिका कुलनीतिलोकधर्माः

अनन्तरं लोकानादित्वं प्रसाध्याचार्यः अधुना लोके प्रवर्तमानान् कुलनीतिधर्मान् प्रदर्शयति—

**इत्थ कुलनीइधम्मा पाएण विसिट्ठलोगमहिकिच्च।**
**आवेणिगाइरूवा विचित्तसत्थोइया चेव ॥१॥**

**अक्षरगमनिका**—अत्र कुलनीतिधर्माः प्रायेण विशिष्टलोकमधिकृत्याऽऽवेणिकादिरूपा विचित्रशास्त्रोदिताश्च सन्ति ॥१॥

**टीका—अत्र** प्राणिलोके **कुलनीतिधर्माः** कुलानि इक्ष्वाकुप्रभृतीनि तेषां नीतयः प्रचलिताचारास्ते च धर्माः शास्त्रोक्ताश्च **प्रायेण** बाहुल्येन **विशिष्टलोकं** प्रमुखजनसमुदायम् **अधिकृत्य** समाश्रित्य द्वेधा सन्तीति शेषः, तथाहि— **आवेणिकादिरूपाः विचित्रशास्त्रोदिताश्च** आङ्मर्यादयाऽभिविधौ वा वेणिरेव वेणिका केशग्रथनं प्रायः प्रातः स्त्रीणां प्रथममेव कृत्यं यतो मुक्तकेशी स्त्री प्रायः अपशकुनबुद्ध्या गृह्यते, यदि वा वेणिकेवाऽनवच्छिन्नप्रवाहतः प्रवृत्ता आचारास्त आदौ येषां दीपकदानादिरूपाणां ते तथा, विचित्राणि वेदस्मृत्यादीनि शास्त्राणि तत्रोदिता निर्दिष्टा धर्माश्चेति ॥१॥ अनन्तरोक्तेषु वेणिसम्प्रदायानाह—

**जे वेणिसंपयाया चित्ता सत्थेसु अपडिबद्ध त्ति।**
**ते तम्मज्जायाए सव्वे आवेणिया नेया ॥२॥**

**अक्षरगमनिका**—ये वेणिसम्प्रदायाश्चित्राः शास्त्रेष्वप्रतिबद्धा इति ते तन्मर्यादया सर्वे आवेणिका ज्ञेयाः ॥२॥

**टीका—ये** अनिर्दिष्टनामानो **वेणिसम्प्रदायाः** परम्परातः प्रवृत्तव्यवहाराः **चित्रा** विविधाः **शास्त्रेषु** सिद्धान्तग्रन्थेषु **अप्रतिबद्धा** विधिनिषेधद्वारेणाऽनिर्दिष्टा **इति** हेतो**स्ते** कुलनीतिधर्मा**स्तन्मर्यादया** सम्प्रदायप्रथातः **सर्वे** निखिला व्यवहारा **आवेणिका** अनवच्छिन्नप्रवाहतः प्रवृत्ताः **ज्ञेयाः** समवसेया इति ॥२॥ तान् कतिपयान् नामनिर्देशमाह—

**जह संझाए दीवयदाणं सत्थं रविम्मि विद्धत्थे।**
**सुद्धग्गिणो अदाणं च तस्स अभिसत्थपडियाणं॥३॥**

**अक्षरगमनिका—**यथा सन्ध्यायां दीपकदानं शस्तं रवौ विध्वस्ते शुद्धाग्नेरदानं च तेषामभिशास्त्रपतितानाम्॥३॥

**टीका—यथा** निर्देशे **सन्ध्यायां** दिनान्ते **दीपकदानं** प्रदीपप्रज्वालनम् इष्टदेवतादिसन्मुखं सामान्यतो वा **शस्तं** प्रशंसाऽऽस्पदं **रवौ** सूर्ये **विध्वस्ते**ऽस्तङ्गते सति, तस्य रात्रौ लोकव्यवहारहेतुत्वात् सहजविवेकात्मकप्रकाशप्रतीकत्वाच्च। उक्तं च—

प्रदोषे मृद्गृहं त्यक्त्वा, बाला यान्ति गृहे यथा।
दृष्ट्वा जीवनसन्ध्याञ्च, सुज्ञाः स्वात्मगृहं प्रति॥१॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

किञ्च—**शुद्धाग्नेः** अभिमन्त्रितयज्ञाग्नेर्निर्धूमाग्नेर्वा **अदानम्** अप्रयच्छनं **चः** समुच्चये प्रशस्तं केषां? **तेषां** प्राकृतत्वाद्वचनव्यत्ययः **अभिशास्त्रपतितानां** शास्त्रसन्मुखात्मनां धार्मिकाणां वह्नेः सकलसत्त्वोपघातकत्वेन प्रबलशस्त्रत्वात्। अयं भावः—धार्मिकगृहस्थानां सन्ध्यायां दीपकदानं शुद्धाग्नेश्चाऽदानं प्रशस्तमिति॥३॥ अपि च—

**नक्खत्तमंडलस्स य पूजा नक्खत्तदेवयाणं च।**
**गोसे सइसरणाइ य धन्नाणं वंदणा चेव॥४॥**

**अक्षरगमनिका—**नक्षत्रमण्डलस्य च नक्षत्रदेवतानां च पूजा प्रभाते सतीस्मरणादि च धन्यानां वन्दना च॥४॥

**टीका—नक्षत्रमण्डलस्य** अश्विन्यादिबिम्बस्य **चः** समुच्चये **नक्षत्रदेवतानां** अश्वियमाग्न्यादिदेवतानां च **पूजा**ऽर्चा **प्रातः** प्रभातवेलायां **सतीस्मरणादि** सीतादिमहासतीनां स्मरणवन्दनादि **चः** समुच्चये **धन्यानां** धर्मधनानां महापुरुषाणां च विषये **वन्दना चः** समुच्चये प्रशस्तेत्यनुवृत्तेः॥४॥ किञ्च—

**गिहदेवयाइसरणं वामंगुट्ठयनिवीडणा चेव।**
**असिलिट्ठदंसणम्मी तहा सिलिट्ठे य सिरिहत्थो॥५॥**

**अक्षरगमनिका—**गृहदेवतादिस्मरणं वामाङ्गुष्ठनिपीडना चाश्लिष्टदर्शने तथा श्लिष्टे च श्रीहस्तः॥५॥

**टीका—**प्रभात एव विबोधावसरे **गृहदेवतादिस्मरणं** कुलदेवताधर्मदातृगुर्वादिस्मरणम्, उक्तं च—सरेइ सो सकुलधम्मनियमाई, तथाहि—कोऽहं का मम जाई, किं च कुलदेवया च के गुरुणो। को मह धम्मो के वा; अभिग्गहा का अवत्था मे॥१॥ इच्चेव सम्मं अणुपासमाणो अणागयं णो पडिबंधं कुज्जा। किञ्च—**वामाङ्गुष्ठनिपीडना** सव्याङ्गुष्ठावमर्दनं **चः** समुच्चये **अश्लिष्टदर्शने** मार्जाराद्यप्रशस्तसत्त्वावलोकने सति

तथा च दुर्निमित्तोपघातः स्यादिति। **तथा** समुच्चये प्रभात एव **श्लिष्टे** प्रशस्ते पदार्थे दृष्टे सति **श्रीहस्तः** श्रीप्रकाशकदक्षिणहस्तदर्शनं प्रशस्तं यदि वा सदैव प्रातर्जागरणे स्वस्वेष्टदेवतादिनमस्कारपूर्वकं पुण्यप्रकाशकदक्षिणहस्ततलदर्शनं प्रशस्तमिति ॥५॥ उक्तं लौकिकनित्यकृत्यमधुना प्रासङ्गिकमाह—

**बालाणं पुण्णनिरूवणाइ चित्तप्पहेणगाईहिं।**
**सत्थंतरेहिं कालाइभेयओ वयविभागेणं ॥६॥**

**अक्षरगमनिका**—बालानां पुण्यनिरूपणादीनि चित्रप्रहेलकादिभिः शास्त्रान्तरैश्च कालादिभेदतो वयोविभागेन च ॥६॥

**टीका—बालानाम्** अव्यक्तवयसां शिशूनां **पुण्यनिरूपणादीनि** शुभाशुभभाविभावपरीक्षणनियोजनादीनि कैः ? सुहृत्स्वजनसम्बन्धिबन्धुवर्गाद् उपहाररूपेणाऽऽगतैः **चित्रप्रहेलकादिभिः** विविधमिष्टान्नादिखाद्यपदार्थक्रीडनकादिभिर्वक्ष्यमाणरीत्या तथा **शास्त्रान्तरैः** सामुद्रिकज्योतिष्कादिशास्त्रैर्जातकजन्मसमये सूर्यादिग्रहाणां स्थित्या जातकाङ्गे च विद्यमानलक्षणव्यञ्जनादिभिः, किञ्च-**कालादिभेदतः** कालक्षेत्रद्रव्यादिभेदतः, तथाहि-कलोपार्जने शैशवकाले विनयादिहेतुभिः, धनार्जने प्रथमत एव रत्नादिवाणिज्ये साफल्यतः, क्षेत्रतो ग्रामनगरादौ, भावतश्च न्यायसत्यभाषणादिभिस्तथा **वयोविभागेन** शैशवाद्यवस्थाभेदेन च कलाधनधर्मोपार्जनादिभिः पुण्यनिरूपणादि क्रियते। उक्तं च—

प्रथमे वयसि नाधीतं, द्वितीये नार्जितं धनम्।
तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति ॥१॥६॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

कथं निरूप्यत इत्याह—

**तप्परिभोगेण तहा थाणे परदाणजातजुत्तेण।**
**वित्तविणिओगविसया डिंभपरिच्छा य चित्त त्ति ॥७॥**

**अक्षरगमनिका**—तत्परिभोगेन तथा स्थाने परदानयातयुक्तेन चित्रविनियोगविषया डिम्भपरीक्षा च चित्रेति ॥७॥

**टीका—तस्य** प्रहेलकादेः **परिभोगेन** भोगोपभोगेन यथा प्रथमग्रासे हि तन्मध्ये भाग्यपरीक्षार्थं निक्षिप्तनिष्कादिप्राप्त्या भाग्यपरीक्षा **तथा** समुच्चये भोगोपभोगात् प्राक् **स्थाने** समुचितपात्रे **परदानयातयुक्तेन** परस्मै दानं यदि वा परस्य श्रेष्ठवस्तुनो दानं तस्मै यातं गमनं यदि वा सामान्यतो गजगत्यादिना च तेन युक्तेन परिभोगेनौचित्यौदार्यादिगुणपरीक्षा विधीयते। किञ्च-**चित्रविनियोगविषया** विविधशस्त्रशास्त्रधनकनकादिवस्तूनां मध्यात्कस्यचिद्ग्रहणात् शौर्यपाण्डित्यवाणिज्यादिविनियोगविषया चित्तविन्यासविषया वा **डिम्भपरीक्षा** डिम्भानां बालानां परीक्षा **चः** समुच्चये **चित्रा** बहुविधा क्रियत **इतिः** समाप्तौ ॥७॥ अथ दुहितॄणां पुण्यनिरूपणं प्रदर्श्यते।

**वीवाहकोउगेहिं रइसंगमसत्तमद्दणाईहिं३।**
**धूयाणं पुण्णनिरूवणं च विविहप्पओगेहिं ॥८॥**

**अक्षरगमनिका**—विवाहकौतुके रतिसङ्गमसक्तमर्दनादिभिर्दुहितॄणां पुण्यनिरूपणं च विविधप्रयोगैः क्रियत इति शेषः ॥८॥

**टीका—विवाहकौतुकैः** पाणिपीडनात् प्राक् क्रियमाणैः कौतुकैर्माङ्गल्यैः कीदृशैः? **रतिसंगम-सक्तमर्दनादिभी** रतिसङ्गमः सांसारिकसुखं तस्य सूचकं सक्तम् अनुषक्तं दुहितृदेहदेशे मर्दनं पिष्टातक-चूर्णादिनोद्वर्तनम् आदौ येषां स्नपनविलेपनाङ्गरागतिलककज्जलरक्षाबन्धनादीनां तानि तथा **तैर्दुहितृणां** कन्यानां **पुण्यनिरूपणं** पूर्ववद् विधीयते **चः** समुच्चये भिन्नक्रमश्च **विविधप्रयोगैश्च** नानाप्रकारैः तथाहि- पूर्वोक्तचित्रप्रहेलकादिभिः शास्त्रान्तरैश्च ॥८॥ अथ स्त्रीणामावेणिकं धर्ममाह—

**भोगे भावट्ठवणं भावेणाराहणं च दइयस्स।**
**मलपुरिसुज्झ अणुव्वरिमंतेणं सीलरक्खा य ॥९॥**

**अक्षरगमनिका—**भोगे भावस्थापनं भावेनाराधनं च दयितस्य मलपुरीषोज्झः अनुव्रतामन्त्रेण शीलरक्षा च ॥९॥

**टीका—भोगे** संभोगे **भावस्थापनं** पुत्रोत्पत्तिहेतुरेवायं भोगः अन्यथा सकृद् रतिसङ्गमेऽसङ्ख्येय-सत्त्वोपमर्दनाद् विपाकदारुणः। उक्तं च—

खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अणिकामसुक्खा।
संसारमुक्खस्स विपक्खभूया; खाणी अणत्थाण य कामभोगा ॥१॥

इति भावस्य स्थापनम्। तथा-**भावेन** निर्व्याजेन **आराधनं च** चित्तानुवर्तनं कस्य? **दयितस्य** पत्युः। किञ्च-रोगाद्यवस्थायां पत्युरेव **मलपुरीषोज्झः** मूत्रविडादेर्ग्रामादेर्बहिरुत्सर्गः। अपि च-**अनुव्रतामन्त्रेण** पतिव्रतासत्कमन्त्रजापेन **शीलरक्षा,**-स्त्रीणां शीलमेव सर्वस्वमिति। **चः** समुच्चये ॥९॥ किञ्च—

**ण्हायपरिण्णाजलभुत्तपीलणं, वसणदंसणच्चाओ।**
**वेलासु अ थवणाई थीणं आवेणिगो धम्मो ॥१०॥**

**अक्षरगमनिका—**स्नातपरिज्ञाजलभुक्तपीडनं व्यसनदर्शनत्यागो वेलासु च स्तवनादीनि स्त्रीणामावेणिको धर्मः ॥१०॥

**टीका—स्नातपरिज्ञाजलभुक्तपीडनं** स्नातं शौचं देशसर्वभेदतश्च परिज्ञा तप इत्यादि। अथवा प्राकृतत्वात् पदव्यत्यय इति प्रतिज्ञापूर्वकम् अवश्यंभावेन स्नाता सतीत्यनेन ऋतुकाले गृहकार्यनिषेधः अवसेयः। यदि वा णिजन्तात् पत्युरेव स्नपनं जलपानं भोजनं पीडनं शरीरसम्बाधनं चाऽऽराधनार्थं कर्तव्यमिति शेषः। तथा-**व्यसने** कारागृहादिव्यापदि दयितस्य **दर्शनत्यागः** साक्षात्कारवर्जनम्। आपदि परस्परदर्शने चाधिकदुःखसंभवात् तत्र कारादौ च दुष्टक्रूरसत्त्वबाहुल्येन स्वशीलव्यापत्तेश्च। किञ्च- **वेलासु** अवसरेषु **स्तवादीनि** स्तवनं स्तुतिः परमात्मभक्तिप्रसङ्गेषु गीतं वा विवाहोत्सवेषु आदौ येषां नृत्यादीनां तानि **स्त्रीणां** महिलानाम् **आवेणिकः** पूर्वोक्तस्वरूपो **धर्म** इति ॥१०॥ अथ शास्त्रोक्तान् धर्मानाह—

**सत्थभणिया य अन्ने वण्णासमधम्मभेयओ नेया।**
**वण्णा उ बंभणाई तहासमा बंभचेराई ॥११॥**

**अक्षरगमनिका—**शास्त्रभणिताश्चान्ये वर्णाश्रमभेदतो ज्ञेयाः। वर्णास्तु ब्राह्मणादयस्तथाऽऽश्रमा ब्रह्मचर्यादयः ॥११॥

**टीका—**शास्त्राणि मनुस्मृत्यादीनि तत्र भणिता उपदिष्टाः **शास्त्रभणिताश्चः** समुच्चये **अन्ये** उक्तशेषा

धर्मा वर्णाश्चाश्रमाश्च वक्ष्यमाणास्तेषां भेदतो विभागतो **वर्णाश्रमधर्मभेदतो ज्ञेयाः** समवसेयाः। **वर्णास्तु ब्राह्मणादयो** ब्राह्मणक्षत्रियवैश्यशूद्रभेदाच्चत्वारस्तथाऽऽश्रमा अपि **ब्रह्मचर्यादयो** ब्रह्मचर्यगार्हस्थ्यवानप्रस्थ-सन्यासरूपावस्थाविशेषाच्चत्वार एव बोद्धव्याः। उक्तं च मनुस्मृतौ—अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥ अ० १-८८॥ प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥अ. १-८९॥

पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥९०॥ अ.१.

एकमेव तु शुद्रस्य प्रभुः कर्म समादिशत्। एतेषामेव वर्णानां शुश्रूषामनसूयया॥९१॥ अ.१.

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा। संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥

अ. २-७१

चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥ अ. ४-१

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥ अ.-६-२

यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात्। तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः॥

अ.-६-३९ ॥११॥

एषामेव धर्माणां फलमनुबन्धं चाह—

**एए ससत्थसिद्धा धम्मा जयणाइभेयओ चित्ता।**
**अब्भुदयफला सव्वे विवागविरसा य भावेणं॥१२॥**

**अक्षरगमनिका**—एते स्वशास्त्रसिद्धा धर्मा यतनादिभेदतश्चित्रा अभ्युदयफलाः सर्वे विपाकविरसाश्च भावेन॥१२॥

**टीका—एते** अनन्तरोक्ता वर्णाश्रमभेदतः **स्वशास्त्रसिद्धाः** श्रुतिस्मृत्यादिप्रसिद्धा **धर्मा यतनादिभेदतः** स्थूलजीवहिंसादिवर्जनारूपयतनातारतम्येन **चित्रा** विविधाः। किंफला एते? **अभ्युदयफला** राज्यादिप्राप्तिफलाः **सर्वे** निखिलाः। अथानुबन्धमाह—**विपाकविरसा** विपच्यमाना विरसाः कटुफला किंपाकफलवत् विपाकदारुणाः **चो** विशेषे **भावेन** परमार्थतो भवाभिष्वङ्गप्राधान्यादिति। उक्तं च—

धर्मादपि भवन् भोगः प्रायोऽनर्थाय देहिनाम्।
चन्दनादपि संभूतो दहत्येव हुताशनः॥१॥ (यो. दृ. स. श्लो. १५८)॥१२॥

ननु विपाकविरसा अपि कथमभ्युदयफला एत इत्याह—

**पयई सावज्जा वि हु तहा वि अब्भुदयसाहणं नेया।**
**जह धम्मसालिगाणं हिंसाई तहऽत्थहेउ त्ति॥१३॥**

**अक्षरगमनिका**—प्रकृत्या सावद्या अपि खलु तथाप्यभ्युदयसाधनं ज्ञेया यथा धर्मशालिनां हिंसादयस्तथाऽर्थहेतुरिति॥१३॥

**टीका**—न केवलं निरवद्याः **प्रकृत्या** स्वभावेनैते यागादिधर्माः **सावद्या** हिंसादियुता **अपि हु** प्राकृतत्वादवधारणे भिन्नक्रमश्च **तथापि अभ्युदयसाधना** राज्यादिप्रापका एव **ज्ञेया** अवगन्तव्या **यथा** दृष्टान्ते **धर्मशालिनां** श्रमणोपासकानां जिनभवननिर्माणपूजादानादिगता **हिंसादयः** स्वरूपतः प्राणातिपातपरिग्रहप्रभृतयो

दुष्टाशयाभावात् **तथार्थहेतुः** अभ्युदयाय हेतुः कारण**मितिः** समाप्तौ। उक्तं च–

इष्टापूर्तानि कर्माणि लोके चित्राभिसन्धितः।
नानाफलानि सर्वाणि द्रष्टव्यानि विचक्षणैः ॥१॥ (यो. दृ. स. ११३)॥१३॥

अथ श्रमणोपासकानां संज्ञानप्राधान्येन पारम्पर्यतोऽपवर्गसाधकत्वात् जिनपूजादानादिगता हिंसादयः अभ्युदयसाधना अपि न विपाकविरसास्तर्हि किमर्थं लौकिकानां यागादिगता हिंसादयस्तथेत्याशङ्क्याह—

**मोहपहाणे एए वेरग्गं पि य इमेसि पाएण।**
**तग्गब्भं चिय नेयं मिच्छाभिनिवेसभावाओ ॥१४॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—मोहप्रधाना एते वैराग्यमपि चैषां प्रायस्तद्गर्भमेव ज्ञेयं मिथ्याभिनिवेशभावात् ॥१४॥

**टीका—मोहप्रधाना** अज्ञानपुरस्सरा **एते** लौकिकधर्मानुष्ठातारो **वैराग्यमपि** भवनिर्वेदोऽपि **चः** समुच्चये **एषां** लौकिकानां **प्रायेण** बाहुल्येन **तद्गर्भमेव** मोहगर्भमेव **ज्ञेयं** बोद्धव्यं **मिथ्याभिनिवेशभावाद्** असद्ग्रहभावात्। तत एवैषां यागादिगता हिंसादयो विपाकविरसा इति। उक्तं च–यूपं छित्त्वा पशुं हत्वा, कृत्वा रुधिरकर्दमम्। यद्येवं प्राप्यते स्वर्गो, नरके केन गम्यते?॥१४॥ नन्वेवमधर्मेऽपि धर्मबुद्धिः कथमिति चेदुच्यते—

**अन्नेसि तत्तचिंता देसाणाभोगओ य अन्नेसिं।**
**दीसंति य जइणो वित्थ केइ संमुच्छिमप्पाया ॥१५॥**

**अक्षरगमनिका**—अन्येषां तत्त्वचिन्ता मिथ्याभिनिवेशभावाद् देशानाभोगतश्चान्येषाम्। दृश्यन्ते च यतयोप्यत्र केचित्सम्मूर्च्छिमप्रायाः ॥१५॥

**टीका—अन्येषां** स्वव्यतिरिक्तानां लौकिकानां मिथ्याभिनिवेशभावादित्यस्यानुवृत्तेः का? **तत्त्वचिन्ता** जीवाजीवादितत्त्वविभावनम्। **अन्येषाम्** अपरेषां पतञ्जलिप्रभृतीनां **देशानाभोगत** आंशिकानुपयोगात् **चः** समुच्चये तत्त्वचिन्ता। अथवाऽन्येषां तत्त्वचिन्ता देशतो न सर्वतः अपरेषां पुनः अनाभोगात्। न केवलं लौकिका एव तत्त्वचिन्तारहिता **दृश्यन्ते** विलोक्यन्ते **चः** पुनरर्थे **यतयोऽपि** स्वयूथ्या अपि **अत्र** तत्त्वचिन्तायां **केचिद्** न सर्वे **सम्मूर्च्छिमप्राया** वर्षाभूतुल्या मनोव्यापारशून्या अन्तर्ज्ञानशक्तिविकला इति यावत्॥ अत एव दुर्निवारा गच्छभेदाः। उक्तं च—

कामरागस्नेहरागाविषत्करनिवारणौ। दृष्टिरागस्तु पापीयान्, दुरुच्छेदः सतामपि ॥१॥ ॥१५॥

उक्ता वर्णाश्रमाणां धर्माः। साम्प्रतं देशादिभेदात् धर्मानाह—

**अन्ने उ लोगधम्मा पहुया देसाइभेयओ हुंति।**
**वारिज्जसोयसूयगविसया आयारभेएण ॥१६॥**

**अक्षरगमनिका**—अन्ये तु लोकधर्मा प्रभूता देशादिभेदतो भवन्ति विवाहशौचसूतकविषया आचारभेदेन ॥१६॥

**टीका—अन्ये** उक्तशेषाः **तुर्विशेषे लोकधर्मा** लौकिकाचाररूपेणाऽऽसेवनपरिहाररूपाः **प्रभूता** बहवो **देशादिभेदतो** देशकुलजातिप्रभृतिभेदाद् **भवन्ति** सन्ति **विवाहशौचसूतकविषया** विवाहो ब्राह्मादिभेदादष्टधा दारपरिग्रहश्च शौचः स्नानक्षौरकर्मादिश्च सूतकं जन्मादिनिमित्तोत्पन्नाऽशौचश्च विवाहशौचसूतकानि विषयो

गोचरो येषां ते तथा **आचारभेदेन** परम्परागतव्यवहारभेदेनेति ॥१६॥ एतानेव विशेषतः प्रदर्शयति।

**कुलधम्माउ अपेया सुरेह केसिंचि पाणगाणं पि।**
**इत्थियणमुज्झियव्वा तेणाणज्जविह इमा मेरा॥१७॥**

**अक्षरगमनिका**—कुलधर्मादपेया सुरेह केषाञ्चिच्चाण्डालानामपि। तथा–स्त्रीजनो वर्जनीयः स्तेनानामद्यापीहेयं मर्यादा ॥१७॥

**टीका—कुलधर्मात्** कुलं पितृसम्बन्धि तस्य धर्म आसेवनपरिहाररूपस्तस्माद् **अपेया** पातुमयोग्या **सुरा** मदिरा **इह** लोके न केवलं सवर्णब्राह्मणादीनां **केषाञ्चित्** कतिपयानां **चाण्डालानामपि** शूद्रजातीयानामपि। तथा **स्त्रीजनो** महिलाजन **उज्झितव्यो** वर्जनीयः अस्प्रष्टव्य इति भावः केषां? **स्तेनानां** चौराणाम् **अद्यापि** सम्प्रत्यपि कलौ **इह** संसारे **इयं** प्रत्यक्षत्वाद् दृश्यमाना **मर्यादा** स्थितिः सीमा लक्ष्मणरेखेति यावत्। श्रूयन्ते हि जोगिदासखुमाणादिव्यतिकरा अद्यापीति ॥१७॥ अपि च—

**गणगुट्ठिघडापेडगजल्लाईणं च जे इहायारा।**
**पाणापडिसेहाई ते तह धम्मा मुणेयव्वा॥१८॥**

**अक्षरगमनिका**—गणगोष्ठिघटापेटकजल्लादीनां च य इहाचाराः पानाऽप्रतिषेधादयस्ते तथा धर्मा मुणितव्याः ॥१८॥

**टीका—गणगोष्ठिघटापेटकजल्लादीनां** गणा मल्लादीनां समुदायाश्च, गोष्ठयः सवयस्कानां च

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

मण्डलानि, घटा अनेकपरिवाराणां समूहाश्च, पेटकानि नटानां यूथाश्च, जल्ला वरत्राखेलकाश्चादौ येषां लङ्खमङ्खादीनां ते तथा तेषां **चः** समुच्चये **ये** अनिर्दिष्टनामान **इह** लोके **आचारा** वक्ष्यमाणस्वरूपा यथा **पानाऽप्रतिषेधादयः** सुरापानाऽवर्जनमातुलकन्यापरिणयनप्रभृतयस्ते सर्वे **तथाधर्मा**स्तथाप्रकारा धर्मा **मुणितव्या** ज्ञातव्या इति ॥१८॥ उपसंहरन्नाह

**सव्वे वि वेयधम्मा निस्सेयससाहगा न नियमेण।**
**आसयभेएणऽन्ने परंपराए तयत्थं ति॥१९॥**

**अक्षरगमनिका**—सर्वेऽपि वेदधर्मा निःश्रेयससाधका न नियमेन। आशयभेदेनान्ये परम्परया तदर्थमिति॥१९॥

**टीका—सर्वेऽपि** निखिला अपि **वेदधर्मा** वेदोपदिष्टा धर्मा मिथ्याभिनिवेशपोषकत्वात् **निःश्रेयससाधका** मोक्षप्रापका **न** नैव **नियमेन** अवश्यंभावेन। अत्रार्थे मतान्तरमाह— **आशयभेदेन** अभिसन्धिभेदेन **अन्ये** आचार्या वदन्ति, किमित्याह—**परम्परया** पारम्पर्येण **तदर्थं** निःश्रेयसार्थमितिः समाप्तौ। उक्तं च—एकमेव ह्यनुष्ठानं कर्तृभेदेन भिद्यते। सरुजेतरभेदेन भोजनादिगतं यथा॥१९॥ (यो. बि. १५३) कथं परम्परया निःश्रेयससाधका इत्याह—

**विसयसरूवऽणुबंधेण होइ सुद्धो तिहा इहं धम्मो।**
**जं ता मुक्खासयओ सव्वो किल सुंदरो नेओ॥२०॥**

॥ इति कुलनीतिधर्मविंशिका तृतीया ॥३॥

**अक्षरगमनिका**—विषयस्वरूपानुबन्धैर्भवति शुद्धस्त्रिधेह धर्मो यत्तस्मान्मोक्षाशयतः सर्वः किल सुन्दरो ज्ञेयः ॥२०॥

**टीका**—प्राकृतत्वाद्वचनव्यत्यय इति **विषयस्वरूपानुबन्धैः** विषयेण गोचरेण यथा मुक्तिर्मे भूयादस्माद्धर्मादिति स्वरूपेणात्मना अहिंसामयः अनुबन्धेन चोत्तरत्रानुवृत्तिलक्षणेन जीवादितत्त्वसंवेदनानुगः प्रशान्तवृत्त्या च **भवति** जायते **शुद्धः** अनवद्य**स्त्रिधा** त्रिप्रकार **इह** धर्मिलोके **धर्मो** निरुक्तस्वरूपो **यद्** यस्मात्कारणात् **तस्मात् मोक्षाशयतः** अपवर्गाभिसन्धितः **सर्वो** निखिलः **किल** संभावनायां **सुन्दरः** शोभनो **ज्ञेयः** अवसेयः। उक्तं च—आद्यं यदेव मुक्त्यर्थं क्रियते पतनाद्यपि। तदेव मुक्त्युपादेयलेशभावाच्छुभं मतम् ॥१॥ (यो. बि. २१२॥) इदमुक्तं भवति—मोक्षाशयतोऽपि क्रियमाणं भृगुपातादि न दोषविगमायाऽज्ञानबाहुल्यात्। मतान्तरेण तु दोषविगमोचितस्य जातिकुलादिगुणोपेतस्य जन्मनः सन्धायकमिति ॥२०॥

# चतुर्थी चरमपरिवर्तविंशिका

अनन्तरविंशिकामुपसंहरता ग्रन्थकृता त्रिधा शुद्धधर्म उक्तः। स च चरमपुद्गलपरावर्ते जायत इत्यत्रोच्यते—

**निच्छयओ पुण एसो जायइ नियमेण चरमपरियट्टे।**
**तहभव्वत्तमलक्खयभावा अच्चंतसुद्ध त्ति ॥१॥**

**अक्षरगमिनिका**—निश्यचतः पुनरेष जायते नियमेन चरमपरिवर्ते तथाभव्यत्वमलक्षयभावाद् अत्यन्तशुद्ध इति ॥१॥

**टीका**—**निश्चयतः** परमार्थतः **पुनर्विशेष एष** त्रिधा शुद्धधर्मो **जायते** प्रादुर्भवति **नियमेन** अवश्यंतया **चरमपरिवर्ते** चरमः पर्यन्तवर्ती परिवर्तः पुद्गलपरावर्तः द्रव्यतः सामान्येन सर्वपुद्गलग्रहणमोक्षरूपस्तन्त्र-प्रसिद्धानन्तोत्सर्पिण्यवसर्पिणीकालमानलक्षणस्तस्मिन् प्रवृत्ते सतीत्यर्थः। कुतः? **तथाभव्यत्वमलक्षयभावाद्** भव्यत्वं नाम मुक्तिगमनयोग्यत्वमनादिपारिणामिको भावः, तथाभव्यत्वमिति विशिष्टमेतत् कालादिभेदेन जीवानां बीजसिद्धिभावात् तेन मलो जीवस्यानादिपुद्गलग्रहणस्वभावलक्षणस्तस्य क्षयः अपचयस्तस्य भावो भवनं तस्मात्। कस्मादेवमित्याह—**अत्यन्तशुद्धः** अतीवाऽनवद्यो निवृत्तिरूप **इति** हेतोः। अयं भावः—यस्मात् कारणाद् एष धर्मो निश्चयतः अत्यन्तशुद्धस्तस्मात् तथाभव्यत्वेन सहजमलक्षयात् चरमपुद्गलपरावर्त एव प्रादुर्भवति, नान्येष्विति ॥१॥ एतदेवाभ्युच्चयति—

**मुक्खासओ वि नन्नत्थ होइ गुरुभावमलपहावेण।**
**जह गुरुवाहिविगारे न जाउ पत्थासओ सम्मं ॥२॥**

**अक्षरगमनिका**—मोक्षाशयोऽपि नान्यत्र भवति गुरुभावमलप्रभावेण यथा गुरुव्याधिविकारे न जातु पथ्याशयः सम्यक् ॥२॥

**टीका—मोक्षाशयोऽपि** मुक्त्यविच्छाऽपि, आस्तां त्रिधा शुद्धधर्म इत्यपेरर्थः **नान्यत्र** नैव द्विचरमादिपरावर्तेषु **भवति** जायते **गुरुभावमलप्रभावेण** गुरुर्निबिडः परमार्थतः सहजसज्ज्ञानादिस्वभावमलनाद् भावमलस्तस्य प्रभावेणानुभावेन। **यथा** दृष्टान्ते **गुरुव्याधिविकारे** सन्निपातादिमहारोगाऽऽपादितविकृतौ **न** नैव **जातु** कदाचिज्जीवः **पथ्याशकः** स्वास्थ्यप्रदाहारादिभोजी भवति, यदिवा जीवस्य पथ्याशयः पथ्ये रुचिः **सम्यक्** स्वरसतो न भवतीति॥२॥ अथ संसारे संसरतामसुमतां कियन्तः परिवर्ता भवन्तीत्याह—

**परियट्टा उ अणंता हुंति अणाइम्मि इत्थ संसारे।**
**तप्पुग्गलाणमेव य तहा तहा हुंति गहणाओ॥३॥**

**अक्षरगमनिका**—परिवर्तास्त्वनन्ता भवन्ति अनादावत्र संसारे तत्पुद्गलानामेव च तथा तथा भवन्ति ग्रहणात्॥३॥

**टीका—परिवर्ता** उक्तस्वरूपपुद्गलपरावर्तास्तुरवधारणे भिन्नक्रमश्च तथाभव्यत्वाक्षिप्ता **अनन्ता** एव **भवन्ति** जायन्तेऽतीताद्धाया अनन्तत्वाद् **अनादौ** आदिविरहिते **अत्रास्मिन् संसारे** चतुर्गतिभ्रमणलक्षणे। कथं भवन्तीत्याह—**तत्पुद्गलानामेव** कर्मप्रभृतिपरमाणूनामेव **चो** विशेषे **तथा तथा** तेन तेन प्रकारेण कार्मणौदारिकादिशरीरेन्द्रियादिरूपेण **भवन्ति** जायन्ते **ग्रहणाद्** आदानाद् उपलक्षणान्मोक्षाच्च पुद्गलपरावर्ता अनन्तरोक्तप्रमाणा जायन्त इति॥३॥ यथा पुद्गला जीवग्राह्यस्वभावास्तथा जीवोऽपि पुद्गलग्रहणस्वभाव इति प्रदर्शयति-

**तह तग्गेज्झसहावा जह पुग्गलमो हवंति नियमेण।**
**तह तग्गहणसहावो आया य तओ उ परियट्टा॥४॥**

**अक्षरगमनिका**—तथा-तद्ग्राह्यस्वभावा यथा पुद्गला भवन्ति नियमेन तथा तद्ग्रहणस्वभाव आत्मा च ततस्तु परिवर्ताः॥४॥

**टीका**—तथा समुच्चये **तद्ग्राह्यस्वभावाः** संसारिजीवग्राह्यस्वभावा **यथा** येन प्रेकारण **पुद्गला** उक्तस्वरूपा **भवन्ति** जायन्ते **नियमेना**ऽवश्यंतया **तथा** तेन प्रकारेण **तद्ग्रहणस्वभाव** पुद्गलग्रहणस्वभाव **आत्मा** संसारिसत्त्वः **चः** समुच्चये भवति। **ततस्तस्मादेव तुरवधारणे परिवर्ताः** पुद्गलपरावर्ता भवन्तीति शेषः॥ परस्परं ग्रहणग्राहकस्वभावविरहे बन्धादयोऽपि न घटेरन्। तदुक्तं च योगशतकवृत्तौ-ते परमाणवोऽनादित एव तथाऽनन्तशः तदात्मग्रहणस्वभावाः,सोऽप्यात्मा एवमेव तद्ग्राहकस्वभाव इत्युभयोस्तत्स्वभावतया घटन्ते तथा बन्धादयः अन्यथा मुक्तानामपि बन्धादिप्रसङ्गः, अतस्तत्स्वभावत्व एवोभयोरपि तद्भावोपपत्तेरिति भावनीयम्॥४॥

एवं मुक्तिगमनयोग्यस्य भव्यजीवस्य चरमोपि पुद्गलपरावर्तो युज्यत इत्याह-

**एवं चरमोऽवेसो नीईए जुज्जई इहरहा उ।**
**तत्तस्सहावखयवज्जिओ इमो किं न सव्वो वि?॥५॥**

**अक्षरगमनिका**—एवं चरमोऽप्येष नीत्या युज्यत इतरथा तु तत्तत्स्वभावक्षयवर्जितः अयमेव किं न सर्वोऽपि॥५॥

**टीका**—**एवमनन्तरोक्तप्रकारेण** प्रतिजीवं प्रायः अनन्ताः पुद्गलपरावर्ता भवन्ति अत एव

मुक्तिगमनयोग्यस्य भव्यजीवस्य **चरमोऽपि** अन्त्योऽप्येष पुद्गलपरावर्तो **नीत्या** युक्त्या **युज्यते** घटते। युक्तिमेवाह-**इतरथा** चरमपुद्गलपरावर्तानभ्युपगमे **तुर्विशेषे** **तत्तत्स्वभावक्षयवर्जित** औदारिकादितत्तत्पुद्गलग्रहण-स्वभावलक्षणसहजमलक्षयरूपभव्यत्वेन वर्जितो विरहितः **अयमेव** मुक्तात्मैव, **किं** प्रश्ने **न** नैव **सर्वोऽपि** निखिलोऽपि संसारिभव्यजीवराशिः ? अथवा तात्स्थ्यात्तद्व्यपदेश इतिन्यायात् तत्तत्स्वभावक्षयवर्जितः अयमेव चरमपुद्गलपरावर्तः, किं न सर्वोऽपि द्विचरमादिपुद्गलपरावर्तरूपो निखिलोऽपि कालः ? अयं भावः– चरमपुद्गलपरावर्तानभ्युपगमे जीवस्य सदैव पुद्गलग्रहणस्वभावः प्रसज्येत, तथा च मुक्तिवार्ताऽपि दुरापास्ता स्यात् न चैतद् दृष्टमिष्टं च ॥५॥ एतदेव स्पष्टयति–

**तत्तग्गहणसहावो आयगओ इत्थ सत्थगारेहिं।**
**सहजो मलु त्ति भण्णइ, भव्वतं तक्खओ एसो॥६॥**

**अक्षरगमनिका**—तत्तद्ग्रहणस्वभाव आत्मगतः अत्र शास्त्रकारैः सहजो मल इति भण्यते भव्यत्वं तत्क्षय एषः ॥६॥

**टीका—तत्तद्ग्रहणस्वभाव** औदारिकादितत्तत्पुद्गलादानप्रकृतिः **आत्मगतः** संसारिजीवगतः **अत्रा**ऽध्यात्मविचारे **शास्त्रकारै**स्तीर्थकृद्गणधरैः **सहजो**ऽनादित्वेन जीवसहभावित्वात् सज्ज्ञानादिगुणमलनाच्च **मल इतिर्नि**र्देशे **भण्यते** कथ्यते इति तथा **भव्यत्वम्** उक्तस्वरूपं **तत्क्षयः** सहजमलक्षयस्तात्स्थ्यात्तद्व्यपदेश इति **एष** चरमपरिवर्त एवेति ॥६॥ ततः किमित्याह—

**एयस्स परिक्खयओ तहा तहा हंत किंचि सेसम्मि।**
**जायइ चरिमो एसु त्ति तंतजुत्ती पमाणमिह॥७॥**

**अक्षरगमनिका**—एतस्य परिक्षयस्तथा तथा हन्त किञ्चिच्छेषे जायते चरम एष इति। तन्त्रयुक्तिः प्रमाणमिह ॥७॥

**टीका-एतस्य** सहजमलस्य **परिक्षयतो** बाहुल्येनापचयात् **तथा तथा** तेन तेन प्रकारेण कालादिसामग्रीं प्राप्य **हन्त** हर्षे **किञ्चिच्छेषे** स्वल्पावशिष्टे सति **जायते** प्रवर्तते **एष चरमः** पुद्गलपरावर्त **इतिः** समाप्तौ। **तन्त्रयुक्तीः** शास्त्रहेतू **प्रमाणम्** उक्तस्वरूपम् **इह** अस्मिन् चरमपुद्गलपरावर्तव्यतिकरे। युक्तिस्तु प्राग् लेशतो दर्शितैवेति ॥७॥ ततोऽपि किमित्याह-

**एयम्मि सहजमलभावविगमओ सुद्धधम्मसंपत्ती।**
**हेयेतरातिभावे जं न मुणइ अन्नहिं जीवो॥८॥**

**अक्षरगमनिका**—एतस्मिन् सहजमलभावविगमतः शुद्धधर्मसम्पत्तिर्भवति। हेयेतरादिभावान् यन्न मुणत्यन्येषु जीवः ॥८॥

**टीका—एतस्मिन्** चरमपुद्गलपरावर्ते **सहजमलभावविगमतः** तत्तत्पुद्गलग्रहणस्वभावापचयात् **शुद्धधर्मसम्पत्तिः** अनवद्यधर्मसम्प्राप्तिर्भवतीति शेषः। तत एव हेयोपादेयादिविवेकबुद्धिर्जीवस्य प्रादुर्भवति। एतदेव व्यतिरेकेणाह—**हेयेतरादिभावान्** हानोपादानोपेक्षायोग्यान् पदार्थान् **यद्** यस्माद् **न** नैव **मुणति** निश्चिनोति **अन्येषु** द्विचरमादिपरावर्तेषु **जीवः** संसारिसत्त्वः। एतदुक्तं भवति-यस्माद् द्विचरमादिपरावर्तेषु जीवो हेयोपादेयादिभावान् हेयोपादेयादिरूपेण ज्ञातुं न पारयति तस्मात् चरमपरावर्त एव सहजमलविगमाद्

हेयोपादेयादिविवेकलक्षणं शुद्धधर्मं प्राप्नोतीति ॥८॥ एनमेवार्थं दृष्टान्तपुरस्सरं समर्थयति-

**भमणकिरियाहियाए सत्तीए समन्निओ जहा बालो।**
**पासइ थिरे वि हु चले भावे जा धरइ सा सत्ती ॥९॥**

**अक्षरगमनिका**—भ्रमणक्रियाऽऽहितया शक्त्या समन्वितो यथा बालः पश्यति स्थिरानपि खलु चलान् भावान् यावत्तेन ध्रियते सा शक्तिः ॥९॥

**टीका—भ्रमणक्रियाऽऽहितया** भ्रमणक्रियया चक्राकारगत्याऽऽहिता उत्पादिता या शक्तिः सामर्थ्यं वासना वा तया **शक्त्या समन्वितो** युक्तो **यथा** निर्दर्शने **बालः** अव्यक्तवयास्तावत् **पश्यति** विलोकयति न केवलं चलान् **स्थिरानपि** अचलानपि भावान् **खलु** निश्चये **चलान्** अस्थिरानेव **भावान्** पदार्थान् **यावद**वधि तेन बालेन **ध्रियते** धार्यते **सा**ऽनन्तरोक्ता **शक्तिः** उक्तरूपेति ॥९॥ अथ दार्ष्टान्तिकमाह—

**तह संसारपरिब्भमणसत्तिजुत्तो वि नियमओ चेच।**
**हेए वि उवाएए ता पासइ जाव सा सत्ती ॥१०॥**

**अक्षरगमनिका**—तथा संसारपरिभ्रमणशक्तियुक्तोऽपि नियमत एव हेयानपि उपादेयान् तावत् पश्यति यावत् सा शक्तिः ॥१०॥

**टीका**—अनन्तरोक्तदृष्टान्ते यथा बालो विपर्यासमेति **तथा** तेन प्रकारेण **संसारपरिभ्रमणशक्तियुक्तोऽपि** भवभ्रमणहेतुभूतभावक्रिययाऽऽपादितशक्त्या समन्वितोऽपि संसारिसत्त्वः, आस्तां बाल इत्यपेरर्थः, **नियमत एव** अवश्यमेव न केवलमुपादेयान् **हेयानपि** हातुं योग्यानपि स्त्र्यादिभावान् **उपादेयान्** उपात्तुं योग्यान् **तावत्** कालावधि मिथ्यात्वादितीव्रपापाभिभूतत्वात् **पश्यति** विलोकयति **यावद**वधि **सा**ऽनन्तरोक्तरूपा **शक्ति**र्जीवेन ध्रियत इति ॥१०॥ अथ दृष्टान्तदार्ष्टान्तिकोभयविधशक्तिविगमे यत्स्यात्तदाह—

**जह तस्सत्तीविगमे पासइ पढमो थिरे थिरे चेव।**
**बीओ वि उवाएए तह तव्विगमे उवाएए ॥११॥**

**अक्षरगमनिका**—यथा तच्छक्तिविगमे पश्यति प्रथमः स्थिरान् स्थिरानेव द्वितीयोऽप्युपादेयान् तथा तद्विगम उपादेयान् ॥१॥

**टीका—यथा** येन प्रकारेण **तच्छक्तिविगमे** भ्रमणक्रियाऽऽहितशक्तिविगमे **पश्यति** विलोकयति **प्रथमो** बालः **स्थिरान्** अचलपदार्थान् **स्थिरानेव** अचलानेव **तथा** तेन प्रकारेण **द्वितीयोऽपि** संसारिजीवोऽपि **उपादेयान्** सम्यग्दर्शनादीन् **तद्विगमे** संसारपरिभ्रमणशक्तिविगमे पश्यति **उपादेयान्** उपात्तुं योग्यानेवेति ॥११॥ अधुना संसारपरिभ्रमणशक्तिविगमे कथञ्चित् कालस्य प्राधान्यं विरचयन्नाह—

**तस्सत्तीविगमो पुण जायइ कालेण चेव नियएण**
**तहभव्वत्ताइतदन्नहेउकलिएण व कहिंचि ॥१२॥**

**अक्षरगमनिका**—तच्छक्तिविगमः पुनर्जायते कालेनैव नियतेन तथाभव्यत्वादितदन्यहेतुकलितेन च कथञ्चित् ॥१२॥

**टीका—तच्छक्तिविगमः** संसारपरिभ्रमणशक्तिह्रासः **पुनर्**विशेषे **जायते** भवति **कालेनैव** सहकारिणा

**नियतेन** चरमावर्तलक्षणेन, पुनः कथम्भूतेन? **तथाभव्यत्वादितदन्यहेतुकलितेन** प्राकृतत्वेन पदव्यत्ययात् तदन्यैः कालव्यतिरिक्तैस्तथाभव्यत्वनियतिपूर्वकृतकर्मादिहेतुभिः **कलितेन** युक्तेन **चो** विशेषे **कथञ्चिद्** न सर्वथा कालेनैव, कार्यस्य सामग्रीसाध्यत्वात्, मृद इव घटपरिणतेश्चक्रचीवरादिसामग्रीसाध्यत्वादिति ॥१२॥ ततः किमित्याह–

**इय पाहन्नं नेयं इत्थ कालस्स तओ तओ चेव।**
**तस्सत्तिविगमहेऊ सा वि जओ तस्सहाव त्ति॥१३॥**

**अक्षरगमनिका**–इति प्राधान्यं ज्ञेयमत्र कालस्य ततस्तक एव तच्छक्तिविगमहेतुः सापि यतस्तत्स्वभावेति ॥१३॥

**इति** अनन्तरोक्तरीत्या **प्राधान्यं** विशिष्टत्वं **ज्ञेयं** बोद्धव्यम् **अत्र** संसारपरिभ्रमणशक्तिविगमे **कालस्य** चरमावर्तलक्षणस्य, **ततस्तस्मात्** **तकः** स चरमावर्तकाल **एव तच्छक्तिविगमहेतुः** भवभ्रमणशक्तिह्रासहेतुरित्यनेन द्विचरमावर्तादेस्तन्नाशहेतुताव्यवच्छेदः अवसेयः। 'तत्तओ चेव' इति पाठान्तरमाश्रित्यानन्तरोक्तरीत्या तत्त्वतः परमार्थतः कालस्य प्राधान्यं ज्ञेयम्। एवमेव **सापि** संसारपरिभ्रमणशक्तिरपि **यतः** यस्मात् **तत्स्वभावा** चरमावर्तकालं प्राप्य विगमस्वभावा, तस्मात् कारणात् चरमावर्तकाल एव संसारपरिभ्रमणशक्तिविगमहेतुरिति यदुक्तं तद्युक्तमेव, परस्परं नाश्यनाशकस्वभावविरहे संसारपरिभ्रमणशक्तिविगमाभावाद् मोक्षाभावः प्रसज्येत। **इतिः** समाप्तौ ॥१३॥ नन्वेवमुभयोस्तत्स्वभावत्वे नाशोपपत्तेः स्वभाववाद एव श्रेयानिति चेत्, न, सामग्र्या एव कार्यसाधकत्वादिति सामग्रीं निरूपयन् समुदयवादमाह

**कालो सहाव नियई पुव्वकयं पुरिस कारणेगंता।**
**मिच्छत्तं; ते चेव उ समासओ हुंति सम्मत्तं॥१४॥**

**अक्षरगमनिका**—कालः स्वभावो नियतिः पूर्वकृतं पुरुषः कारणमेकान्ताद् मिथ्यात्वम्, ते एव तु समासतो भवन्ति सम्यक्त्वम् ॥१४॥

**टीका—काल** एवैकः सर्वस्यास्य जगतः कारणं तथा **स्वभाव** एव **नियतिरेव पूर्वकृतमेव पुरुषकार** एव **कारणमेकान्ताद्** अपरनिरपेक्षतया कालादीनां कारणत्वेनाऽभ्युपगमाद् **मिथ्यात्वं** मिथ्यावादः। **त एव** कालादय एव **तुर्विशेषे समासतः** परस्पराजहद्वृत्तयः कारणतयाऽभ्युपगम्यमाना **भवन्ति सम्यक्त्वं** प्रतिपद्यन्ते सम्यक्त्वरूपताम्। एतदुक्तं भवति–कालादिप्रत्येकैकान्तकारणरूपो मिथ्यावादस्तथा परस्परसव्यपेक्षकालादिकारणरूपः सम्यग्वादः। अत्र बहुवक्तव्यं तत्तु सम्मत्यादिग्रन्थतोऽवसेयमिति ॥१४॥ अत्रार्थे ज्ञातमाह—

**नायमिह मुग्गपत्ती समयपसिद्धा वि भावियव्वं त्ति।**
**सव्वेसु विसिट्ठत्तं इयरेयरभावसाविक्खं॥१५॥**

**अक्षरगमनिका**—ज्ञातमिह मुद्गपक्तिः समयप्रसिद्धाऽपि भावयितव्येति सर्वेषु विशिष्टत्वमितरेतरभावसापेक्षम् ॥१५॥

**टीका—ज्ञातं** दृष्टान्त **इह**–कारणसमुदयवादे **मुद्गपक्तिः** मुद्गो धान्यविशेषस्तस्य पक्तिः पाकः सा च मुद्गतद्गतपाकानुकूलस्वभावकालनियतिभोक्तृभाग्यपाचकपाकानुकूलक्रियास्थालीजलज्वलनादिकारणसामग्रीसाध्या **समयप्रसिद्धाऽपि** आगमप्रसिद्धाऽपि **भावयितव्या** सूक्ष्मेक्षिकया विचारणीया **इति** हेतोः **सर्वेषु** कारणेषु **विशिष्टत्वं**

प्राधान्यम् **इतरेतरभावसापेक्षं** पारस्पर्येण सापेक्षमवगन्तव्यमिति ॥१५॥ एतदेव प्रस्तुते योजयति—

**तहभव्वत्तकृखित्तो जह कालो तह इमं ति तेणं ति।**

**इय अन्नुन्नाविक्खं रूवं सव्वेसि हेऊण ॥१६॥**

**अक्षरगमनिका**—तथाभव्यत्वाक्षिप्तो यथा कालस्तथैतदपि तेनेति। एवमन्योन्यापेक्षं रूपं सर्वेषां हेतूनाम् ॥१६॥

**टीका—तथाभव्यत्वाक्षिप्त** उक्तस्वरूपतथाभव्यत्वेन सन्निहितकृतो **यथा** येन प्रकारेण **काल** उक्तलक्षणस्**तथा** तेन प्रकारेण **एतदपि** तथाभव्यत्वमपि **तेन** कालेन सन्निहितकृतम् **इति** हेतोः, **एवम्** उक्तप्रकारेण **अन्योन्यापेक्षं** परस्परसापेक्षं **रूपं** स्वरूपं **सर्वेषां** समस्तानां **हेतूनां** कारणानामिति ॥१६॥ किमिति सर्वेषां भव्यात्मनां भव्यत्वं कालादिसर्वहेतुभिस्तुल्यं न भवतीति चेदाह—

**न य सव्वेहेउतुल्लं भव्वत्तं हंदि सव्वजीवाणं।**

**जं तेणेवक्खित्ता तो तुल्ला दंसणाईया ॥१७॥**

**अक्षरगमनिका**—न च सर्वहेतुतुल्यं भव्यत्वं हन्त सर्वजीवानां यत्तेनाक्षिप्तास्ततस्तुल्या दर्शनादिकाः प्रसज्येरन् ॥१७॥

**टीका—न** नैव **चो** विशेषे **सर्वहेतुतुल्यं** सर्वे कालादिहेतवस्तुल्या यस्य तत्तथा **भव्यत्वम्** उक्तस्वरूपं **हन्त** विषादे **सर्वजीवानां** निखिलभव्यासुमतामस्ति, **यत्** यस्मात् कारणात् **तेनाक्षिप्ता** भव्यत्वेन सन्निहितकृतास्**ततस्**तस्मात् सर्वजीवानां **तुल्याः** कालादिना युगपत् **दर्शनादिकाः** सम्यग्दर्शनचारित्रादयः प्रसज्येरन्। अयं भावः—यदि कालादिसर्वहेतुतुल्यं भव्यत्वं सर्वभव्यसत्त्वानां भवेत्तर्हि तेन भव्यत्वेनाक्षिप्ताः सम्यग्दर्शनचारित्रादिसर्वभावाः सर्वेषां युगपत् तुल्याश्च स्युः। न चैतत् दृष्टमिष्टं च। तस्मात् सर्वहेतुतुल्यं भव्यत्वं सर्वेषां न भवतीति समवसेयम् ॥१७॥ एतदेवाभ्युच्चयति

**न इमो इमेसि हेऊ, न य णातुल्ला इमे ण एयं पि।**

**एएसि तहा हेऊ ता तहभावं इमं नेयं ॥१८॥**

**अक्षरगमनिका**—न चायमेतेषां हेतुः। न च नातुल्या इमे। नैतदप्येतेषां तथा हेतुस्ततस्तथाभावमिदं ज्ञेयम् ॥१८॥

**टीका—न** नैव **अयं** काल **एतेषां** सम्यग्दर्शनादीनाम् एकान्तेन **हेतुः** कारणम्। **न** नैव **चः** समुच्चये **न** नैव **अतुल्या** असमानकालादिका **इमे** सम्यग्दर्शनादयः, अपि त्वतुल्या एव। **न** नैव **एतदपि** भव्यत्वमपि सर्वेषां नातुल्यम्, अपि त्वतुल्यमेवेत्यनुवृत्तेः। किञ्च एतद् भव्यत्वमपि न **एतेषां** सम्यग्दर्शनादीनां **तथा** केवलमपरनिरपेक्षतया **हेतुः** कारणम्। **ततस्**तस्मात् **तथाभावं** तत्तत्कालादिसामग्रीं प्राप्य सम्यग्दर्शनादीनां प्रति हेतुस्वभावम् **इदं** भव्यत्वं भव्यजीवानां **ज्ञेयं** बोद्धव्यम् ॥१८॥ प्रस्तुततमुपसंहरन्नाह—

**अचरिमपरियट्टेसुं कालो भवबालकालमो भणिओ।**

**चरिमो उ धम्मजुव्वणकालो तहचित्तभेओ त्ति ॥१९॥**

**अक्षरगमनिका**—अचरमपरिवर्तेषु कालो भवबालकालो भणितः। चरमस्तु धर्मयौवनकालस्तथाचित्रभेद इति ॥१९॥

**टीका—अचरमपरिवर्तेषु** द्विचरमादिपुद्गलपरावर्तेषु **कालः** समयावलिकादिलक्षणो **भवबालकालो** भवस्य यदि वा मञ्चाः क्रोशन्तीति न्यायाद् भवस्थजीवस्य, कथम्भूतस्य? बालः अज्ञः अव्यक्तवया वा तस्य कालो बालकाल आत्मानं प्रकृत्यसुन्दरास्थिरविषयरागादिजन्यकर्मरजोभिर्गुण्डनाद् धर्मपुरुषार्थवैकल्याच्च **भणितः** कथितस्तीर्थकरगणधरादिभिः। **चरमः** पश्चिमपुद्गलपरावर्तस्तुर्विशेषे **धर्मयौवनकालो** धर्मस्य सम्यग्दर्शनादि-रूपस्य यदि वा धर्मधर्मिणोः कथञ्चिदभेदाद् धर्मिसत्त्वस्य, यूनो भावो यौवनं तस्य कालो यौवनकालः पुरुषार्थकालो बालधूलिक्रीडातुल्यनिखिलभवचेष्टाजुगुप्सया मुक्तिमहिलामिलनमनोरथतः सम्यग्दर्शनादिविषय पुरुषार्थकरणाद् भणित इत्यनुवृत्तेः। ननु चरमपुद्गलपरावर्ते वर्तमानानां सर्वसत्त्वानां धर्मयौवनकालस्तुल्य उतान्यथापीत्याशङ्कायामाह—**तथाचित्रभेदः** अपुनर्बन्धकसम्यग्दर्शनदेशसर्वविरत्यादिभेदाद् बहुविधः। तथोत्कर्ष-प्राप्तयौवनकालस्तु क्षपकश्रेण्यां ज्ञेय **इतिः** समाप्तौ ॥१९॥

प्रस्तुतविंशिकानिष्कर्षमाह—

**एयम्मि धम्मरागो जायइ भव्वस्स तस्सभावाओ।**
**इतो य कीरमाणो होइ इमो हंत सुट्ठु त्ति ॥२०॥**

इति चरमपरिवर्तविंशिका चतुर्थी ॥४॥

**अक्षरगमनिका—**एतस्मिन् धर्मरागो जायते भव्यस्य तत्स्वभावात्। इतश्च क्रियमाणो भवत्ययं हन्त सुष्ठ्विति ॥२०॥

**टीका—एतस्मिन्** चरमपरिवर्ते **धर्मरागो** दयादानादिधर्मस्पृहारूपो **जायते** प्रादुर्भवति **भव्यस्य** उक्तस्वरूपस्य **तत्स्वभावाद्** भव्यसत्त्वप्रकृतेः। **इतो** धर्मरागात् **चो** विशेषे **क्रियमाणः** अनुष्ठीयमानो **भवति** जायते **अयं** धर्मो **हन्त** हर्षे **सुष्ठु** शोभन **इतिः** समाप्तौ। 'सुद्ध त्ति' पाठान्तरमाश्रित्य त्रिधा शुद्धः अनवद्यो जायत इति ॥२०॥

# पञ्चमी बीजादिविंशिका

अनन्तरविंशिकायां त्रिधा शुद्धधर्मश्चरमपरिवर्ते प्रादुर्भवतीत्युक्तम्। स च धर्मः कल्पवृक्ष इव सर्वाभीष्टदायी बीजादिक्रमेण जायत इत्यत्रोच्यते—

**बीजाइकमेण पुणो जायइ एसुत्थ भव्वसत्ताणं।**
**नियमा, ण अन्नहा वि हु इट्ठफलो कप्परुक्खु व्व ॥१॥**

**अक्षरगमनिका—**बीजादिक्रमेण पुनर्जायते एषोऽत्र भव्यसत्त्वानां नियमात् कल्पवृक्ष इव इष्टफलः खलु नान्यथापि ॥१॥

**टीका—बीजादिक्रमेणैव** बीजाङ्कुरादिपरम्परयैव **पुनरवधारणे जायते** प्रादुर्भवति **एष** शुद्धधर्मः **अत्र** चरमपरावर्ते **भव्यसत्त्वानां** मुक्तिगमनयोग्यजीवानां **नियमाद्** अवश्यंतया **कल्पवृक्षः** सुरद्रुम **इव** सादृश्ये **इष्टफलः** सर्वाभीष्टदाय्येव **खलुरवधारणे। नान्यथापि** बीजादिक्रमविरहे कुतश्चिन्निमित्तात् प्राप्तोऽपि धर्मो न सिद्धिदायी भवतीति ॥१॥ अथ धर्मकल्पतरुबीजादीन्निरूपयति—

मार्गदर्शक :- आचार्य श्री सुविहितसागर जी महाराज

**बीजं विमस्स णेयं दट्ठूणं एयकारिणो जीवे।**

**बहुमाणसंगयाए सुद्धपसंसाई करणिच्छा॥२॥**

**अक्षरगमनिका**—बीजमप्यस्य ज्ञेयं दृष्ट्वैतत्कारिणो जीवान् बहुमानसंगतया शुद्धप्रशंसया करणेच्छा॥२॥

**टीका**—न धर्ममात्रं **बीजमपि** मूलकारणमपि **अस्य** शुद्धधर्मस्य **ज्ञेयं** बोद्धव्यम् करणेच्छेति संबन्धः, **दृष्ट्वा** विलोक्य **एतत्कारिणो** दानादिधर्मानुष्ठानकर्तॄन् **जीवान्** धर्मिसत्त्वान् **बहुमानसंगतया** पूर्वोक्तस्वरूप-बहुमानसमन्वितया **शुद्धप्रशंसया** निर्व्याजश्लाघया यथा-अहो सुलब्धजन्मान एते यदित्थं मुक्तहस्ता दानं वितरन्ति, वयं पुनरधन्यानामधन्या धनाकाङ्क्षया केवलं क्लेशभाज इदृशया श्लाघया करणभूतया **करणेच्छा** दानादिधर्मानुष्ठानकरणस्पृहा। धर्मबीजानि चैवं योगदृष्टिसमुच्चये दृश्यन्ते—

जिनेषु कुशलं चित्तं, तन्नमस्कार एव च। प्रणामादि च संशुद्धं, योगबीजमनुत्तमम्॥१॥

आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु। वैयावृत्त्यं च विधिवच्छुद्धाशयविशेषतः॥२॥

भवोद्वेगश्च सहजो, द्रव्याभिग्रहपालनम्। तथा सिद्धान्तमाश्रित्य विधिना लेखनादि॥३॥

इत्यादीनि॥२॥ अथास्यैव धर्मकल्पवृक्षस्याङ्कूरकाष्ठ आह—

**तीए चेवऽणुबंधो अकलंको अंकुरो इहं नेओ।**

**कट्ठं पुण विन्नेया तदुवायन्नेसणा चित्ता॥३॥**

**अक्षरगमनिका**—तस्या एवानुबन्धः अकलङ्कः अङ्कुर इह ज्ञेयः। काष्ठं पुनर्विज्ञेया तदुपायान्वेषणा चित्रा॥३॥

**टीका**—**तस्या एव** दानादिधर्मकरणेच्छाया एव **अनुबन्धः** अनुवर्तनम् **अकलङ्कः** अनवद्यः **अङ्कुरः** प्ररोह **इह** धर्मबीजादिविचारे **ज्ञेयो** बोद्धव्यः। **काष्ठं** स्कन्धः **पुनः** समुच्चये **विज्ञेया** समवसेया **तदुपायान्वेषणा** धर्मसाधनभूतसद्गुर्वादिगवेषणा **चित्रा** बहुविधेति॥३॥

साम्प्रतं धर्मसुरद्रोः पत्रादीन्याह—

**पवित्ती य तहा चित्ता पत्ताइसरिसिगा होइ।**

**तस्संपत्ती पुप्फं गुरुसंजोगाइरूवं तु॥४॥**

**अक्षरगमनिका**—तेषु प्रवृत्तिश्च तथा चित्रा पत्रादिसदृशिका भवति। तत्सम्पत्तिः पुष्पं गुरुसंयोगादिरूपं तु॥४॥

**टीका**—तेषु धर्मोपायगवेषणारूपेषु **प्रवृत्तिः** प्रवर्तनं **चः** समुच्चये **तथाचित्रा** क्षयोपशमवैचित्र्याद् विविधप्रकारा **पत्रादिसदृशिका** दलस्तबकादितुल्या **भवति** जायते। **तत्सम्पत्तिः** धर्मोपायप्राप्तिः **पुष्पं** कुसुमं **गुरुसंयोगादिरूपं** भवकोटिदुर्लभसद्गुरुसंयोगः, आदिपदात् तद्गतगुणबहुमानान्वितवन्दनवैयावृत्त्यादिलक्षणमेव विज्ञेयमिति शेषस्तुरवधारणे॥४॥ अधुना धर्मकल्पशाखिफलमाह—

**तत्तो सुदेसणाईहिं होइ जा भावधम्मसंपत्ती।**

**तं फलमिह विन्नेयं परमफलपसाहगं नियमा॥५॥**

**अक्षरगमनिका**—ततः सुदेशनादिभिर्भवति या भावधर्मसम्पत्तिः तत् फलमिह विज्ञेयं परमफलसाधकं नियमात् ॥५॥

**टीका—ततः** सद्गुविदः सकाशात् **सुदेशनादिभि**स्तत्त्वोपदेशश्रवणमननादिभि**र्भवति** जायते **या**ऽनिर्दिष्टनामा **भावधर्मसम्पत्तिः** सम्यग्दर्शनादिलक्षणतात्त्विकधर्मसम्प्राप्ति**स्तत्** वक्ष्यमाणं **फलं** सद्गुरुयोगादिहेतुतः प्राप्यम् **इह** धर्मकल्पवृक्षबीजादिप्रस्तावे **विज्ञेयम्** अवगन्तव्यं **परमफलसाधकं** मोक्षलक्षणश्रेष्ठफलसाधकं **नियमाद्** अवन्ध्यहेतुभावात् अवश्यंतयेति ॥५॥ आस्तामचरमावर्तेषु धर्मकल्पद्रुमस्य पत्रादिप्राप्तिः सत्त्वानां बीजप्राप्तिरपि चरमावर्त एव जायत इति हेतुपुरःसरं दर्शयति—

**बीजस्य वि संपत्ती जायइ चरिमंमि चेव परियट्टे।**
**अच्चंतसुंदरा जं एसा वि तओ न सेसेसु ॥६॥**

**अक्षरगमनिका**—बीजस्यापि सम्पत्तिर्जायते चरम एव परिवर्ते। यदेषाप्यत्यन्तसुन्दरा ततो न शेषेसु ॥६॥

आस्तां पत्रादिफलपर्यन्तस्य **बीजस्यापि** उक्तस्वरूपस्यापि **सम्पत्तिः** सम्प्राप्ति**र्जायते** भवति **चरम एव परिवर्ते** पश्चिमपुद्गलपरावर्त नान्यत्र एव। कस्मादेवमित्याह—**यद्** यस्मात् कारणाद् **एषापि** बीजप्राप्तिरपि **अत्यन्तसुन्दरा** अतीवशोभनाऽनादिकालीनतीव्रमोहहेतुकगुणगुणिद्वेषापगमाद् ईषद्रागाविर्भावाद्वा **ततः** तस्मा**न्न** नैव **शेषेषु** द्विचरमादिपुद्गलपरावर्तेष्विति ॥६॥

अथ चरमावर्ते प्रविष्टस्यापि जीवस्यानादिप्रमादादिहेतुकः अनन्तसंसारो न दुर्घट इत्याह—

**न य एयम्मि अणंतो जुज्जइ नेयस्स नाम कालु त्ति।**
**ओसप्पिणी अणंता हुंति जओ एगपरियट्टे ॥७॥**

**अक्षरगमनिका**—न चैतस्मिन् नैतस्य युज्यतेऽनन्तो नाम काल इति, यत एकपरिवर्तेऽनन्ता अवसर्पिण्यो भवन्ति ॥७॥

**टीका—न** नैव **चः** अभ्युच्चये **एतस्मिन्** चरमपुद्गलपरावर्ते प्रविष्टस्य **एतस्य** भव्यसत्त्वस्य **न** नैव **युज्यते** घटते, अपि तु युज्यत एव **अनन्तः** अनन्तकसंख्येयो **नाम** संभावनायां **काल**श्चतुर्गतिसंसारपरिभ्रमणलक्षण **इतिः** पूरणे। अत्र हेतुमाह—**यतो** यस्मात् कारणाद् **एकपरिवर्ते** एकैकस्मिन् पुद्गलपरावर्ते**ऽनन्ता** अनन्त-संख्येयका **अवसर्पिण्यः** प्रवचनप्रतीताः प्रत्येकं दशकोटाकोटिसागरोपमकालमाना उपलक्षणाद् **अनन्ता** उत्सर्पिण्यश्च **भवन्ति** जायन्त इति ॥७॥ ननु किमेतानि बीजादीनि निरन्तराणि जायन्त उत सान्तराणीत्याशङ्कायामाह—

**बीजाइया य एए तहा तहा संतरेयरा नेया।**
**तहभव्वत्तक्खित्ता एगंतसहावऽबाहाए ॥८॥**

**अक्षरगमनिका**—बीजादिकाश्चैते तथा तथा सान्तरेतरा ज्ञेयास्तथाभव्यत्वाक्षिप्ता एकान्त-स्वभावाऽबाधया ॥८॥

**एते बीजादिका** अनन्तरोक्ता बीजाङ्कुरादय**श्चः** समुच्चये भिन्नक्रम**श्च तथा तथा** तेन तेन प्रकारेण **सान्तराः** कालकृतव्यवधाना भगवन्महावीरजीवनयसारस्येव **इतरा** निरन्तराश्च कालाव्यवहिता मरुदेव्या इव

**ज्ञेयाः** समवसेया यत्तदोर्नित्यसम्बन्धाद् यथा यथा **तथाभव्यत्वाक्षिप्ता** उक्तस्वरूपेण तथाभव्यत्वेन सन्निहितकृता **एकान्तस्वभावाऽबाधया** एकान्तस्वभाववादाविरोधेन। एकान्तस्वभाववादलक्षणमिदम्—

कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च।
स्वभावतः सर्वमिदं प्रवृत्तं; न कामचारोऽस्ति कुतः प्रयत्नः ? ॥१॥

एवम्भूतैकान्तस्वभाववादात् सकाशादविरोधेन, तथाहि—भव्यत्वस्यैकान्तैकस्वभावत्वाभ्युपगमे देशकालादिभेदेन बीजादिप्राप्तिरूपस्य तत्फलस्य च तीर्थकरगणधरादिलक्षणस्य वैचित्र्यं न स्यात् परं देशकालादिनैकरूपता स्यात् तीर्थकरगणधरादिलक्षणफलभेदोऽपि न स्यात्। उपलभ्यते च वैचित्र्यं चित्रसंसारं संसृत्य श्रीऋषभमहावीरगौतमादीनां सिद्धिगमनस्य। तस्मादेकान्तस्वभावाऽबाधया तथास्वभावलक्षणेन तथाभव्यत्वेनाक्षिप्ता एते बीजादयः सान्तरा निरन्तराश्च ज्ञेया इति॥८॥ यथा तथास्वभावलक्षणेन तथाभव्यत्वेनाक्षिप्ता बीजादयः कालादिवैचित्र्यभाजो भवन्ति तथा कालादिसव्यपेक्षं तथाभव्यत्वमपि स्यादित्याह—

**तहभव्वत्तं जं कालनियइपुव्वकयपुरिसकिरियाओ।**
**अक्खिवइ तहसहावं ता तदधीणं तयं पि भवे॥६॥**

**अक्षरगमनिका**—यत् तथास्वभावं तथाभव्यत्वं कालनियतिपूर्वकृतपुरुषक्रिया आक्षिपति तस्मात्तदधीनं तदपि भवेत् ॥६॥

**टीका—यद्** यस्मात् कारणात् **तथास्वभावं** यथा परस्परभिन्नपर्यायप्राप्तिहेतुः स्यात्तथा स्वभावो यस्य तत्तथैतत् **तथाभव्यत्वं** पूर्वोक्तस्वरूपं **कालनियतिपूर्वकृतपुरुषक्रियाः** प्रतीतास्ता **आक्षिपति** सन्निहिततामापादयति **तस्मात्** कारणात् **तदधीनं** कालनियतिपूर्वकृतादिवशं **तकमपि** तथाभव्यत्वमपि **भवेत्** परस्परसापेक्ष्यात् स्यादेवेति॥६॥ परस्परसापेक्षभावाभ्युपगमे नियतिदैवपुरुषकारा अपि न विरुध्यन्त इत्याह—

**एवं जेणेव जहा होयव्वं तं तहेव होइ त्ति।**
**न य दिव्वपुरिसगारा वि हंदि एवं विरुज्झंति॥१०॥**

**अक्षरगमनिका**—एवं येनैव यथा भवितव्यं तत्तथैव भवतीति न च दैवपुरुषकारावपि हन्तैवं विरुध्येते॥१०॥

**टीका—एवं** परस्परसापेक्षभावाभ्युपगमे **येनैव यथा भवितव्यम्** उपलक्षणाद् यस्य यदा यत्रादिग्रह**स्तत्तथैव** तस्य तदा तत्र ततो निमित्ताद् **भवति** जायते **इति**लक्षणा नियतिर्न विरुध्यते। न केवलं नियति**र्दैवपुरुषकारावपि हन्त** हर्षे **एवं** परस्परसव्यपेक्षभावेऽभ्युपगते **न** नैव **चो**ऽवधारणे **विरुध्येते**–बाध्येत इति॥१०॥ अथ दैवपुरुषकारा आश्रित्याह—

**जो दिव्वेणक्खित्तो तहा तहा हंत पुरिसगारो त्ति।**
**तत्तो फलमुभयजमवि भण्णइ खलु परिसगाराओ॥११॥**

**अक्षरगमनिका**—यो दैवेनाक्षिप्तस्तथा तथा हन्त पुरुषकार इति ततः फलमुभयजमपि भण्यते खलु पुरुषकारात्॥११॥

**यो**ऽनिर्दिष्टनामा यत्तदोर्नित्यसम्बन्धाद् यथा यथा **दैवेन** पूर्वकृतकर्मणा **आक्षिप्त** आपादितसन्निधिस्**तथा तथा** तेन तेन प्रकारेण **हन्त** आमन्त्रणे स **पुरुषकारः** पुरुषव्यापारो भवतीति शेष **इति**र्हेतौ यस्मात् कारणात्,

**ततस्तस्मात्** कारणात् **फलं** पुरुषार्थसिद्धिरूपम् **उभयजमपि** न केवलं पुरुषकारजन्यं परं दैवपुरुषकारद्वयजन्यं तथापि पुरुषार्थप्राधान्याद् व्यवहारनयाभिप्रायेण **भण्यते** कथ्यते **खलुरवधारणे** **पुरुषकारात्**—पुरुषव्यापारादेवेति ॥११॥ किञ्च—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**एएण मीसपरिणामिए उ जं तम्मि तं च दुगजण्णं।**
**दिव्वाउ नवरि भण्णइ, निच्छयओ उभयजं सव्वं॥१२॥**

**अक्षरगमनिका**—एतेन यद् मिश्रपरिणामितेऽपि तस्मिन् तद् द्विकजन्यं तथापि भण्यते केवलं दैवात्, निश्चयत उभयजं सर्वम् ॥१२॥

**एतेन** अनन्तरोक्तेन, तथाहि—यथा यथा दैवेनाक्षिप्तस्तथा तथा पुरुषकारो भवति, एवमेव यथा यथा पुरुषकारेणाक्षिप्तं तथा तथा दैवं भवतीति तत्त्वेन **यद्** यस्मात् कारणाद् **मिश्रपरिणामिते** दैवपुरुषकारोभयोपढौकित एव **तुरवधारणे** **तस्मिन्** फले, यत्तदोर्नित्यसम्बन्धात् तस्मात् **तत्** फलं **चो**ऽवधारणे **द्विकजन्यं** दैवपुरुषकारोभयजमेव तथापि स्वल्पपुरुषव्यापाराद् व्यवहारनयाभिप्रायेण **भण्यते** कथ्यते **नवरि** प्राकृतत्वादवधारणे **दैवात्** पूर्वकृतकर्मसकाशादेव। **निश्चयतः** परमार्थत **उभयजं** दैवपुरुषाकारद्वयजन्यं **सर्वं** निखिलं फलरूपम्। अयं भावः—दैवपुरुषकारौ द्वावप्येतौ फलहेतुतया प्रतिपन्नप्रधानोपसर्जनभावौ कार्यकरणक्षमौ सम्पद्येतेऽत एव परस्परसव्यपेक्षौ बोद्धव्याविति ॥१२॥ अनन्तरोक्तानभ्युपगमे यत् स्यात्तदाह—

**इहराऽणक्खित्तो सो होइ त्ति अहेउओ निओएणं।**
**इत्तो तदपरिणामो किंचि तम्मत्तज्जं न तया॥१३॥**

**अक्षरगमनिका**—इतरथाऽनाक्षिप्तः स भवतीत्यहेतुको नियोगेन, इतस्तदपरिणामस्तदा, परं न किञ्चित्तन्मात्रजम् ॥१३॥

**टीका**—**इतरथा** फलस्योभयजन्यत्वानभ्युपगमे यत्स्यात्तदाह—**अनाक्षिप्तः** दैवेनानाक्षिप्त **स** पुरुषार्थो **भवति** जायते **इति** हेतोः **अहेतुको** निष्कारणः स पुरुषार्थो **नियोगेना**वश्यंतयाऽऽपद्येत। किञ्च—**इतः** अस्माद् दैवेनानाक्षिप्तात् पुरुषकाराद् यदि किञ्चित्फलविशेषो जायेत **तदा** तर्हि स **तदपरिणामो** दैवाऽजन्यः स्यात्। परं न चैवं भवतीत्याह—**न** नैव **किञ्चित्** किमपि फलं **तन्मात्रजं** पुरुषकारमात्रजन्यं भवतीति ॥१३॥ साम्प्रतं दैवपुरुषकारयोः पारमार्थिकं स्वरूपं निरूपयन्नाह—

**पुव्वकयं कम्मं चिय चित्तिविवागमिह भन्नई दिव्वो।**
**कालाइएहिं तप्पायणं तु तह पुरिसगारु त्ति॥१४॥**

**अक्षरगमनिका**—पूर्वकृतं कर्मैव चित्रविपाकमिह भण्यते दैवम्, कालादिकैस्तत्पाचनं तु तथा पुरुषकार इति ॥१४॥

**टीका**—**पूर्वकृतं** प्राग्विहितं **कर्मैव** क्रियारूपमेव **चित्रविपाकं** विविधफललाभम् **इह** दैवपुरुषकारस्वरूपविचारे **भण्यते** कथ्यते तीर्थकरगणधरै**र्दैवम्** भाग्यम्। **कालादिकैः** कालद्रव्यक्षेत्रादिभि**स्तत्पाचनं** दैवस्य फलोपधानमेव **तुरवधारणे** **तथा** समुच्चये **पुरुषकारः** पुरुषव्यापार **इतिः** निर्देशे भण्यत इति ॥१४॥ एवं दैवपुरुषकारयोः स्वरूपं निश्चयत उक्तम्। अधुना व्यवहारतः स्वरूपं निरूपयन् प्रकृते च योजयन्नाह—

**इय समयनीइजोगा इयरेयरसंगया उ जुज्जंति।**
**इहं दिव्वपुरिसगारा पहाणगुणभावओ दोवि ॥१५॥**

**अक्षरगमनिका**—इति समयनीतियोगादितरेतरसंगतौ तु युज्येत इह दैवपुरुषकारौ प्रधानगौणभावतो द्वावपि ॥१५॥

**टीका**—**इति** उक्तप्रकारेण **समयनीतियोगाद्** आगमयुक्तिसंगत्या **इतरेतरसंगतौ** परस्परविहितोपष्टम्भा एव **तुरवधारणे** **युज्येते** घटेते **इह** बीजादिप्राप्तौ व्यवहारनयमते वा **दैवपुरुषकारौ** उक्तस्वरुपौ **प्रधानगौणभावतो** मुख्योपसर्जनीभावात् **द्वावपि** एतौ। एतदुक्तं भवति-यतो भवस्थजीवस्य दैवं विना न पुरुषकारसम्भवो न च पुरुषकारविकलस्य दैवस्य फलम्, उक्तं च—न भवस्थस्य यत्कर्म, विना व्यापारसम्भवः। न च व्यापारशून्यस्य, फलं यत्कर्मणोपि हि ॥१॥ ततो यत्र पुरुषकारः प्रधानभावेन प्रयुज्यते तत् फलं पुरुषकारेणेति व्यवह्रियते। यत्र च पुरुषकारः स्वल्प एव प्रयुज्यते तद् दैवेनेति ॥१५॥ एतौ दैवपुरुषकारौ यद्यपि तुल्यबलौ तथाप्यचरमावर्तेषु औदयिकभावनिरोधलक्षणः पुरुषकारो दैवेन बाध्यते। चरमावर्ते तु दैवमुक्तलक्षणेन पुरुषकारेण बाध्यतेऽत आह—

**ता बीजपुव्वकालो नेओ भवबालकाल एवेह।**
**इयरो उ धम्मजुव्वणकालो विह लिंगगम्मु त्ति ॥१६॥**

**अक्षरगमनिका**—तस्माद् बीजपूर्वकालो ज्ञेयो भवबालकाल एवेह। इतरस्तु धर्मयौवनकालोपीह लिङ्गगम्य इति ॥१६॥

**टीका**—यस्मात् कारणात् कालविशेषं प्राप्य दैवपुरुषकारौ परस्परं बाध्यबाधकौ जायेते **तस्मात्** कारणाद् **बीजपूर्वकालो** धर्मकल्पवृक्षस्य बीजाधानात् प्राक्तनःकालो **ज्ञेयो** बोद्धव्यो **भवबालकाल एव** उक्तस्वरूप एव **इह** संसारे। यतः अचरमावर्तेषु दैवमेव विजृम्भत औदयिकभावस्य प्राधान्यात्। **इतरो** बीजाधानादूर्ध्वं तुर्विशेषे **धर्मयौवनकालः** पूर्ववर्णितस्वरूपो ज्ञेय औदयिकभावनिरोधेनात्मवीर्यलक्षणपुरुषकारस्य प्रवर्तनात्। न केवलं भवबालकाल एष धर्मयौवनकालोऽपि **इह** मौनीन्द्रप्रवचने **लिङ्गगम्यो** बहुमानसंगतशुद्धप्रशंसादि-चिह्नलक्ष्यः। लिङ्गानि चैवं शास्त्रान्तरे प्रतिपादितानि दृश्यन्ते—पावं ण तिव्वभावा कुणइ, ण बहुमण्णई भवं घोरं। उचियट्ठिइं च सेवइ; सव्वत्थवि अपुणबंधो त्ति ॥१॥ 'विहिलिंगगम्म' त्ति पाठान्तरमाश्रित्य विधिपरिपालनाऽविधिवर्जनादिलिङ्गगम्य **इतिः** परिसमाप्तौ ॥१६॥ अथ भवबालकाले कालस्य प्राधान्यात्तत्र वर्तमानो जीवः अचिकित्स्य इति दृष्टान्तपुरस्सरमाह—

**पढ़मे इह पाहन्नं कालस्सियरम्मि चित्तजोगाणं।**
**वाहिस्सुदयचिकिच्छासमयसमं होइ नायव्वं ॥१७॥**

**अक्षरगमनिका**—प्रथम इह प्राधान्यं कालस्येतरस्मिंश्च चित्रयोगानाम्, व्याधेरुदयचिकित्सासमयसमं भवति ज्ञातव्यम् ॥१७॥

**टीका—प्रथमे** भवबालकाल **इह** धर्मबीजाद्यप्राप्तौ **प्राधान्यं** महत्त्वं **कालस्य** अचरमावर्तलक्षणस्य, **इतरस्मिन्** धर्मयौवनकाले **चित्रयोगानां** भवोद्वेगसहकृतदेवपूजागुरुवन्दनवैयावृत्त्यदयादानतपःप्रभृति-विविधानुष्ठानानां प्राधान्यमित्यनुवृत्तेः। ननु भवबालकाले किमिति कालस्य प्राधान्यं न तु चित्रयोगाना-

मित्याशङ्कायामाह—**व्याधे**र्ज्वरादेः **उदये** सद्यःप्रादुर्भावे चिकित्सासमयसमम् अचरमावर्तकालस्य प्राधान्यं भवतीति सम्बन्धः। **उदयचिकित्सासमयसमं** यथाऽभिनवज्वरादौ विधीयमाना चिकित्सा न केवलं निरर्थिका प्रत्युत समधिकबाधाविधायिका तथैवाऽचरमावर्तलक्षणभवबालकालस्तथास्वाभाव्याद् धर्मचिकित्साया अकालो **भवति** जायते जीवस्य तीव्रपापाभिभूतत्वादिति **ज्ञातव्यं** बोद्धव्यम् ॥१७॥ भवबालो यथाऽचिकित्स्यस्तथा दृष्टान्तहेतुपुरस्सरं प्रदर्शयति—

**बालस्य धूलिगेहातिरमणकिरिया जहा परा भाइ।**
**भवबालस्स वि तस्सत्तिजोगओ तह असक्किरिया ॥१८॥**

**अक्षरगमनिका**—बालस्य धूलिगृहादिरमणक्रिया यथा परा भाति तथा भवबालस्यापि तच्छक्तियोगतः असत्क्रिया ॥१८॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**—**बालस्य** अव्यक्तवयसो **धूलिगृहादिरमणक्रिया** पांशुवेश्मापणादिक्रीडालक्षणचेष्टा **यथा** दृष्टान्ते **परा** प्रेष्ठा **भाति** लगति **तथा** दार्ष्टान्तिके **भवबालस्यापि** उक्तस्वरूपस्यापि **तच्छक्तियोगतः** अनादिभवभ्रमण-शक्तियोगाद् **असत्क्रिया** विषयभोगादिक्रिया प्राणप्रिया भातीति ॥१८॥ धर्मयुवा यथा चिकित्स्यो भवति तथाह—

**जुव्वणजुत्तस्स उ भोगरागओ सा न किंचि जह चेव।**
**एमेव धम्मरागाऽसक्किरिया धम्मजूणो वि ॥१९॥**

**अक्षरगमनिका**—यथा यौवनयुक्तस्य तु भोगरागादेव सा न किञ्चित्। एवमेव धर्मरागाद् असत्क्रिया धर्मयूनोऽपि ॥१९॥

**टीका**—**यथा** येन प्रकारेण **यौवनयुक्तस्य** उक्तलक्षणयौवनेनान्वितस्य **तु**र्विशेषे **भोगरागादेव** स्त्रीस्रक्चन्दनादिविषयाभिष्वङ्गादेव **सा** बालधूलिगृहादिरमणक्रिया **न** नैव **किञ्चिद्** मनागपि भातीति शेषः। **एवमेव** तथैव **धर्मरागात्** चारित्रधर्मस्पृहातः **असत्क्रिया** उक्तलक्षणा **धर्मयूनोऽपि** धर्मयौवनयुक्तस्यापि न किञ्चिद् भातीति ॥१९॥ उपसंहरन्नाह—

**इय बीजाइकमेणं जायइ जीवाण सुद्धधम्मु त्ति।**
**जह चंदणस्स गंधो तह एसो तत्तओ चेव ॥२०॥**

इति बीजादिविंशिका पञ्चमी ॥५॥

**अक्षरगमनिका**—इति बीजादिक्रमेण जीवानां जायते शुद्धधर्म इति, यथा चन्दनस्य गन्धस्तथैव तत्त्वत एव ॥२०॥

**टीका**—**इति** एवमुक्तप्रकारेण **बीजादिक्रमेण** बीजाङ्कुरादिपरम्परातो **जीवानां** भव्यसत्त्वानां **जायते** प्रादुर्भवति **शुद्धधर्मः** अनवद्यो धर्म **इति**र्हेतौ यस्मादनवद्यो धर्मस्तस्माद्बीजादिक्रमेणैव जायते नान्यथेति भावः। अत्रार्थे दृष्टान्तमाह—**यथा** येन प्रकारेण **चन्दनस्य** मलयजस्य **गन्धः** सुरभिः स्वभावस्**तथा** तेन प्रकारेण **एषः** अनवद्यो धर्मस्**तत्त्वतः** परमार्थतो जीवस्य स्वभाव एव। किञ्च-चन्दनस्य गन्धो जीवानां यथाऽऽनन्ददायी तथैव शुद्धधर्मोपीति ॥२०॥

*

# षष्ठी शुद्धधर्मविंशिका

अनन्तरविंशिकायां बीजादिक्रमेण शुद्धधर्मो जायते जीवानामित्युक्तम्। अत्र विंशिकायामेष एव शुद्धधर्मः सहेतुस्वरूपफलं निरूप्यते—

**एसो पुण सम्मत्तं सुहायपरिणामरूवमेवं च।**
**अपुव्वकरणसज्झं चरमुक्कोसट्ठिईखवणे ॥१॥**

मार्गदर्शक :- आचार्य श्री

**अक्षरगमनिका**—एवं चरमोत्कृष्टस्थितिक्षपणेऽपूर्वकरणसाध्यं चैष पुनः शुभात्मपरिणामरूपं सम्यक्त्वमस्ति ॥१॥

**टीका—एवं** चरमावर्ते भवस्थितिपरिपाकाद् बीजादिक्रमेण हि वक्ष्यमाणलक्षणेन चरमयथाप्रवृत्तकरणेन **चरमोत्कृष्टस्थितिक्षपणे** चरमवारमायुर्वर्जज्ञानावरणीयादिकर्मसप्तकस्योत्कृष्टस्थितिक्षये सति, सम्यक्त्वप्राप्तेरूर्ध्वमुत्कृष्टस्थितिबन्धाभावाद् **अपूर्वकरणसाध्यं** वक्ष्यमाणलक्षणापूर्वकरणफलं **चः** समुच्चये **एष** शुद्धधर्म एव **पुनरवधारणे शुभात्मपरिणामरूपम्** उपशमाद्यभिव्यङ्ग्यजीवशुभाध्यवसायात्मकं तत्त्वार्थश्रद्धानं **सम्यक्त्वं** भवकोटिदुर्लभं सम्यग्दर्शनमस्तीति ॥१॥ अथ ज्ञानावरणीयादीनां कर्मणामुत्कृष्टस्थितिं प्रतिपादयन्नाह—

**कम्माणि अट्ठ नाणावरणिज्जाईणि हुंति जीवस्स।**
**तेसिं च ठिई, भणिया उक्कोसेणेह समयम्मि ॥२॥**

**अक्षरगमनिका**—कर्माण्यष्ट ज्ञानावरणीयादीनि भवन्ति जीवस्य, तेषां च स्थितिर्भणितोत्कर्षेणेह समये ॥२॥

**टीका**—क्रियन्ते जीवेन मिथ्यात्वाविरतिकषायादिहेतुभिरिति **कर्माणि** तानि च सङ्ख्यया **अष्ट** न न्यूनाधिकानि **ज्ञानावरणीयादीनि** ज्ञानादिगुणावरणाद् यथार्थनामानि ज्ञानावरणीयदर्शनावरणीयवेदनीयमोहनीयायुष्कनामगोत्रान्तरायाणि **भवन्ति** जायन्ते प्रवाहतः अनादीनि **जीवस्य** भवस्थसत्त्वस्य **तेषां च** कर्मणां **स्थितिः** स्वस्वबन्धकालादूर्ध्वं जीवेन सहावस्थानलक्षणा **भणिता** निरूपिता तीर्थकरगणधरैः **उत्कर्षेणा**ऽतिशयेन द्राघिष्ठा **इह** मौनीन्द्रे **समये** आगमे ॥२॥ तथाहि—

**आइल्लाणं तिण्हं चरिमस्स य तीसकोडकोडीओ।**
**होइ ठिई उक्कोसा अयराणं सतिकडा चेव ॥३॥**

**अक्षरगमनिका**—आदिमानां त्रयाणां चरमस्य च त्रिंशत्कोटाकोट्यो भवन्ति स्थितिरुत्कृष्टा अतराणां सकृत्कृता एव ॥३॥

**टीका—आदिमानां** ज्ञानावरणीयदर्शनावरणीयवेदनीयानां **त्रयाणां चरमस्य** चान्तरायस्य **त्रिंशत्कोटाकोट्यो भवन्ति** बध्यन्ते **स्थितय** उक्तस्वरूपा **उत्कृष्टा** द्राघिष्ठा **अतराणां** सागरोपमाणां समयप्रसिद्धकालमानविशेषाणां **सकृत्कृता** एकवारेणैवातिसंक्लिष्टाध्यवसायनिमित्तबद्धा एव ॥३॥ तथा—

**सयरिं तु चउत्थस्स वीसं तह छट्ठसत्तमाणं च।**
**तित्तीस सागराइं पंचमगस्सावि विन्नेया ॥४॥**

**अक्षरगमनिका**—सप्ततिस्तु चतुर्थस्य विंशतिस्तथा षष्ठसप्तमयोश्च त्रयस्त्रिंशत् सागराणि पञ्चमकस्यापि विज्ञेया ॥४॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका—सप्ततिः** पुनः **तुः** पुनरर्थे **चतुर्थस्य** मोहनीयस्य, **विंशतिस्तथा** समुच्चये **षष्ठसप्तमयोश्च** नामगोत्रयोः, **त्रयस्त्रिंशत् सागराणि** सागरोपमाणि **पञ्चमकस्य** चायुष्कस्य देवनारकोत्कृष्टयुरपेक्षया **विज्ञेया** बोद्धव्येति ॥४॥ ततः किमित्याह—

**अट्ठण्हं पयडीणं उक्कोसठिईए वट्टमाणो उ।**
**जीवो न लहइ एयं जेण किलिट्ठासओ भावो ॥५॥**

**अक्षरगमनिका**—अष्टानां प्रकृतीनामुत्कृष्टस्थितौ वर्तमानस्तु जीवो न लभत एतद् येन क्लिष्टाशयो भावः ॥५॥

**टीका—अष्टानां** पूर्ववर्णितानां **प्रकृतीनां** ज्ञानावरणीयादिकर्मप्रकृतीनाम् **उत्कृष्टस्थितौ** प्रकृष्टस्थितौ **वर्तमानो** विद्यमानस्तुर्विशेषे **जीवो** भव्यसत्त्वोऽपि **न** नैव **लभते** प्राप्नोति **एतत्** तिरस्कृतकाम-कुम्भसुरधेनुचिन्तामण्यादि सम्यक्त्वरत्नं **येन** यस्मात् कारणात् प्रक्रान्तजीवस्य **क्लिष्टाशय**स्तीव्ररागाद्युपहतः अध्यवसायो येन स तथाऽसौ **भावः** प्रस्तावादौदयिकः। 'भवे' इति पाठः संभाव्यते तर्हि–येनाऽसौ क्लिष्टाशयो भवेदिति। उक्तं च–न हि रेणुभृतं चक्षुः सम्यक् पश्यति रूपमिति ॥५॥ तर्हि कदा प्राप्नोतीत्याह—

**सत्तण्हं पयडीणं अब्भिंतरओ उ कोडाकोडीए।**
**पाउणइ नवरमेयं अपुव्वकरणेण कोई तु ॥६॥**

**अक्षरगमनिका**—सप्तानां प्रकृतीनां कोटाकोट्या अभ्यन्तरतस्तु कोऽपि तु प्राप्नोत्येतदपूर्वकरणेन केवलम् ॥६॥

**टीका—सप्तानाम्** आयुर्वर्जज्ञानावरणीयादीनां **प्रकृतीनां** कर्मप्रकृतीनां स्थितयो यदा चरमयथाप्रवृत्तकरणेन सागरोपमाणां **कोटाकोट्या अभ्यन्तरतः** अन्तराल एव भवन्ति **तु**रवधारणे तदा तत्र वर्तमानः **कोऽपि** कश्चिदेव भव्यसत्त्व**स्तु**रवधारणे **प्राप्नोति** लभत **एतत्** सम्यग्दर्शनम् **अपूर्वकरणेन** वक्ष्यमाणलक्षणेनैव **नवरं** प्राकृतत्वादवधारण इति ॥६॥ साम्प्रतं करणानां स्वामिभेदेन नामनिर्देशं स्वरूपमाह–

**करणं अहापवत्तं अपुव्वमणियट्टिमेव भव्वाणं।**
**इयरेसिं पढमं चिय भण्णइ करणं ति परिणामो ॥७॥**

**अक्षरगमनिका**—करणं यथाप्रवृत्तमपूर्वमनिवर्ति भव्यानामेव। इतरेषां प्रथममेव। करणमिति भण्यते परिणामः ॥७॥

**टीका—करणं** वक्ष्यमाणस्वरूपम्, तच्च त्रिधा–यथाप्रवृत्तकरणमपूर्वकरणमनिवर्तिकरणं च। **यथाप्रवृत्तं** यथा नदीपाषाणगोलन्यायेन विशिष्टनिमित्तं विनापि प्रवृत्तं येन करणेन प्रत्येकजीवस्तथास्वभावाद् अनन्तश उत्कृष्टकर्मस्थितिं क्षपयन् यावदन्तःकोटाकोटिस्थितिकं ग्रन्थिदेशं प्राप्नोति तत्करणं यथाप्रवृत्तकरण-मुच्यते। तथा– **अपूर्वम्** अनादौ संसारे न संजातं प्रागिति अपूर्वकरणमभिधीयते तच्च द्विधा–प्रथमं ग्रन्थिभेद-

निबन्धनम्, द्वितीयं तु क्षपकश्रेणिफलम्। तथा– **अनिवर्ति** निवर्तत इति निवर्ति, न निवर्ति अनिवर्ति, तस्मिन् प्रवृत्ते नियमात् सम्यक्त्वप्राप्तिः, तत्करणमनिवर्तिकरणं भण्यते। एवकारोऽवधारणे **भिन्नक्रमश्च**। एतच्च करणत्रिकं **भव्यानामेव**। **इतरेषाम्** अभव्यानां **प्रथममेव** यथाप्रवृत्तकरणमेव ग्रन्थिदेशानुल्लङ्घनात्। किंस्वरूपं करणं ? **करणं तुः** पुनरर्थे क्रियतेऽनेनेति करणं कर्तुः साधकतमम्, तच्चेह **भण्यते** कथ्यते **परिणामो** जीवाध्यवसायविशेषस्तीर्थंकरगणधरैरिति ॥७॥ अधुनैतानि करणानि क्व कस्य प्रवर्तन्त इत्याह–

**जा गंठि ता पढमं, गंठिं समइच्छओ भवे बीयं।**
**अणियट्टिकरणं पुण सम्मत्तपुरक्खडे जीवे ॥८॥**

**अक्षरगमनिका**—यावद् ग्रन्थिस्तावत् प्रथमं, ग्रन्थिं समतिक्रामतोर्भवेद्द्वितीयम्। अनिवर्तिकरणं पुनः सम्यक्त्वपुरस्कृते जीवे ॥८॥

**टीका—यावद**वधि **ग्रन्थिः** ग्रन्थिदेशप्राप्तिस्तावदवधि **प्रथमं** यथाप्रवृत्तकरणम्। **ग्रन्थिं** ग्रन्थिस्तीव्ररागद्वेषपरिणामलक्षणस्तं **समतिक्रामतः** समुल्लङ्घयतः सत एव **भवेद्द्वितीयम्** अपूर्वकरणम् **अनिवर्तिकरणं** पूर्ववर्णितस्वरूपं **पुनर्भेदे** **सम्यक्त्वपुरस्कृते** सम्यक्त्वं पुरस्कृतं येन स तथा तस्मिन् **जीवे** भव्यसत्त्व इति ॥८॥ अथ सम्यक्त्वे सति जीवस्य शुभपरिणाममाह—

**इत्थ य परिणामो खलु जीवस्य सुहो य होइ विन्नेओ।**
**किं मलकलंकमुक्कं कणगं भुवि झामलं होइ ? ॥९॥**

**अक्षरगमनिका**—अत्र च जीवस्य परिणामः खलु शुभश्च भवति विज्ञेयः। किं मलकलङ्कमुक्तं कनकं भुवि ध्यामलं भवति ? ९॥

**टीका—अत्र च** सम्यक्त्वे सति **जीवस्य** भव्यसत्त्वस्य **परिणामः** अध्यवसायः **खलु**रवधारणे **शुभः** शोभन एव **चः** अवधारणे **भवति** जायत इति **विज्ञेयो** बोद्धव्यः। अत्रार्थे दृष्टान्तमाह–**किं** वितर्के **मलकलङ्कमुक्तं** मलमेव कलङ्कस्तेन मुक्तं शुद्धं **कनकं** सुवर्णं **भुवि** जगति **ध्यामलं** श्यामलं **भवति** जायते ? नैव जायत इत्यर्थः। अयं भावः—तीव्ररागादिसङ्क्लेशहेतुमिथ्यात्वानन्तानुबन्धिकषायमलक्षीणे सति जीवसुवर्णस्य नैवाशुभपरिणामलक्षणं ध्यामलं भवतीति ॥९॥ अधुना सम्यक्त्वलक्षणानि निरूपयन् प्रथमं प्रशममाह—

**पयईय व कम्माणं वियाणिउं वा विवागमसुहं ति।**
**अवरद्धे वि न कुप्पइ उवसमओ सव्वकालं पि ॥१०॥**

**अक्षरगमनिका**—प्रकृत्यैव कर्मणां वा विपाकमशुभमिति विज्ञायाऽपराद्धेऽपि न कुप्यत्युपशमात् सर्वकालमपि ॥१०॥

**टीका—प्रकृत्यैव** सम्यक्त्वपरिणामसमन्वितजीवस्वभावादेवाथवा **कर्मणां** कषायमोहनीयानां **वा** विकल्पे **विपाकं** फललाभरूपम् **अशुभम्** अशोभनं चिरकालवेदनीयनारकादिदुःखरूपत्वाद् **इतिः** निंदर्शने **विज्ञाया**ऽवबुध्या**ऽपराद्धेऽपि** अपकारिण्यपि **न** नैव **कुप्यति** क्रुध्यति **उपशमात्** तथाविधकर्मोपशान्त्या **सर्वकालं** यावत् सम्यक्त्वस्थितिरिति ॥१०॥ अथ द्वितीयं संवेगमाह—

**नरविबुहेसरसुक्खं दुक्खं चिय भावओ उ मन्नंतो।**
**संवेगओ न मुक्खं मुत्तूणं किंपि पत्थेइ ॥११॥**

**अक्षरगमनिका**—नरविबुधेश्वरसौख्यं भावतस्तु दुःखमेवेति मन्यमानः संवेगतो मोक्षं मुक्त्वा न किमपि प्रार्थयति ॥११॥

**टीका**—**नरविबुद्धेश्वरसौख्यं** चक्रिसुरेन्द्रसुखं **भावतः** परमार्थतः पुनः **तुः** पुनरर्थे **दुःखमेवा**सुखमेव संयोगसापेक्षत्वाद् 'अविक्खा खु दुक्खं'त्ति (पञ्च सूत्र.) इति **मन्यमानश्चि**न्तयन् **संवेगतो** मोक्षतीव्राभिलाषाद् **मोक्षं** कृत्स्नकर्मक्षयलक्षणं शुद्धात्मस्वरूपलाभं वा **मुक्त्वा** विहाय **न** नैवान्यत् **किमपि** सांसारिकपदार्थजातं **प्रार्थयति** समभिलषीतीति ॥११॥ साम्प्रतं तृतीयं निर्वेदमाह—

**नारयतिरियनरामरभवेसु निव्वेयओ वसइ दुक्खं।**
**अकयपरलोयमग्गो ममत्तविसवेगरहिओ वि ॥१२॥**

**अक्षरगमनिका**—नारकतिर्यग्नरामरभवेष्वकृतपरलोकमार्गो ममत्वविषवेगरहितोऽपि निर्वेदतो वसति दुःखम् ॥१२॥

**टीका**—**नारकतिर्यग्नरामरभवेषु** निरयपशुनृदेवजन्मसु गतिचतुष्केऽपि सम्यक्त्विसत्त्वलाभाद् वसति दुःखमिति सम्बन्धः, कीदृशः? **अकृतपरलोकमार्गः** अविहितपारलौकिकहितार्थानुष्ठानः, पुनः कथम्भूतः? **ममत्वविषवेगरहितोऽपि** रागोरगविषावेगरहितोऽपि **निर्वेदतः** सहजभववैराग्यात् कारायामिव **वसति** निवसति **दुःखं** कथमिति ॥१२॥ इदानीमनुकम्पामाह—

मार्गदर्शक :- **दट्ठूण पाणिनिवहं भीमे भवसागरम्मि दुक्खत्तं।**
**अविसेसओऽणुकंपं दुहा वि सामत्थओ कुणइ ॥१३॥**

**अक्षरगमनिका**—भीमे भवसागरे दुःखार्तं प्राणिनिवहं दृष्ट्वाऽविशेषतः अनुकम्पां द्विधाऽपि करोति सामर्थ्यतः ॥१३॥

**टीका**—**भीमे** भयङ्करे **भवसागरे** संसारसमुद्रे **दुःखार्तं** शारीरमानसदुःखदग्धं **प्राणिनिवहं** जीवसमूहं **दृष्ट्वा** विलोक्याऽ**विशेषतः** स्वपरभेदमगणयन् **अनुकम्पां** दयां **करोति** विदधाति **द्विधापि** द्रव्यभावभेदात् **सामर्थ्यतः** स्वशक्तितः। **अयं भावः** परहितकरणेच्छया परदुःखछेदनाय स्वशक्तितः अन्नादिद्रव्यप्रदानलक्षणां द्रव्यानुकम्पां तथोपदेशादिना च धर्ममार्गे नियोजनरूपां भावानुकम्पां करोतीति ॥१३॥ सम्प्रति चरममास्तिक्यमाह—

**मन्नइ तमेव सच्चं नीसंकं जं जिणेहिं पण्णत्तं।**
**सुहपरिणामो सव्वं कंखाइविसुत्तियारहिओ ॥१४॥**

**अक्षरगमनिका**—शुभपरिणामः काङ्क्षादिविश्रोतसिकारहितो मन्यते तदेव सर्वं निःशङ्कं सत्यं यज्जिनैः प्रज्ञप्तं ॥१४॥

**टीका**—**शुभपरिणामः** सम्यक्त्वप्रसादितशोभनाध्यवसायः पुनः कीदृशः? **काङ्क्षादिविश्रोतसिकारहितः** शङ्काग्रहणं तु निःशङ्कमिति सूत्रपदेनैवेति काङ्क्षाविचिकित्सादिप्रतिकूलपरिणामप्रवाहविनिर्मुक्तः सन्नसौ **मन्यते** स्वरुचिविषयं नयति यथा **तदेव** जीवाजीवादिपदार्थजातं **सर्वं** निखिलं न तु देशतो यत एकमप्यक्षरं श्रीजिनभाषितमरोचमानो जीवो भगवत्यविश्वासाद् मिथ्यात्वमेति, उक्तं च–पयमक्खरंपि जो एगं, सव्वन्नूहिं पवेदियं। न रोएज्जऽन्नहा भासे, मिच्छद्दिट्ठी स निच्छियं॥ (महा०नि०सू. अ. २ सू. १७१) **निःशङ्कं** शङ्कारहितं **सत्यम्** अवितथं सद्भ्यो वा हितं **यद्** अनिर्दिष्टनाम **जिनैर्जितरागद्वेषैः प्रज्ञप्तम्** उपदिष्टमिति ॥१४॥

नन्वेवंविधः शुभपरिणामोऽयं कथं भवतीत्याह–

**एवंविहो य एसो तहाखओवसमभावओ होइ।**
**नियमेण खीणवाही नरु व्व तव्वेयणारहिओ ॥१५॥**

**अक्षरगमनिका**—तथाक्षयोपशमभावत एवंविधश्चैष नियमेन भवति क्षीणव्याधिर्नर इव तद्वेदनारहितः ॥१५॥

**टीका**—**तथाक्षयोपशमभावतो** यथा सम्यक्त्वमोहनीयस्य क्षय उपशमः क्षयोपशमो वा जायते तथापरिणामाद् **एवंविध** एव शमसंवेगादिगुणोपेत**श्चो**ऽवधारणे **एष** सम्यक्त्वी **नियमेना**ऽवश्यंतया **भवति** जायते। अत्रार्थे दृष्टान्तमाह **क्षीणव्याधिः** समूलापगतकुष्ठादिमहारोगो **नरः** पुरुष **इव** साम्ये **तद्वेदनारहितः** कुष्ठादिमहाव्याधिनिमित्तभूतकृमिकुलापादितपीडारहितः। अयमपि जीवो दर्शनमोहनीयानन्तानुबन्धिकषाय-मोहनीयकर्मोदयलक्षणव्याधिविनिर्मुक्तत्वेन तीव्ररागादिवेदनाऽभावाद् उपशमादिगुणोपेतो भवतीति ॥१५॥ ननु सम्यक्त्वमात्रावाप्तौ कथमेवम्भूत इत्याशङ्क्य परिहरति—

**पढमाणुदयाभावो एयस्स जओ भवे कसायाणं।**
**ता कहमेसो एवं? भन्नइ तव्विसयविक्खाए ॥१६॥**

**अक्षरगमनिका**—यत एतस्य प्रथमानां कषायाणामुदयाभावो भवेत्तस्मात् कथमेष एवम्? भण्यते–तद्विषयापेक्षया ॥१६॥

**टीका**–पर आशङ्कते– **यतो** यस्मात् कारणाद् **एतस्य** प्रथमत एवावाप्तसम्यग्दर्शनस्य केवलं **प्रथमानाम्** अनन्तानुबन्धिनां **कषायाणां** क्रोधादिकषायमोहनीयानाम् **उदयाभावो** प्रदेशोदयाभावो विपाकोदयाभावो वा न तु द्वितीयाद्यप्रत्याख्यानावरणीयादिकषायाणां तथोदयाभावस्तेषां तादवस्थ्यात् **तस्मात्** कारणात् **कथं** केन हेतु**नैषः** सम्यक्त्विसत्त्व **एवम्** अनन्तरोक्तोपशमादिगुणसम्पन्नः? **भण्यत** उच्यते–**तद्विषयापेक्षया** अनन्तानुबन्धि-कषायाणां क्षयोपशमभावतो य उपशमादिगुणाः प्रादुर्भवन्ति तदपेक्षया बोद्धव्योऽयमेवम्भूतो न तु शेषाऽप्रत्याख्यानावरणीयादिकषायाणामुदयाभावापेक्षयेति ॥१६॥ अथवा

**निच्छयसम्मत्तं वाऽहिकिच्च सुत्तभणियनिउणरूवं तु।**
**एवंविहो निओगो होइ इमो हंत वच्चु त्ति ॥१७॥**

**अक्षरगमनिका**—निश्चयसम्यक्त्वं वाऽधिकृत्य तु सूत्रभणितनिपुणरूपं यतोऽयमेवंविधो नियोगो हन्त भवति वाच्य इति ॥१७॥

**टीका**—अथवा **निश्चयसम्यक्त्वं** निश्चयनयाभिमतसप्तमगुणस्थानकवर्तिजीवसम्यक्त्वं **वा** विकल्पेऽ**धि-कृत्या**ऽऽश्रित्यैव **तु**रवधारणे **सूत्रभणितनिपुणरूपम्** आगमोक्तोपशमादिसुन्दरस्वरूपं ज्ञेयमिति शेषः, **इति**र्हेतौ यस्माद् **अयम्** पूर्ववर्णित **एवंविधः**शमसंवेगादिशुभपरिणामरूपो **नियोगो** व्यापारो **हन्ता**ऽऽमन्त्रणे **भवति** जायते **वाच्यः** सम्यक्त्वपदार्थः अन्यथा चतुर्थगुणस्थानकवर्तिकृष्णश्रेणिकादिषूक्तशमसंवेगादिलक्षणाभावात् सम्यक्त्वमेव न संगच्छेत। श्रूयन्ते ह्येते क्षायिकसम्यक्त्वस्वामिनो भविष्यत्तीर्थकरजीवाः। इदं त्वत्र ध्येयम्–ज्ञाननयाभिप्रायेण तथाविधविशिष्टज्ञानदशैव निश्चयतः सम्यक्त्वम्। क्रियानयाभिप्रायेण तूक्तमेव सप्तमगुणस्थानकगतभावचारित्रं निश्चयतः सम्यक्त्वमिति ॥१७॥ साम्प्रतं शमसंवेगादीनां प्राप्तिक्रम उच्यते—

**पच्छाणुपुव्विओ पुण गुणाणमेएसि होइ लाहकमो।**
**पाहन्नओ उ एवं विन्नेओ सिं उवन्नासो ॥१८॥**

**अक्षरगमनिका**—एतेषां गुणानां लाभक्रमः पश्चानुपूर्वितः पुनर्भवति, प्राधान्यतस्त्वेवमेषामुपन्यासो विज्ञेयः ॥१८॥

**टीका—एतेषां** शमसंवेगादीनां **गुणानां** जीवधर्माणां **लाभक्रमः** प्रादुर्भावानुक्रमः **पश्चानुपूर्वितः** पश्चानुपूर्व्यैवोपन्यासापेक्षया **पुन**रवधारणे **भवति** जायते, तथाहि–प्रथमस्तावदास्तिक्यं, ततः अनुकम्पा, ततो निर्वेदस्ततः संवेगस्ततश्चरम उपशमः। अत्र पर आह–कस्मात्तर्हि पूर्वानुपूर्वित उपन्यासः ? उच्यते **प्राधान्यतो** यथाप्राधान्यमेव **तु**रवधारणे **एवं** पूर्वानुपूर्वित **एषां** शमसंवेगादीनाम् **उपन्यासो** निरूपणाक्रमो **विज्ञेयः** अवगन्तव्य इति ॥१८॥ अथानन्तरोक्तसम्यक्त्वलक्षणशुद्धधर्मस्य भावार्थं निरूपयति–

**एसो उ भावधम्मो धारेइ भवन्नवे निवडमाणं।**
**जम्हा जीवं नियमा अन्नो उ भवंगभावेणं ॥१९॥**

**अक्षरगमनिका**—एष तु भावधर्मो यस्माद् भवार्णवे निपतन्तं जीवं नियमाद् धारयति। अन्यस्तु भवाङ्गभावेन ॥१९॥

**टीका :—एषो**ऽनन्तरोक्तसम्यक्त्वलक्षणशुद्धधर्म एव **तु**रवधारणे **भावधर्मः** परमार्थतो धर्मो **यस्मात्** कारणाद् **भवार्णवे** संसारसागरे **निपतन्तं** निमज्जन्तं **जीवं** भव्यजन्तुं **नियमाद्** अवश्यं **धारयति** संस्थापयति सद्गतौ मोक्षे वा। **अन्य** उक्तव्यतिरिक्तो लौकिकधर्मो भवाभिनन्दिसत्को वाऽप्रधानद्रव्यधर्मस्तुःपुनरर्थे **भवाङ्गभावेन** संसारकारणाद् न तथेति शेषः ॥१९॥ फलनिरूपणद्वारेणोपसंहरन्नाह–

**दाणाइया उ एयंमि चेव सुद्धा उ हुंति किरियाओ।**
**एयाओ वि हु जम्हा मुक्खफलाओ पराओ य ॥२०॥**

इति सद्धर्मविंशिका षष्ठी।

**अक्षरगमनिका**—एतस्मिन्नेव दानादिकाःक्रियास्तु शुद्धास्तु भवन्ति। यस्माद् एता अपि खलु मोक्षफलाः पराश्च ॥२०॥

**टीका—एतस्मिन्** सम्यक्त्वे सत्येव **एव**कारोऽवधारणे न केवलं ध्यानाध्ययनादिक्रिया **दानादिकाः क्रिया** अपि दानशीलतपःप्रभृतिक्रियास्तुरप्यर्थः **शुद्धा** अनवद्या एव **तु**रवधारणे **भवन्ति** जायन्ते। **यस्मात्** कारणाद् **एता अपि** दानादिक्रिया अपि **हु** प्राकृतत्वादवधारणे **मोक्षफला** एव मुक्तिनिबन्धनास्तस्मात् सम्यक्त्वे सत्येव **परा** श्रेष्ठा एव **चो**ऽवधारणे भवन्तीति शेषः। **अयं भावः**–चित्तानुरूपफलं सर्वव्यापाराणामिति मोक्षैकचित्तस्य सम्यग्दृष्टेः सर्वाः क्रिया मोक्षप्रापिकाः। उक्तं च–भिन्नग्रन्थेस्तु यत्प्रायो, मोक्षे चित्तं भवे तनुः। तस्य तत्सर्व एवेह, योगो योगो हि भावतः ॥१॥ (यो. बि. २०३) ॥२०॥

# सप्तमी दानविंशिका

अनन्तरविंशिकायां सम्यक्त्वे सति जीवस्य दानादिकाः क्रियाः शुद्धा भवन्तीत्युक्तम्। अत्र विंशिकायां तु दानमेवाऽधिकृत्याह—

**दाणं च होइ तिविहं नाणाभयधम्मुवग्गहकरं च।**
**इत्थ पढमं पसत्थं विहिणा जुग्गाण धम्मम्मि ॥१॥**

**अक्षरगमनिका**—दानं च भवति त्रिविधंज्ञानाभयधर्मोपग्रहकरम्। अत्र धर्मे योग्यानां विधिना प्रथमं प्रशस्तम् ॥१॥

**टीका**—**दानं** स्वपरोपकारार्थं स्वस्य त्यागः, उक्तं च—अनुग्रहार्थं स्वस्यातिसर्गो दानम् (तत्त्वार्थसूत्र० अ० ७ सू० ३३) **चः** पुनरर्थे **भवति** जायते **त्रिविधं** त्रिप्रकारम्, तद्यथा—**ज्ञानाभयधर्मोपग्रहकरं** ज्ञानदानं प्रथमं ततः अभयदानं द्वितीयं ततो धर्मोपग्रहकं तृतीयं **च** शब्दः समुच्चये। ननु ग्रन्थान्तरेषु अभयसुपात्रानुकम्पोचितकीर्तिभेदाद् दानं पञ्चविधं पठ्यते, तथाहि—अभयं सुपत्तदाणं, अणुकंपा उचिअ कित्तिदाणं च। (श्रा० वि०)। तत्किमित्यत्र त्रिविधं निरूप्यत इति चेत्, उच्यते—त्रिविधस्यैव मुक्त्यङ्गत्वात् शेषभेदास्तु भोगादिकं ददतीति। **अत्र** दानप्रस्तावे यदि वाऽस्मिन् **धर्मे** दानादिरूपे सद्धर्मे, **योग्यानां** धर्मेण ज्ञानेन वा सह योगमर्हन्तीति योग्या उचितास्तेषां **प्रथमं** क्रमापेक्षया ज्ञानदानं **विधिना** 'काले विणए बहुमाणे' इत्यादि तथा 'मंडलि निसिज्ज' इत्यादिवक्ष्यमाणविधानेन **प्रशस्तं** श्लाघितमिति ॥१॥ अथ दातुः स्वरूपमाह—

**सेवियगुरुकुलवासो विसुद्धवयणोऽणुमन्निओ गुरुणा।**
**सव्वत्थ णिच्छियमई दाया नाणस्स विन्नेओ ॥२॥**

**अक्षरगमनिका**—ज्ञानस्य दाता सेवितगुरुकुलवासो विशुद्धवचनो गुरुणानुमतः सर्वत्र निश्चितमतिर्विज्ञेयः ॥२॥

**टीका**—**ज्ञानस्य** ज्ञानं जिनोपज्ञं श्रुतं तस्य **दाता** प्रयच्छकः **सेवितगुरुकुलवासो** गुरुकुलं पूर्वोक्तस्वरूपं तत्र वासः अन्तेवासित्वेन निवासो गुरुकुलवासः स सेवित उपासितो येन स तथा, उक्तं च—

नाणस्स होइ भागी, थिरयरओ दंसणे चारित्ते य। धन्ना आवकहाए, गुरुकुलवासं न मुंचन्ति ॥१॥

पुनः कीदृशः? **विशुद्धवचनः** अनवद्यवचन आर्यदेशकुलजातिभाषादिसम्पन्नत्वाद् हीलितखिंसितपरुषाद्यप्रशस्त-भाषावर्जनात् प्रत्यक्षपरोक्षकालवचनलिङ्गादिषोडशविधवचनपरिज्ञानाच्च।

यदागमः—"नो कप्पइ निग्गंथयाण वा निग्गंथीण वा इमाइं छ अवयणाइं भासित्तए, तं जहा—अलियवयणे हीलियवयणे खिंसियवयणे फरुसवयणे गारत्थियवयणे विओसवियाहिगरणउदीरणवयणे त्ति"। तथा वचनानि तद्यथा प्रत्यक्ष-परोक्ष-कालत्रिक-वचनत्रिक-लिङ्गत्रिकोपनयापनयचतुष्काध्यात्मेति षोडश। पुनः किंलक्षणः? **गुरुणाऽनुमतः** स्वगुर्वनुमतो न तु छन्दसा प्रवृत्तो यतो गुरुदत्तैव प्रतिष्ठा भवति तत एवाऽऽदेयवचनो भवतीति, पुनः किंस्वरूपः? **सर्वत्र** स्वपरशास्त्रेषु **निश्चितमतिः** पूर्वापरपर्यालोचनेन पदार्थनिश्चया-ज्ञाताऽसन्दिग्धबुद्धि**र्विज्ञेयो** ज्ञातव्यः। अनीदृशस्य त्वनधिकार इति ॥२॥ सम्प्रति ग्राहकलक्षणमाह—

**सुस्सूसासंजुत्तो विन्नेओ गाहगो वि एयस्स।**
**न सिराऽभावे खणणाउ चेव कूवे जलं होइ ॥३॥**

**अक्षरगमनिका**—एतस्य ग्राहकोऽपि शुश्रूषासंयुक्तो विज्ञेयः। सिराऽभावे खननादेव कूपे जलं न भवति ॥३॥

**टीका**—**एतस्य** ज्ञानदानस्य न केवलमुक्तस्वरूपो दाता **ग्राहकोऽपि** प्रतीच्छकोऽपि **शुश्रूषासंयुक्तः** श्रवणेच्छासमन्वितो **विज्ञेयः** अवगन्तव्यः। विपर्यये यद्भवति तद्दृष्टान्तपुरस्सरमाह– **सिराऽभावे** अम्भःस्रोतोऽभावे पृथिव्यां **खननादेव** अवदारणमात्रात् **कूपे**ऽवटे **जलं** प्रतीतं **न** नैव **भवति** जायते, तथैव श्रोतरि शुश्रूषाऽभावे श्रवणमात्रात् ज्ञानपरिणतिर्न जायते। तदुक्तम्–

बोधाम्भः स्रोतसश्चैषा, सिरातुल्या सतां मता।
अभावेऽस्याः श्रुतं व्यर्थमसिरावनिकूपवत् ॥१॥ (यो. दृ. ५३)३॥

अथ दानविधिमाह—

**ओहेण वि उवएसो आयरिएणं विभागसो देओ।**
**सामाइधम्मजणओ महुरगिराए विणीयस्स ॥४॥**

**अक्षरगमनिका**—आचार्येण मधुरगिरा सामायिकधर्मजनक उपदेशो विनीतायौघेनाऽपि विभागशो देयः ॥४॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**—**आचार्येण** अनुयोगाचार्येण धर्मोपदेशकेनेतियावद् **मधुरगिरा** कर्णप्रियवाण्या **सामायिकधर्मजनकः** सर्वविरतिदेशविरत्यादिपरिणामाविर्भावक **उपदेशो** धर्मकथालक्षणा देशना **विनीताय** वक्ष्यमाणलक्षणविनयादिगुणसम्पन्नाय **ओघेनाऽपि** उत्सर्गेणाऽपि **विभागशो** बालमध्यमपण्डितभेदाद् यथाग्राहकं **देयो** दातव्यः। ननु 'जहा पुण्णस्स कत्थइ तहा तुच्छस्स कत्थइ, जहा तुच्छस्स कत्थइ तहा पुण्णस्स कत्थइ' इत्याचाराङ्गसूत्रप्रामाण्यात् श्रोतृभेदेनोपदेशभेदो न युक्त इति चेत्, उच्यते—इदं सूत्रोक्तं वक्तुर्निरीहताऽऽविर्भावकं न तु श्रोतृविवेचननिषेधकम्। उक्तं च—यथास्थानं गुणोत्पत्तेः सुवैद्येनेव भेषजम्। बालाद्यपेक्षया देया देशना क्लेशनाशिनी॥ द्वा. द्वा. (२–१) ॥४॥ श्रोतृविवेकमकृत्वोपदेशदाने दोषमाह—

**अविणीयमाणवंतो किलिस्सई भासई मुसं चेव।**
**नाउं घंटालोहं को कटकरणे पवत्तिज्जा ? ॥५॥**

**अक्षरगमनिका**—अविनीतमाज्ञापयन् क्लिश्यति भाषते च मृषामेव। ज्ञात्वा घण्टालोहं कः कटकरणे प्रवर्तेत ॥५॥

**टीका**—**अविनीतं** विनयविकलं मिथ्याभिनिविष्टं वा**ऽऽज्ञापयन्** आदिशन् यथेदं कुर्विति वक्ता **क्लिश्यति** खिद्यतेऽनालोच्योपदेशदानात्, तथाहि–नृपादिः श्रोता कदाचित् प्रद्वेषमपि गच्छेद् द्विष्टश्चासौ हन्यादपि। अतः पुरुषमविदित्वा धर्मकथा न कार्या। **यदागमः**—"अवि य हणे अणाइयमाणे"। (आचाराङ्गसूत्रम्) किञ्च–अनालोच्याऽऽज्ञापयन् वक्ता **भाषते**–वदति **मृषा**मेवाऽसत्यामेव भाषां वक्त्राऽनालोच्य-भाषणादेवाविनीते वचनविपरिणत्याऽहितकरत्वादपायहेतुत्वाच्च। एतदेव दृष्टान्तद्वारेणाह–**ज्ञात्वा**ऽवबुध्य **घण्टालोहं** घण्टा वाद्यविशेषस्तदर्थं लोहं कालायः **कः** सुज्ञः **कटकरणे** प्रतरनिष्पादने यदि वा कट एव कटकस्तत्करणे **प्रवर्तेत** प्रारभेत ? न कोऽपीत्यर्थ आयासमात्रफलत्वात्, तथाहि-तस्य खरटस्वभावेन घनताडनमात्राद् भङ्गापत्तिः। अत्रार्थे स्वयं भगवान् श्रीमन्महावीरस्वामी दृष्टान्तः, यथा प्रथमसमवसरणेऽभावितां पर्षदं ज्ञात्वा तथाकल्पात् स्थले वृष्टिमिव निष्फलां देशनां क्षणं दत्त्वाऽन्यत्र विजहार। स्यादेतत्, कथं तर्हि

धर्मकथा कार्येत्युच्यते कोऽयं पुरुषः कञ्च देवताविशेषं नत इत्याद्यालोच्य धर्मकथा कार्या। उक्तं च–केयं पुरिसे कं च नए? इत्यादि (आचाराङ्गसूत्रम्)। अतः श्रोतृभेदेन देशनाभेदः कर्तव्य इति स्थितम्॥५॥

ज्ञानस्य फलं विरतिरिति ज्ञानदानानन्तरं विरतिलक्षणमभयदानमाह—

**विन्नेयमभयदाणं परमं मणवयणकायजोगेहिं।**
**जीवाणमभयकरणं सव्वेसिं सव्वहा सम्मं॥६॥**

**अक्षरगमनिका**—सर्वेषां जीवानां मनोवचनकाययोगैः सर्वथा सम्यगभयकरणं परममभयदानं विज्ञेयम्॥६॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**—**सर्वेषां** समस्तानां सूक्ष्मबादरभेदभिन्नानां **जीवानां** सत्त्वानां **मनोवचनकाययोगैः** मनोवाक्कायव्यापारैः **सर्वथा** करणकारणानुमतिभेदेन **सम्यक्** अरक्तद्विष्टेनाऽऽत्मोपमया **अभयकरणं** भयानामभावः अभयं तस्य करणं, भयानि सप्त, तद्यथा–१.मनुष्यस्य मनुष्याद्भयम् इहलोकभयं २.मनुष्यस्य देवादेर्भयं परलोकभयं ३.धनादिग्रहणाद्भयम् आदानभयं ४.बाह्यनिमित्तनिरपेक्षं भयम् अकस्माद्भयम् ५.आजीविकाभयं ६.मरणभयम् ७.अपयशोभयं चेति, **परमं** सर्वश्रेष्ठम् **अभयदानम्** अभयम् उक्तस्वरूपं तस्य दानं परमकरुणालक्षणं **विज्ञेयं** बोद्धव्यमिति॥६॥ अनन्तरोक्तस्याभयदानस्योत्तमत्वान्नानुत्तमस्तद्दातुं वानुपालयितुं तरतीत्याह—

**उत्तममेयं जम्हा तम्हा णाणुत्तमो तरइ दाउं।**
**अणुपालिउं व, दिन्नं पि हंति समभावदारिद्दे॥७॥**

**अक्षरगमनिका**—यस्मादुत्तममेतत्तस्मादनुत्तम एतद्दातुमनुपालयितुं च न तरति। समभावदारिद्र्ये दत्तमपि हन्ति॥७॥

**टीका**—**यस्मात्** कारणाद् **उत्तमं** सर्वोत्कृष्टम् **एतद्** अभयदानं तस्मात् कारणाद् **अनुत्तम** उत्तमव्यतिरिक्तः अविरतः पुरुष **एतत्** प्रकृतमभयदानं **दातुं** विश्राणयितुं तथाऽ**नुपालयितुं** दानादूर्ध्वं तत्परिणामं रक्षयितुं **चः** समुच्चये **न** नैव **तरति** पारयति। किञ्च– **समभावदारिद्र्ये** समतादौर्गत्ये सति **दत्तमपि** वितीर्णमपि **हन्ति** नाशयति लुप्यतीति यावद् यतः सर्वत्राऽरक्तद्विष्टसमभावेनैवैतत् सम्यक् पालयितु शक्यं नान्यथा। **एतदुक्तं भवति**–तत्त्ववेत्ता भवभावाद्विरक्तः सर्वत्राऽरक्तद्विष्टः समतासमृद्धो ह्युत्तमः पुरुषः अभयदानस्य दाताऽनुपालयिता च भवति। तदुक्तम्—

अण्णो देहातो अहं, णाणत्तं जस्स उवलद्धं।
सो किंचि आहिरिकं, न कुणदि देहस्स भंगे वि॥१॥

'आहिरिकं' न ह्रीर्लज्जा यस्य सः अह्रीकस्तस्य भाव आह्रीक्यं संयमविलोपस्तन्न करोतीत्यर्थः॥७॥

एतदेव भावयति—

**जिणवयणनाणजोगेण तक्कुलठिईसमासिएणं च।**
**विन्नेयमुत्तमत्तं न अन्नहा इत्थ अहिगारे॥८॥**

**अक्षरगमनिका**—अत्राधिकारे जिनवचनज्ञानयोगेन तत्कुलस्थितिसमाश्रितेन चोत्तमत्वं विज्ञेयं नान्यथा॥८॥

**टीका**—**अत्र** अभयदानविषयकेऽ**धिकारे** प्रस्तावे **जिनवचनज्ञानयोगेन** श्रुतज्ञानोपयोगेन 'पढमं नाणं

तओ दया' इत्यनेन गीतार्थस्याधिकारित्वमावेदितं भवति तथा **तत्कुलस्थितिसमाश्रितेन** तस्य जिनस्य कुलं गुरुकुलं गुरोः श्रीजिनोत्तराधिकारित्वात् तस्य स्थितिर्मर्यादा समाचारीति यावत् तस्याः समाश्रितेन समाश्रयणेन, अनेन च गीतार्थनिश्रितानामप्यधिकारित्वं निवेदितं **चः** समुच्चये **उत्तमत्वं** प्राधान्यं **विज्ञेयं** बोद्धव्यं **नान्यथा** गीतार्थत्वं गीतार्थनिश्रां च विहाय नोत्तमत्वम्। यदागमः—गीयत्थो य विहारो, बीओ गीयत्थमीसओ। समणुन्नाओ सुसाहूणं, नत्थि तइयं वियप्पणं॥१॥ (महा नि. ६-१३३)॥८॥ एतदेवाभ्युच्चयति—

**दाऊणेयं जो पुण आरंभाइसु पवत्तए मूढो।** सुविधिसागर जी महाराज
**भावदरिद्दो नियमा दूरे सो दाणधम्माणं॥९॥**

**अक्षरगमनिका**—दत्त्वैतद् यो मूढः पुनरारम्भादिषु प्रवर्तते स भावदरिद्रो नियमात् दानधर्माणां दूरे॥९॥

**टीका—दत्त्वा** विश्राण्यैत**तद्** अभयदानं सर्वविरतिमङ्गीकृत्येति भावः **यः** अनिर्दिष्टनामा **मूढो** बालिशः **पुनस्तदूर्ध्वम् आरम्भादिषु** हिंसापरिग्रहादिषु **प्रवर्तते** प्रवृत्तिं वितनोति **स** मूढो **भावदरिद्रो** विरत्या तत्कारणभूतया च समतया विकलत्वात् परमार्थदुर्गतो **नियमाद्** अवश्यं **दानधर्माणां** ज्ञानाभयादिदानलक्षणधर्माणां **दूरे** विप्रकृष्ट इति॥९॥ अथ फलनिरूपणद्वारेणाऽधिकारित्वमाविष्करोति—

**इहपरलोगेसु भयं जेण न संजायए कयाइयवि।**
**जीवाणं तक्कारी जो सो दाया उ एयस्स॥१०॥**

**अक्षरगमनिका**—येनेहपरलोकेषु भयं न संजायते कदाचिदपि जीवानां तत्कारी यः स दाता त्वेतस्य॥१०॥

**टीका—येना**ऽभयदानेन **इहपरलोकेषु** अत्र परत्र च भावानुष्ठानस्य सानुबन्धत्वाद् अथवा प्राकृतत्वाद्विभक्तिव्यत्यय इति इहपरलोकाभ्यां मनुष्यस्य मनुष्याद्भयम् इहलोकभयमित्याद्युक्तलक्षणाभ्यां दातु**र्भयं** साध्वसं **न** नैव **संजायते** भवति **कदाचिदपि** कस्मिञ्चिदपि काले, **अयं भावः**—'दत्तं लभ्यत' इत्यभयदानस्य दाता भयानामभाजनं भवति, यदागमोऽपि–सामाइयमाहु तस्स जं, जो अप्पाण भयं न दंसए। (सूत्रकृताङ्ग २-२-१७) **तत्कारी** अभयङ्करो **जीवानां** सत्त्वानां **यः** पूर्ववत् **स** सर्वविरतिधर एव **दाता** प्रयच्छक **एतस्या**ऽभयदानस्य **तुर**वधारणे भिन्नक्रमश्च॥१०॥ अनन्तरं सर्वविरतिधरः अभयदानस्य दाता निरूपितः। अधुना देशविरतिधरमाह—

**इय देसओ वि दाया इमस्स एयारिसो तहिं विसए।**
**इहरा दिन्नुद्दालणपायं एयस्स दाणं ति॥११॥**

**अक्षरगमनिका**—इति देशतोऽपि दाताऽस्यैतादृशस्तत्र विषये, इतरथा दत्तोद्दालनप्रायं दानमेतस्येति॥११॥

**टीका—इति** एवं न केवलं सर्वतो दाता **देशतोऽपि** देशविरतिधरोऽपि **दाता** प्रयच्छकः **अस्या**ऽभयदानस्यै**तादृशः** श्रीजिनवचनज्ञानयोगेन तथा प्रस्तावाच्च श्रावककुलमर्यादासमाश्रयणेनोत्तमः स्थिरप्रतिज्ञश्च **तत्र विषये** प्रत्याख्याततत्रसकायगोचरेऽनुपालनतः स्थावरकायविषये च भावतः अनुकम्पापरः सर्वविरतिमनोरथत्वात्। **इतरथा** प्रत्याख्यातस्याननुपालनेऽप्रत्याख्यातविषये चानुकम्पाऽभावे **दत्तोद्दालनप्रायं**

दत्तस्याऽतिसृष्टस्य यत् पुनर्बलादादानं लोपनमिति यावत्तेन तुल्यं **दानम्** उक्तस्वरूपम् **एतस्य** पुनरारम्भादिषु प्रवृत्तस्य। **इतिर्हेतौ** यस्मादभयदानं दत्त्वा पुनस्तत्र प्रवर्तनं दत्तोद्दालनप्रायं दानं तस्मात् दृढप्रतिज्ञः सन्नभ्युपगतां सर्वविरतिं देशविरतिं च यावज्जीवमनुपालयेदिति ॥११॥ अथोपसंहरन् ज्ञानदययोर्दानं दाता च यथा सम्यग् भवति तथाऽऽह—

**नाणदयाणं खंतीविरईकिरियाइ तं तओ देइ।**
**अन्नो दरिद्दपडिसेहवयणतुल्लो भवे दाया॥१२॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—ज्ञानदययोस्तत्तकः क्षान्तिविरतिक्रियया ददाति, अन्यो दाता दरिद्रप्रतिषेध-वचनतुल्यो भवेत् ॥१२॥

**टीका—ज्ञानदययो**र्बोधाभययो**स्तद्** दानं **तको** स दाता **क्षान्तिविरतिक्रियया** क्षान्तिर्वक्ष्यमाणा वचनलक्षणा धर्मस्वरूपा वा तत्प्रधाना विरतिश्चारित्रधर्मस्तत्क्रियया चरणकरणरूपया समितिगुप्तिपालनलक्षणया वा करणभूतया **ददाति** प्रयच्छति। यदि वा क्षान्तिविरतिक्रिययाऽन्वितो दाता ज्ञानाभययोर्दानं ददाति। **अन्य** क्षान्तिविरतिक्रियया हीनो **दाता** प्रयच्छको **दरिद्रप्रतिषेधवचनतुल्यः** अनादृतो **भवेद्** जायेत। तथाहि-यथा किञ्चित्प्रयोजनमाश्रित्य सभायां निःस्वस्य प्रतिषेधकवचनमनादृतं भवति तथैवान्यो दाताऽनादृतो भवेत्। अथवा याचकं प्रति दरिद्रस्य प्रतिषेधवचनं नास्तिरूपं भवतीति नास्तितुल्यो दाता भवेत्। अयं भावः—ज्ञानाभयदानस्य दाता क्षान्तिविरतिक्रियाहीनो नैव भवतीति ॥१२॥ साम्प्रतमभयदानस्य प्रवरत्वाद् दाताप्येतस्यैश्वर्यसम्पन्नो भवतीत्युच्यते—

**एवमिहेयं पवरं सव्वेसिं चेव होइ दाणाणं।**
**इत्तो उ निओगेणं एयस्स वि ईसरो दाया॥१३॥**

**अक्षरगमनिका**—एवमिहैतदेव सर्वेषां दानानां प्रवरं भवतीतस्त्वेतस्यापि दाता नियोगेनेश्वरः ॥३॥

**टीका—एवम्** अनन्तरोक्तनीत्या क्षान्तिविरतिक्रियानिबन्धनाद् **इह** दानप्रस्तावे **एतद**ेवाऽभयदानमेव **सर्वेषां** निखिलानां **दानानां** ज्ञानाभयादिलक्षणानां **प्रवरं** श्रेष्ठं **भवति** समस्ति। **इतः** अत एव **तु**रवधारणे न केवलं ज्ञानसुपात्रादिदानानाम् **एतस्यापि** अभयदानस्यापि **दाता** प्रयच्छको नियोगेनाऽवश्यंतया **ईश्वरः** सकल-सत्त्वहिताशयेन परद्रोहविरतत्वाद् धर्मराज्यवत्त्वाच्च भावत ऐश्वर्यवान् भवतीति शेषः ॥१३॥ अनन्तरं ज्ञानाभययोर्दाता ज्ञानसम्पन्नत्वाद् विरतिसम्पन्नत्वाच्च भावत ईश्वर उक्तः। अधुना भावेश्वरस्यौदार्यसम्पन्नस्यैव धर्मोपग्रहकरं सुपात्रदानं निरूप्यते—

**इय धम्मुवग्गहकरं दाणं असणाइगोयरं तं च।**
**पत्थमिव अन्नकाले य रोगिणो उत्तमं नेयं॥१४॥**

**अक्षरगमनिका**—इति धर्मोपग्रहकरं दानमशनादिगोचरं तच्चान्नकाले च रोगिणः पथ्यमिवोत्तमं ज्ञेयम् ॥१४॥

**टीका—इति** एवमुपग्रहप्रवृत्तत्वाद् यद् **धर्मोपग्रहकरं** ज्ञानाद्युपष्टम्भकं **दानं** सुपात्रदानम् **अशनादिगोचरम्** अन्नपानशय्यावस्त्रपात्रादिविषयं **तत्** दानं **चः** पुनरर्थ **उत्तमं** श्रेष्ठं **ज्ञेयं** बोद्धव्यम्, किमिव? **अन्नकाले**

भोजनवेलायां **रोगिणो** व्याधितस्य **पथ्यमिव** हितमिव भवरोगनाशकत्वात्। ज्ञानपूर्वकत्वेन हि सुपात्रदानस्य मुनिश्राद्धसम्यग्दृशां गुणाऽनुमोदनद्वारेण बोधिप्राप्त्या मोक्षफलत्वादिति ॥१४॥ किञ्च–विधिद्रव्यदातृपात्र-विशेषाद् दानविशेष इति सुपात्रदानविधिमाह—

**सद्धासक्कारजुयं सक्कमेण तहोचियम्मि कालम्मि।**
**अन्नाणुवघाएणं वयणा एवं सुपरिसुद्धं ॥१५॥**

**अक्षरगमनिका**—तथोचिते काले्ऽन्यानुपघातेन वचनात् श्रद्धासत्कारयुतं सक्रमेणैवं सुपरिशुद्धम् ॥१५॥

**टीका**—यथा बहुगुणं स्यात् **तथोचित्ते काले**–भोजनवेलायाम्, यदुक्तं—

कालेऽल्पमपि लाभाय, नाकाले कर्म बह्वपि।
वृष्टौ वृद्धिः कणस्यापि, कणकोटिर्वृथाऽन्यथा ॥१॥ (द्वा. द्वा. १-८)

तथा–

पहसंत गिलाणेसु, आगमगाहिसु तह य कयलोए।
उत्तरपारणगंमि अ, दिन्नं सुबहुफलं होइ ॥१॥ (श्रा. वि. प्र.)

'पहसंत' पथश्रान्ते। तथा 'कयलोए' कृतलोचे। **अन्यानुपघातेन** भर्तव्यानुपरोधेन तथौचित्येन याचकादिभ्योऽपि दानेन **वचनात्** श्रीजिनोक्तविधिना–सभक्ति साधून् निमन्त्र्य तैः सह गृहमायाति स्वयमागच्छतो वा मुनीन् दृष्ट्वा संमुखं गमनादिकं करोतीत्यादिना, **श्रद्धासत्कारयुतं** सत्पात्रं बहुपुण्यैरवाप्यते यदि वाऽऽत्मानुग्रहार्थमेवैतदित्यादरेण तथाऽभ्युत्थानाऽऽसनप्रदानेत्यादिसत्क्रिययाऽन्वितं **सक्रमेण** भिक्षादोषाद्य-दूषितान्नपानवस्त्रादेर्भोजनाद्यनुक्रमेण यदि वा दुर्लभोत्तमवस्तुक्रमेण, **एवमनन्तरोक्तनीत्या** तथा वक्ष्यमाण-सुपात्रदानदोषैरदूषितं भूषणैश्च भूषितं दानं दत्ते ततो स्वगृहद्वारादि यावदनुव्रज्य निवर्तते। उक्तं च–

अनादरो विलम्बश्च, वैमुख्यं विप्रियं वचः। पश्चात्तापश्च पञ्चाऽपि सद्दानं दूषयन्त्यमी ॥१॥ आनन्दाश्रूणि रोमाञ्चो, बहुमानं प्रियं वचः। किञ्चानुमोदना पात्रदानभूषणपञ्चकम् ॥१॥ (श्रा. वि. प्र.) तथा तदवसराद्यायातसाधर्मिकान् सह भोजयति, तेषामपि पात्रत्वात्। एवं दत्तं **सुपरिशुद्धम्** अतिशयेनानवद्यं विज्ञेयमित्यध्याहार्य दिव्यौदारिकाद्यद्भुतभोगाभीष्टसर्वसुखसमृद्धिसाम्राज्यादिसंयोगप्राप्तिपूर्वकनिर्विलम्बनिर्वाण-शर्मप्राप्तिफलत्वादिति ॥१५॥ अथाऽस्य सुपात्रदानस्याधिकारिदातृस्वरूपमाह—

**गुरूणाऽणुन्नायभरो नाओवज्जियधणो य एयस्स।**
**दाया अदुत्थपरियणवग्गो सम्मं दयालू य ॥१६॥**

**अक्षरगमनिका**—गुरुणाऽनुज्ञातभरो न्यायोपार्जितधनः अदुःस्थपरिजनवर्गः सम्यग्दयालुश्चैतस्य च दाता ॥१६॥

**टीका**—**गुरुणा** पितृपितामहादिनाऽ**नुज्ञातभरो** न्यस्तकुटुम्बभरणभारः पुनः कीदृशः? **न्यायोपार्जितधनो** व्यवहारशुद्ध्यार्जितवैभवो यतो व्यवहारशुद्धिरेव धर्मस्य मूलम्, तथाहि-व्यवहारशुद्ध्या अर्थशुद्धिस्तत आहारशुद्धिस्ततो देहशुद्धिस्ततो धर्मयोग्यता ततो यद्यत्कृत्यं करोति तत्तत् सफलं भवति। अन्यथा यत् करोति तदफलं भवति। व्यवहारशुद्धिरहितो धर्मं हीलयति ततः स्वपराऽबोधिः। तस्मात्

तत् कुर्याद् येनाऽज्ञजनो धर्मं न खिंसेतेति। पुनः किंलक्षणः? **अदुःस्थपरिजनवर्गो** न विद्यते दुःस्थः खिन्नमनाः परिजनवर्गो यस्य स तथा, धर्मकार्ये प्रवृत्तेन विशेषतः पराऽप्रीतिः परिहार्येति। पुनः कथम्भूतः? **सम्यगुदयालुश्च** ज्ञातभवस्थितिदौःस्थ्यात् सर्वत्राविशेषेण कृपालुः, **चः** समुच्चये **एतस्य** धर्मोपग्रहकरदानस्य **चः** पुनरर्थे **दाता** प्रयच्छक इति॥१६॥ अनन्तरं धर्मोपग्रहकरदानस्य दाता सम्यग्दयालुरुक्तः अधुना तस्यानुकम्पादानमपि धर्मोपग्रहहेतुर्जायत इत्युच्यते—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अणुकंपादाणं पि य अणुकंपागोयरेसु सत्तेसु।**
**जायइ धम्मोवग्गहहेऊ करुणापहाणस्स॥१७॥**

**अक्षरगमनिका**—अनुकम्पागोचरेषु च सत्त्वेष्वनुकम्पादानमपि करुणाप्रधानस्य जायते धर्मोपग्रहहेतुः॥१७॥

**टीका**—**अनुकम्पागोचरेषु** करुणास्पदेषु **चः** पुनरर्थे **सत्त्वेषु** जीवेषु न केवलं ज्ञानदानादीनि **अनुकम्पादानमपि** पूर्वोक्तस्वरूपं **करुणाप्रधानस्या**ऽनुक्रोशपरस्य **जायते** भवति **धर्मोपग्रहहेतुः** प्रवचनप्रशंसाद्वारेणाऽनेकेषां धर्मबीजाधानादिकारणमिति॥१७॥ ततः किमित्याह—

**ता एयं पसत्थं तित्थयरेणावि भयवया गिहिणा।**
**सयमाइन्नं दियदेवदूसदाणेण गिहिणो वि॥१८॥**

**अक्षरगमनिका**—तस्मादेतदपि प्रशस्तं भगवता तीर्थकरेणापि गृहिणा स्वयमाचीर्णं तथा गृहिणोऽपि द्विजस्य देवदूष्यदानेन॥१८॥

**टीका**—यस्माद् धर्मोपग्रहेतु**स्तस्मात्** कारणाद् **एतदपि** अनुकम्पादानमपि **प्रशस्तं** श्लाघ्यम्। किञ्च–एतन्न केवलं धर्मिजनेनाचीर्णं **भगवता** विशुद्धमतिश्रुतावधिज्ञानयुतेन **तीर्थकरेणापि** ज्ञानादिभावतीर्थप्रवर्तकधर्मनायकेनापि **गृहिणा** गृहस्थपर्याये वर्तमानेन सांवत्सरिकदानव्याजेन **स्वय**मात्मना- **ऽऽचीर्णम**नुष्ठितम्, तदुक्तं–

धर्माङ्गत्वं स्फुटीकर्तुं दानस्य भगवानपि। अत एव व्रतं गृह्णन् ददौ संवत्सरं वसु॥१॥ अपि च—आस्तां गृहिणा प्रव्रजितेनापि भगवताऽऽस्तां संयतस्य **गृहिणोऽपि** पितुर्मित्रगृहस्थस्यापि **द्विजस्य** ब्राह्मणस्य **देवदूष्यदानेन** महाभिनिष्क्रमणावसरशक्रोपनीतदिव्यवस्त्रदानेना**ऽऽचीर्ण**मेतत्। ननु साधोरप्येतदापत्तिरिति चेत्, उच्यते–पुष्टालम्बनमाश्रित्य भगवतो दृष्टान्ताद् युगप्रवरसुहस्तिना सम्प्रतिमहाराजजीवरङ्कस्य यथा दत्तं तथा दानेऽदोषः अनुकम्पानिमित्तत्वात्। तदुक्तं—साधुनाऽपि दशाभेदं, प्राप्यैतदनुकम्पया। दत्तं ज्ञाताद्भगवतो रङ्कस्येव सुहस्तिना॥१॥ (द्वा. द्वा. १-१०) न चैतदापवादिकं यतिदानमधिकरणं विशुद्धाशयात्, अपि तु गुणस्थानं गुणान्तरनिबन्धनम्। श्राद्धभोजनविधावप्युक्तं–तथा ददात्यौचित्येनाऽन्येभ्योऽपि द्रमकादिभ्यः। न प्रत्यावर्तयति तान्निराशान्। न कारयति कर्मबन्धम्। न गर्हयति धर्मम्। न भवति निष्ठुरहृदयः। भोजनावसरे द्वारपिधानादि न हि महतां दयावतां वा लक्षणमित्यादि। आगमेप्युक्तं—

नैव द्वारं पिहावेइ, भुंजमाणो सुसावओ।
अनुकंपा जिणिंदेहिं, सड्ढाण न निवारिआ॥१॥

अत्रैवानन्तरविंशिकायामप्युक्तं—

दट्ठूण पाणिनिवहे, भीमे भवसायरंमि दुक्खत्तं। अविसेसओऽणुकंपं, दुहावि सामत्थओ कुणइ ॥१॥ श्रीभगवत्यां च श्राद्धवर्णने–'अवंगुअदुवारा' इति विशेषणेन भिक्षुकादिप्रवेशार्थं सर्वदाऽप्यपावृतद्वारा इत्युक्तम्। दुर्भिक्षादौ दीनोद्धारः प्रवचनप्रभावनाहेतुत्वाद् विशेषफलः। वैक्रमीये १३१५ तमेऽब्दे महादुर्भिक्षे साधुर्जगडुर्द्वादशोत्तरशतसत्रागारैर्दानं ददौ। ततो दयादानं भोजनावसरे विशिष्य कार्यमिति ॥१८॥ अधुनौघतोऽपि दानधर्मस्य प्राधान्यमाह—

**धम्मस्साइपयमिणं जम्हा सीलं इमस्स पज्जंते।**
**तव्विरयस्साबि जओ नियमा सनिवेयणा गुरुणो ॥१९॥**

**अक्षरगमनिका**—यस्मात् शीलमस्य पर्यन्ते, यतश्च तद्विरतस्यापि नियमाद् गुरोः स्वनिवेदना तस्माद् धर्मस्याऽऽदिपदमिदम् ॥१९॥

**टीका—यस्मात्** कारणात् **शीलं** विरतिरूपम् **अस्य** दानस्य **पर्यन्ते** पश्चाद् **यतो** यस्माच्च **तद्विरतस्यापि** द्रव्यदानविरतस्य साधोरपि यदि वा तद् दानं विरतस्यापि साधोरपि **नियमा**दवश्यम् किंस्वरूपम्? **गुरोरा**चार्यस्य **स्वनिवेदना**—प्रत्यहं 'बहुवेल संदिसावेह' इत्यादिना स्वस्याऽऽत्मनो निवेदना समर्पणम् एतत्स्वयमानीत-वस्त्रपात्रपिण्डाद्युपलक्षणम् तस्माद् **धर्मस्य** मोक्षफलस्याऽऽदिपदं प्रथमसोपानं प्रथमस्थानं पीठिकालक्षणं **वेदं** दानम्, इत एव धर्मप्रारम्भ इति। किञ्च–त्यागलक्षणदानधर्मस्य चतुर्विधेऽपि धर्मेऽनुस्यूतत्वात्, तथाहि–दाने धनत्यागः शीले भोगत्यागस्तपसि रसत्यागो भावे च रागादित्यागः। **इदं तु ध्येयम्**—दानशीलतपोभावानामित्थं क्रम उत्पत्तिमाश्रित्य ज्ञेयः। दुष्करतया प्राधान्यात्तु पश्चानुपूर्व्या क्रमश्चारुर्यतो दाने बाह्यानित्यद्रव्यस्य, शीले समीपवर्तिकुटुम्बस्य तपसि समीपतरदेहममत्वस्य ततोऽपि भावे च समीपतममनःप्रभृतिसर्वस्वस्य त्यागः। एवं भावधर्मे त्यागस्य पराकाष्ठा प्रादुर्भवति। अत एव चारित्री धनस्वजनदेहमनोममत्वमोचनेन गुरुं प्रति सर्वथा समर्पितो भवति। ततो रागादिक्षयस्ततो मुक्तिः। **यदागमः**— एयं कुसलस्स दंसणं, तद्दिट्ठिए, तप्पुरक्कारे, तस्सन्नी, तन्निवेसणे॥ आ० १-५-६-१६८॥१९॥ अथ दानोपदेशदानद्वारोपसंहरन्नाह—

**तम्हा सत्तऽणुरूवं अणुकंपासंगएण भव्वेण।**
**अणुचिट्ठियव्वमेयं इत्तोच्चिय सेसगुणसिद्धिः ॥२०॥**

॥ इति दानविंशिका सप्तमी ॥

**अक्षरगमनिका**—इत एव शेषगुणसिद्धिस्तस्मादनुकम्पासङ्गतेन भव्येन शक्त्यनुरूपमनुष्ठातव्यमेतत् ॥२०॥

**टीका**—यत **इत एव** दानादेव **शेषगुणसिद्धिः** सम्यग्दर्शनादिनिर्वाणगमनपर्यवसानगुणप्राप्ति**स्तस्मात्** कारणाद् **अनुकम्पासङ्गतेन** करुणान्वितेन **भव्येन** भाविभद्रसत्त्वेन **शक्त्यनुरूपं** यथासामर्थ्यम् **अनुष्ठातव्यं** विधातव्यम् **एतद्** दानम्। श्रूयते हि श्रीऋषभस्वामिजीवधन्यसार्थवाहप्रभृतीनां सुपात्रदानत एव सम्यक्त्वप्राप्तिः। अनुकम्पादानेन च श्रीशान्तिजिनजीवमेघरथनृपः परम्परात एकस्मिन्नेव भवे चक्रितीर्थकृत्पदभोगी बभूव। श्रीजिनभवनमण्डितवसुधः श्रीसम्प्रतिसम्राट् श्रीजिनशासनप्रभावकोऽभवत्। किं बहुना? श्रीजिनभवन-बिम्बाऽऽगमचतुर्विधसङ्घस्वरूपायां सप्तक्षेत्र्यां यदुप्यते धनं तज्जायतेऽनन्तगुणं मोक्षफलमिति ॥२०॥

*

# अष्टमी पूजाविधिविंशिका

अनन्तरं दानविंशिकायां यदुक्तं 'इत्तोच्चिय सेसगुणसिद्धि' त्ति तदविलम्बेन गुणसिद्धिमभिलषता दानादिचतुर्विधधर्मोपदेशको गुणसमुद्रः अर्हन् देव एव पूजनीय इति पूजाविधिविंशिका प्रारभ्यते, तस्याश्चेयमाद्या गाथा—

**पूया देवस्स दुहा विन्नेया दव्वभावभेएणं।**
**इयरेयरजुत्ता वि हु तत्तेण पहाणगुणभावा॥१॥**

**अक्षरगमनिका**—पूजा देवस्य तत्त्वेनेतरेतरयुक्तापि प्रधानगौणभावात् खलु द्रव्यभावभेदेन द्विधा विज्ञेया॥१॥

**टीका—पूजा** सपर्या **देवस्य** पूजार्हस्याऽर्हतस्**तत्त्वेन** निश्चयनयाभिप्रायेण **इतरेतरयुताऽपि** परस्परसङ्कलितापि द्रव्यभावपूजा, तथाहि—गृहस्थानां पुष्पादिद्रव्यपूजा चैत्यवन्दनलक्षणया भावपूजयान्विता भवति। साधूनां च श्रीजिनाज्ञापालनरूपा भावपूजा श्रावकविहितद्रव्यपूजादिदर्शनेन प्रमोदादनुमतिद्वारेण, द्रव्यपूजया सङ्कलिता भवति। तदुक्तं पञ्चवस्तुग्रन्थेऽपि—तंतम्मि वंदणाए पूअणसक्कारहेउमुस्सग्गो। जइणोवि हु निद्दिट्ठो ते पुणदव्वत्थयसरूवे॥१२११॥ तद्वृत्तिः—'तन्त्रे' सिद्धान्ते वन्दनायां पूजनसत्कार-हेतुः—एतदर्थमित्यर्थः, कायोत्सर्गो यतेरपि निर्दिष्टः, 'पूयणवत्तियाए सक्कारवत्तियाए' त्ति वचनात्, तौ पुनः पूजनसत्कारौ द्रव्यस्तवरूपौ, नान्यरूपाविति गाथार्थः॥११॥ पूजाविधिसदुपदेशदानेन च कारणतोऽपि

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

द्रव्यपूजया समन्विताऽस्ति, यदुक्तं च ललितविस्तरावृत्तौ—साधोः स्वकरणमधिकृत्य द्रव्यस्तवप्रतिषेधः, न पुनः सामान्येन, तदनुमतिभावात्। भवति च भगवतां पूजासत्कारावुपलभ्य साधोः प्रमोदः,—'साधु शोभनमिदमेतावज्जन्मफलमविरतानामि'तिवचनलिङ्गगम्यम्। तदनुमतिरियम्; उपदेशदानतः कारणापत्तेश्च। ददाति च भगवतां पूजासत्कारविषयं सदुपदेशं 'कर्तव्या जिनपूजा, न खलु वित्तस्यान्यच्छुभतरं स्थानमि'तिवचनसन्दर्भेण। तत्कारणमेतत्। अनवद्यं च तद् दोषान्तरनिवृत्तिद्वारेण। अयमत्र प्रयोजकोंऽशः, तथाभावतः प्रवृत्तेः उपायान्तराभावात्। नागभयसुतगर्ताकर्षणज्ञातेन भावनीयमेतत् तदेवं साधुरित्थमे-वैतत्सम्पादनाय कुर्वाणो नाविषयः, वचनप्रामाण्यात्, इत्थमेवेष्टसिद्धेः, अन्यथाऽयोगादिति।

अनन्तरोक्तनीत्येतरेतरयुक्ताऽपि व्यवहारनयाभिप्रायेण **प्रधानगौणभावाद्** मुख्योपसर्जनभावादेव **हु** प्राकृतत्वादवधारणे **द्रव्यभावभेदेन** द्रव्यपूजा भावपूजा चेति **द्विधा** द्विप्रकारा, तथाहि—श्रमणोपासकानां द्रव्यप्राधान्यादेव पुष्पादिद्रव्यपूजा प्रधाना भावपूजा च गौणा, यतीनां च श्रीजिनाज्ञापालनलक्षणा भावपूजा प्रधाना पुष्पादिद्रव्यपूजा च गौणा **विज्ञेया** समवसेया। तदुक्तं च—

दुविहा जिणिंदपूआ दव्वे भावे य, तत्थ दव्वंमि दव्वेहिं जिणपूआ जिनाणापालनं भावे॥१॥
अथ द्रव्यपूजामेव विस्तरत आह—

**पढमा गिहिणो सा वि य तहा तहा भावभेयओ तिविहा।**
**कायवयमणविसुद्धी सम्भूओगरणपरिभेया॥२॥**

**अक्षरगमनिका**—प्रथमा गृहिणः साऽपि च तथा तथाभावभेदतस्त्रिविधा कायवचनमनोविशुद्ध्या सम्भूतोपकरणभेदात्॥२॥

**टीका—प्रथमा** द्रव्यपूजा द्रव्यप्राधान्याद् भवति **गृहिणो** गृहस्थस्य। न केवलं पिण्डस्थ-पदस्थरूपातीतावस्थाभेदेनार्हत्स्तोत्ररूपा भावपूजा तथोपशान्तक्षीणमोहसयोगिगुणस्थानकभेदात् प्रतिपत्तिलक्षणा पूजा त्रिविधा, **साऽपि** द्रव्यपूजाऽपि त्रिविधेति सम्बन्धः। यथा यथा योगाद्यवञ्चकतालक्षणः समाधिर्भवति **तथा तथा** तेन तेन प्रकारेण **भावभेदतो** जघन्यमध्यमादिभेदात् **त्रिविधा** त्रिप्रकारा भवति। मतान्तरेण त्वाऽऽह—**कायवचनमनोविशुद्धया** काययोगो वाग्योगो मनोयोगो च कायवाग्मनोयोगास्तेषां विशुद्धया कायादिदोषपरिहाररूपयोपात्तं द्रव्यं वित्तं तेन करणभूतेन द्रव्यपूजाऽपि त्रिविधा। **सम्भूतोपकरणभेदाद्वा** प्रभुपूजार्थं सम्भूतानि एकत्रितानि यान्युपकरणानि प्रवरपुष्पादीनि तेषां वक्ष्यमाणरीत्या परिभेदात् त्रिधेति ॥२॥ अनन्तरोक्तद्रव्यपूजात्रैविध्यं यथार्थसंज्ञास्वरूपफलनिर्देशपुरस्सरं निरूप्यते—

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

**सव्वगुणाहिगविसया नियमुत्तमवत्थुदाणपरिओसा।**
**कायकिरियापहाणा समंतभद्दा पढमपूया ॥३॥**

**अक्षरगमनिका—**सर्वगुणाधिकविषया नियमोत्तमवस्तुदानपरितोषा कायक्रियाप्रधाना समन्तभद्रा प्रथमा पूजा ॥३॥

**सर्वगुणाधिकविषया** सर्वैः अखिलैर्गुणैरधिकः अर्हन् देवाधिदेवस्तद्विषया प्रथमा पूजेति सम्बन्धः। **कायक्रियाप्रधाना**—काययोगसारा, पुनः किंलक्षणा ? **नियमोत्तमवस्तुदानपरितोषा** नियमाद् अवश्यंतया सदोत्तमवस्तु प्रधानपुष्पादि तद्दानात् परितोषो यस्याः सकाशात् सा तथा। किंफला ? **समन्तभद्रा** विघ्नोपशामकत्वेन सम्प्रतिभद्रत्वाद् भाविभद्रत्वाच्च समन्ताद् भद्रेति यथार्थनामा प्रथमा पूजा। उक्तं च ग्रन्थकृतैव पूजा-षोडशके—प्रवरं पुष्पादि सदा, चाद्यायां सेवते तु तद्दाता। सेवते ददातीत्यर्थः, धात्वनेकार्थत्वादिति ॥३॥ अथ द्वितीयामाह—

**बीया उ सव्वमंगलनामा वायकिरियापहाणेसा।**
**पुव्वुत्तविसयवत्थुसु ओचित्ताणायणभेएण ॥४॥**

**अक्षरगमनिका—**एषा द्वितीया तु सर्वमङ्गलनामा वाक्क्रियाप्रधाना पूर्वोक्तविषया वस्तूनामौ-चित्येनाऽऽनयनभेदेन ॥४॥

**टीका—एषा** ग्रन्थकारहृदयस्थत्वात् प्रत्यक्षा क्रमापेक्षया **द्वितीया** पुनः **तुः** पुनरर्थे **सर्वमङ्गलनामा** अभ्युदयसाधनाद् **वाक्क्रियाप्रधाना** वचनयोगसारा **पूर्वोक्तविषया** देवाधिदेवार्हद्वता, प्राकृतत्वाद्विभक्तिव्यत्यय इति **वस्तूनां** प्रवरपुष्पादीनाम् **औचित्येन** प्रोत्साहकवचनेन समधिकमूल्यार्पणेन वा सेवकादिभिः **आनयनभेदेन** समानयनप्रकारेण। उक्तं च—आनयति चान्यतोऽपि हि नियमादेव द्वितीयायाम् ॥४॥ साम्प्रतं चरमामाह—

**तइया परतत्तगया सव्वुत्तमवत्थुमाणसनिओगा।**
**सुद्धमणजोगसारा विन्नेया सव्वसिद्धिफला ॥५॥**

**अक्षरगमनिका—**तृतीया परतत्त्वगता सर्वोत्तमवस्तुमानसनियोगा शुद्धमनोयोगसारा विज्ञेया सर्वसिद्धिफला ॥५॥

**टीका—तृतीया** क्रममाश्रित्य चरमा **परतत्त्वगता** परमेश्वरविषया **सर्वोत्तमवस्तुमानसनियोगा** सर्वोत्तमं वस्तु त्रैलोक्यसुन्दरं यत् पारिजातादि पुष्पादि नन्दनवनादिगतं तन्मनसाऽऽपादयति, तदुक्तं च—त्रैलोक्यसुन्दरं

यद् मनसाऽऽपादयति तत्तु चरमायाम्, एवम्भूतो मानसो मनःसम्बन्धी नियोगो व्यापारो यस्यां सा तथा,**शुद्धमनोयोगसारा** अनवद्यान्तःकरणप्रधाना **विज्ञेया** समवगन्तव्या नाम्ना **सर्वसिद्धिफला** निर्वृत्तिकरणेन अजरामरत्वसाधनात्। यदुक्तं—

विघ्नोपशमन्याद्या मताऽभ्युदयसाधनी चान्या। निर्वाणसाधनी च फलदा तु यथार्थसंज्ञाभिः ॥१॥ ५॥

अथासां कर्तृन्निरूपयति—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**पढमावंचकजोगा सम्मदिट्ठिस्स होइ पढम त्ति।**
**इयरेयरजोगेणं उत्तरगुणधारिणो नेया ॥६॥**

**तइया तइयावंचकजोगेणं परमसावगस्सेवं।**
**जोगा य समाहीहिं सा हुज्जुगकिरियफलकरणा ॥७॥**

**अक्षरगमनिका**—प्रथमाऽवञ्चकयोगात् सम्यग्दृष्टेर्भवति प्रथमेति। इतरेतरयोगेनोत्तरगुणधारिणो ज्ञेया ॥६॥ तृतीया तृतीयाऽवञ्चकयोगेन परमश्रावकस्येयं योगात् समाधिभिश्च साध्वृजुकक्रिया-फलकरणा ॥७॥

**टीका—प्रथमाऽवञ्चकयोगात्** क्रमाऽपेक्षया क्षयोपशमविशेषमाश्रित्य वा प्रथमः अवञ्चकयोगो योगाऽवञ्चकनामा समाधिविशेषस्तस्माद् हेतोः **सम्यग्दृष्टेः** पूर्वोक्तशमसंवेगादिलक्षणोपेतस्य **भवति** वर्तते **प्रथमा** समन्तभद्रा पूजा **इतिः** समाप्तौ। अथ द्वितीयाया विधातारमाह–**इतरा** द्वितीया सर्वमङ्गला पूजा **इतरयोगेन** इतरो द्वितीयो योगः अवञ्चकयोगः क्रियाऽवञ्चकनामा समाधिविशेषस्तेन करणभूतेन **उत्तरगुणधारिणः** सामायिकपौषधोपवासादिप्रत्याख्यानलक्षणोत्तरगुणधारिश्रावकस्य **ज्ञेया** बोद्धव्या ॥६॥ साम्प्रतं तृतीयाया अनुष्ठातारं निर्दिशति–**तृतीया** सर्वसिद्धिफला **तृतीयाऽवञ्चकयोगेन** फलाऽवञ्चकयोगेन समाधिविशेषेण हेतुभूतेन **परमश्रावकस्य** श्रमणभूतसंज्ञाम् एकादशीं श्रमणोपासकप्रतिमां वहतः सर्वोत्कृष्टश्रमणोपासकस्य प्रव्रज्याभिमुखस्य वा **इयं** प्रस्तुता पूजा भवतीति शेषः, यदि वैवम् इत्थम्भूताद् **योगाद्** अनुपकृतपरहितरतदेवाधिदेवपूजायां प्रयुक्तमनोवाक्कायव्यापारात् **समाधिभिश्च** अनन्तरोक्ताऽवञ्चकयोगलक्षणैश्च चः समुच्चये **सा** पूजाऽवश्यं **हिर**वधारणे ऋजुकक्रियाफलकरणा जायत इति संटङ्कः, यदि वा प्रकृतपूजा साध्वृजुकक्रियाफलकरणा साधोः ऋजुः संयमः स एव ऋजुकस्तस्य क्रिया चरणकरणरूपा सैव फलं तत्करोतीति, अथवा साधुः शोभनः सानुबन्धत्वात् शेषं पूर्ववत्, सर्वविरतिं प्रापयतीत्यर्थः। यद्वा संयमक्रियायाः फलं निर्वृत्तिस्तां करोतीति। प्रतिमाशतके तु 'साहुजुगकिरियफलकरणे'ति पाठ उपलभ्यते तथाप्युक्तार्थ एव। साधूनाश्रित्य अवञ्चकयोगानां स्वरूपसूचकाः श्लोका इमे योगदृष्टिसमुच्चयग्रन्थे—

सद्भिः कल्याणसम्पन्नैर्दर्शनादपि पावनैः।
तथादर्शनतो योग आद्यावञ्चक उच्यते ॥२१६॥

तेषामेव प्रणामादिक्रियानियम इत्यलम्।
क्रियावञ्चकयोगः स्यान्महापापक्षयोदयः ॥२२०॥

फलावञ्चकयोगस्तु सद्भ्य एव नियोगतः।
सानुबन्धफलावाप्तिर्धर्मसिद्धौ सतां मता ॥२२१॥

एवं त्रिविधाया अपि समन्तभद्रादिद्रव्यपूजायाः कर्तारः सम्यग्दृष्ट्यादय उक्ताः ॥७॥ अधुना प्रस्तुतद्रव्यपूजायाः कर्तारं ग्रन्थ्यासन्नापुनर्बन्धकमाश्रित्योच्यते—

**पढमकरणभेएणं गंथासन्नस्स धम्ममित्तफला।**
**सा हुज्जुगाइभावो जायइ तह नाणुबंधुत्ति ॥८॥**

**अक्षरगमनिका**—प्रथमकरणभेदेन ग्रन्थ्यासन्नस्य ऋजुकादिभावो न तथाऽनुबन्धो जायत इति सा हि धर्ममात्रफला ॥८॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**—**प्रथमकरणभेदेन** पूर्वोक्तस्वरूपयथाप्रवृत्तकरणपरिणामोल्लङ्घनेन आद्यपरिणामोपरिवर्तमानस्य **ग्रन्थ्यासन्नस्य** सूचनात् सूत्रमिति पूर्वोक्तलक्षणग्रन्थिदेशं प्राप्तस्याऽपुनर्बन्धकस्य सतः **ऋजुकादिभावः** सर्वविरतिदेशविरत्यादिपरिणामो **न** नैव **तथाऽनुबन्धः** तथाविधसानुबन्धो **जायते** भवति **इति** हेतोस्तस्य **सा** द्रव्यपूजा सद्योगादिभावाद् **धर्ममात्रफलैव** सम्यग्दर्शनलक्षणशुद्धधर्ममात्रप्रापिकैव **हिः** पूर्ववत् अथवा साध्वृजुकादिभावः साधुः शोभनः ऋजुकादिभावः सानुबन्धसंयमादिभावस्तथाविधपरिज्ञानप्रणिधानाद्यभावाद् न जायत इत्यर्थः। तदुक्तं च महामहोपाध्यायैर्दशमषोडशकवृत्तौ–प्रथमकरणभेदेन ग्रन्थ्यासन्नस्य च धर्ममात्रफलैवेयं सद्योगादिभावाद् अनुबन्धासिद्धेश्च ॥८॥ संप्राप्तबीजस्य पूजातो जायमाननिजवीर्योल्लासस्य माहात्म्यमाह—

**भवठिइभंगो एसो तह य महापहविसोहणो परमो।**
**नियवीरियसमुल्लासो जायइ संपत्तबीयस्स ॥९॥**

**अक्षरगमनिका**—संप्राप्तबीजस्य भवस्थितिभङ्गो महापथविशोधनश्च तथा परमो निजवीर्योल्लासो जायते ॥९॥

**टीका**—**संप्राप्तबीजस्य** सम्यगवाप्ततत्त्वजिज्ञासादिधर्मबीजस्य भव्यस्य पूजातो निजवीर्योल्लासो जायते इति सम्बन्धः। स पुनः कीदृशः? यथा **भवस्थितिभङ्गो** दुःखलक्षणसंसारवासस्य भङ्गः क्षयो यतः स्यात् स तथा, उक्तं च—'पत्तबीअस्स अवड्ढपुग्गलपरावट्टकालो' त्ति भवचारकपलायनकालघण्टाकल्प इति। **महापथविशोधनश्च** कदाग्रहत्यागेन माध्यस्थ्यात् सम्यग्ज्ञानादिलक्षणमोक्षमार्गविशोधकश्च यथा स्यात् **तथा** तेन प्रकारेण **परमः** अतिशयवान् **एष निजवीर्योल्लासो** वीर्यान्तरायकर्मक्षयोपशमजः अपूर्वमानसोत्साहो **जायते** प्रादुर्भवतीति ॥९॥ एनमेव वीर्योल्लासं स्तौति—

**संलग्गमाणसमओ धम्मट्ठाणं पि बिंति समयण्णू।**
**अवगारिणो वि इत्थट्ठसाहणाओ य सम्मं ति ॥१०॥**

**अक्षरगमनिका**—अतः समयज्ञाः संलग्नमानसं धर्मस्थानमपि ब्रुवन्ति, अत्रापकारिणोऽपि अर्थसाधनाच्च सम्यगिति ॥१०॥

**टीका**—यतो भवस्थितिभङ्गो महापथविशोधनश्चायं निजवीर्योल्लासः **अतः** अस्मात् कारणात् **समयज्ञा** गीतार्था एनं **संलग्नमानसं** संलग्नं प्रतिबद्धं मानसम् अन्तःकरणवृत्तिर्यत्र तद्**धर्मस्थानं** गुणस्थानम**पि ब्रुवन्ति** व्यपदिशन्ति न केवलं क्रियास्थानमित्यपेरर्थः, यस्मादत्र सम्यक्त्वावाप्तौ धर्मादृते न किञ्चित् करणीयं भातीति न केवलं स्वजनोपकार्यादीनाम् **अपकारिणोऽपि** अनर्थकर्तुरपि **अर्थसाधनात्** प्रयोजननिष्पादनात्

'अगारिणोऽवि' पाठान्तरमाश्रित्य गृहस्थस्यापि **च** उक्तसमुच्चये **इति** हेतोः संलग्नमानसं धर्मस्थानं यद् ब्रुवते तत् **सम्यक्** समीचीनमेवेति ॥१०॥ अथोपचारभेदात् पूजाभेदमाह—

**पंचट्ठसव्वभेओवयारजुता य होइ एस त्ति।**
**जिणचउवीसाजोगोवयारसंपत्तिरूवा य ॥११॥**

**अक्षरगमनिका**—पञ्चाष्टसर्वभेदोपचारयुक्ता च भवत्येषेति जिनचतुर्विंशतेरयोगोपचारसम्पत्तिरूपा च ॥११॥

**टीका—पञ्चाष्टसर्वभेदोपचारा** पञ्चभिः कुसुमाक्षतगन्धधूपदीपैः क्रियत उपचारः प्रतिपत्तिर्यत्र सा पञ्चोपचारा, सैव सनैवेद्यफलजला अष्टोपचारा, उपलक्षणात् स्नपनार्चनवस्त्रविभूषणादिभिः सप्तदशादि-सर्वभेदोपचारयुक्ता च भवति जायते एषा पूजा इतिर्हेतौ यस्माद् **जिनचतुर्विंशत्ययोगोपचारसम्पत्तिरूपा** जिनचतुर्विंशतेः ऋषभादिमहावीरपर्यन्तजिनेश्वराणाम् अयोगो विरहो मुक्तिगमनात्, तस्मात् तस्याः श्रीजिनचतुर्विंशतेः उपचारसम्पत्तिरूपा उपचारः अतद्वति तदारोपः स क्रियते यासु तासां जिनेन्द्रप्रतिमानाम् अनन्तरोक्तपूजालक्षणेन विनयोपचारेण संप्राप्तिरूपा भावतः साक्षात्करणरूपा प्रस्तुतपूजा। तदुक्तं च—"तत्थ य पंचुवयारा कुसुमक्खयगंधधुवदीवेहिं।", "कुसुमक्खयगंधपईवधुवनेवेज्जफलजलेहिं पुणो। अट्ठविह-कम्मदलनी अट्ठुवयारा हवइ पूआ॥ सव्वोवयारपूया णहवणच्चणवत्थभूसणाइहिं। फलबलिदीवाईहिं नट्टगीअआरत्तिआहिं॥" (चैत्यवन्दन महाभाष्य २०९/११) अथवा जानुद्वयकरद्वयोत्तमाङ्गलक्षणैः पञ्चाङ्गप्रणिपातरूपो विनयो यत्र सा पञ्चोपचारा, एषैव सपृष्ठवक्षउदरा अष्टोपचारा, अन्तःपुरहस्त्यश्वरथादिभिश्च सर्वैः प्रकारैरुपचारो यस्यां सा सर्वोपचारा दशार्णभद्रनृपस्येव। तदुक्तं च—"दो जाणू दोण्णि करा पंचमयं होइ उत्तमंगं तु", सिसमुरोयर पिट्ठी दो बाहू उरुया य अट्ठंगा॥ तथा "सव्वबलेणं सव्वसमुदएणं सव्वविभूइए सव्वविभूसाए सव्वायरेणेत्यादि" ॥११॥

अधुना पूजायां द्रव्यभावशौचमाह—

**सुद्धं चेव निमित्तं दव्वं भावेण सोहियव्वं ति।**
**इय एगंतविसुद्धा जायइ एसा तहिट्ठफला ॥१२॥**

**अक्षरगमनिका**—शुद्धं द्रव्यं निमित्तमेवेति भावेन तथा शोधितव्यमेवमेकान्तविशुद्धा जायत एषेष्टफला ॥१२॥

**टीका**—पूजायां **शुद्धम्** अनवद्यं न्यायोपात्तत्वाद् **द्रव्यं** पुष्पादि **निमित्तमेव** हेतुरेव शुभभावं प्रति। तदुक्तं पूजापञ्चाशके—पवरेहिं साहणेहिं पायं भावोवि जायए पवरो। **इति** हेतोः**भावेन** यथा विहितानुष्ठानमेषा पूजा निराशंसभावेन सदा कुर्वतां भवति चरणस्य हेतुः। तथा पूजातो मनःशान्तिस्ततः शुभध्यानं ततो मोक्ष इत्यादि भावनया **तथा** तेन प्रकारेण **शोधितव्यं** विशिष्टशुद्धिमत् कुर्यात्।**एवम्** उक्तप्रकारेण **एकान्तविशुद्धा** नितान्तानवद्या **जायते** भवति **एषा** पूजा **इष्टफला** सिद्धिफलेति ॥१२॥ शुभभावं प्रति पूजादिसामग्रीलक्षणं द्रव्यं निमित्तमुक्तम्। साम्प्रतं जिनेन्द्रप्रतिमालक्षणं निमित्तमाह—

**सयकारियाइ एसा जायइ ठवणाइ बहुफला केइ।**
**गुरुकारियाइ अन्ने विसिट्ठविहिकारियाए य ॥१३॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—स्वयंकारितायाः स्थापनाया एषा बहुफला जायते इति केचित्, गुरुकारिताया इत्यन्ये विशिष्टविधिकारितायाश्च ॥१३॥

**टीका—स्वयम्** आत्मना **कारिताया** निर्मापितायाः प्रतिष्ठापितायाश्चेति शेषः **स्थापनायाः** श्रीजिनेन्द्रप्रतिमाया **एषा** पूजा **बहुफला** विशिष्टलाभप्रदा **जायते** भवतीति **केचि**दाचार्याः। **गुरुकारितायाः** पितृपितामहादिनिष्पादितायाः प्रतिष्ठापितायाश्च पूजा बहुफलेति **अन्ये** स्वव्यतिरिक्ताचार्याः। **विशिष्ट-विधिकारितायाश्च** दलनिष्पत्तिस्थानखन्यादितो जिनोक्तविशिष्टविधिपूर्वकदलानयनादिना कारिताया निर्मापितायास्तथा महामहोत्सवादिपुरस्सरप्रतिष्ठापिताया जिनेन्द्रप्रतिमायाः पूजा बहुफलेत्यपरे। तदुक्तं सम्यक्त्वप्रकरणे—गुरुकारियाइ केइ, अन्ने सयकारियाई तं बिंति। विहिकारियाई अन्ने, पडिमाए पूअणविहाणं ॥१॥ १३॥ एतान् सर्वान् मतान् व्यवस्थापयितुमाह—

**थंडिल्ले वि य एसा मणठवणाए पसत्थिगा चेव।**
**अगासगोमयाइहिं इत्थमुल्लेवणाइ हियं ॥१४॥**

**अक्षरगमनिका**—स्थण्डिलेऽपि चैषा मनःस्थापनायाः प्रशस्तिकैव। इत्थम् आकाश-गोमयादिभिरुपलेपनादि हितम् ॥१४॥

आस्तां विधिकारितादीनां जिनेन्द्रबिम्बानां पूजा **स्थण्डिलेऽपि** शुद्धभूमिमात्रेऽपि **चः** पुनरर्थे **एषा** पूजा **मनःस्थापनाया** अन्तःकरणवृत्तिना कल्पिताया स्मृतिपथमानीताया जिनेन्द्रमहोरूपाया वा मानस्याः पञ्चनमस्कारेण वा स्थापिताया जिनेन्द्रप्रतिमायाः **प्रशस्तिकैव** प्रशंसास्पदमेव तथाभावप्राधान्यात्। **इत्थं** भावप्रधान्यात् **आकाशगोमयादिभिः** पृथिव्यामप्राप्तपवित्रगोमयवालुकादिभिरुपादानकारणभूतैः **उपलेपनादि** चयोपचयरूपेण निर्मापितायाः श्री जिनप्रतिमायाः पूजाकरणं **हितं** श्रेयस्करम्। यदि वा श्रीजिनेन्द्रबिम्बप्रतिष्ठित-श्रीजिनगृहादिभूम्यादेरुपलेपनं तदुपरिपुष्पादिविकरणं च फलदत्वाद् हितम्। तदुक्तं च न्यायाचार्यैः षोडशकवृत्तौ—स्थण्डिलेऽपि शुद्धस्थानमात्रेऽप्येषा मनःस्थापनया विशिष्टविधिसामग्रीं विना पञ्च-नमस्कारस्थापनामात्रेणापि प्रशस्ताभिमतात्राकाशगोमयादिभिः पवित्रोर्ध्वस्थगोमयादिभिरुपलेपनादि भूम्यादेर्हितं तावन्मात्रविधेरपि फलदत्वादिति ॥१४॥

अनन्तरोक्तनीत्याऽऽस्तां स्वयंगुर्वादिकारितानां प्रतिमानां पूजा बहुफला मानसप्रतिमाया अपि पूजोपलेपनादि हितमित्यत्र हेतुमाह—

**उवयारंगा इह सोवओगसाहारणाण इट्ठफला।**
**किंचि विसेसेण तओ सव्वे ते विभइयव्व त्ति ॥१५॥**

**अक्षरगमनिका**—इहोपचाराङ्गात् सोपयोगसाधारणानामिष्टफलाः। किञ्चिद्विशेषेण ततः सर्वे ते विभक्तव्या इति ॥१५॥

**टीका—इह** पूजाविषये स्वयंगुर्वादिकारिताः सर्वे प्रतिमाभेदा **उपचाराङ्गात्** विनयोपचारकारणात् **सोपयोगसाधारणानाम्** उपयोगो जिनःचतुर्विंशतेर्मुक्तिगमनेनाऽयोगाद् विनयोपचारहेतुस्त्रिदशेशपूजितजिनप्रतिमेयं भववनदवदग्धभव्यानां श्रीजिनेन्द्रगतवीतरागत्वसर्वज्ञत्वाद्यद्भुतगुणानां प्रदर्शिनी दुरितदलनी सम्यक्त्वशुद्धकरणी चरणपरिणामजननी यावद् नागकेत्वादीनामिव कैवल्योत्पादनीत्यादि मानसप्राणिधानं तेन प्रणिहितानां दर्शनवन्दनपूजादिकर्तॄणां साधारणानां सर्वेषाम् अविशेषेण **इष्टफला** मुक्तिप्रदा विज्ञेयाः। ननु स्वयंगुर्वादिकारितेषु

प्रतिमाप्रकारेषु किञ्चिद्विशेषः अभ्युपगन्तव्यः, तथाविधतारतम्यतस्तासां प्रतिमानां क्रियमाणपूजाभेदेन पूजकोपलब्धेरिति चेत्, न, **किञ्चिद्विशेषेण** किञ्चिद्भेदः स्वयंगुर्वादिकारितेषु यद्यभ्युपगम्येत तर्हि तेन किञ्चित्किञ्चिद्भेदेन **सर्वे** निखिलास्ते प्रतिमाप्रकारा **विभक्तव्या** विभजनीयाः स्युरिति हेतोः संख्यातीता भेदा अभ्युपगन्तव्या आपद्येरन्, ततश्चानवस्थेति पूजकोपयोग एवेष्टफलं प्रति हेतुः, न तु प्रतिमाभेदास्तेषामुपचाराङ्गत्वादिति। अथवाऽत्र पूजाविषये उपकाराङ्गत् स्वोपयोगसाधारणानामनुष्ठानानां किञ्चिद्विशेषेणेष्टफला एते सर्वेऽपि स्वयंगुर्वादिकारितप्रतिमापक्षा यतः क्रियाफलरूपं कर्म सर्वं सर्वस्योपयोगानुरूपं न तु किञ्चिद्विशिष्टनिमित्तभावेन नियतं। ततो यस्य कस्यचिद् यत्किञ्चित् निमित्तभावेनोपकारकं तत्तस्य विशिष्टमिति सर्वेऽपि स्वयंगुर्वादिकारितप्रतिमापक्षा विभक्तव्या विभजनीयाः, तथाहि—स्वकृतगुर्वादिकारितप्रतिमाबुद्ध्या भक्तिप्रकर्षजनने सर्वेऽपि पक्षाः सम्यक्। रागद्वेषजनने चाऽसम्यक्। तदुक्तं महामहोपाध्यायैः प्रतिष्ठाषोडशकवृत्तौ—

"एते सर्वेऽपि पक्षाः स्वोपयोगसाधारणानामनुष्ठानानाम् उपकाराङ्गमिति उपकाराङ्गानीति किञ्चिद्विशेषेणेष्टफलाः कर्म हि सर्वं सर्वस्योपयोगसदृशं प्रशस्तं न तु कस्यचित् किञ्चिज्ज्ञात्वा प्रतिनियतं ततो यस्य यदुपकारकं तस्य तदिष्टमिति स्वकृतस्थापनादिपक्षाः सर्वेऽपि विभक्तव्याः स्वकृतस्थापनादिबुद्ध्या भक्तिविशेषोत्पत्तौ समीचीना ममत्वकलहाद्युत्पत्तौ चासमीचीना इतिभावः। इत्थं च ये गुर्वादिप्रतिष्ठापितत्वं सर्वथाऽनुपयोगीति वदन्ति ये च विधिप्रतिष्ठापितत्व एव निर्भरं कुर्वन्ति तेषामभिप्रायं त एव विदन्तीति कृतमतिविस्तरेण" ॥१५॥

अथ पूजाफलमाह—

**एवं कुणमाणाणं एयां दुरियक्खओ इहं जम्मे।**
**परलोगम्मि य गोरवभोगा परमं च निव्वाणं॥१६॥**

**अक्षरगमनिका—**एवमेनां कुर्वाणानामिह जन्मनि दुरितक्षयः परलोके च गौरवभोगाः परमं च निर्वाणम्॥१६॥

**टीका—एवं** प्रणिधानपूर्वम् **एनां** देवपूजां **कुर्वाणानां** विधातॄणाम् **इह** अस्मिन् **जन्मनि** भवे अनन्तरफलरूपेण चित्तप्रसादाद् **दुरितक्षयः**पापनाशः **परलोके** प्रेत्य परम्परफलरूपेण पुण्यानुबन्धिपुण्ययोगात् **चः** पुनरर्थे **गौरवभोगा** गौरवं गुरुत्वं पूज्यत्वं तेन युक्ता भोगा नरेन्द्रदेवेन्द्रसुखरूपाः **परमं** च सर्वोत्कृष्टं फलं **निर्वाणम्** अजरामरत्वमिति ॥१६॥ एतदेव दृष्टान्तपुरस्सरमाह—

**इक्कं पि उदगबिंदू जह पक्खित्तं महासमुद्दम्मि।**
**जायइ अक्खयमेयं पूया वि जिणेसु विन्नेया॥१७॥**

**अक्षरगमनिका—**महासमुद्रे प्रक्षिप्त एकोप्युदकबिन्दुर्यथाऽक्षयो जायते एवं जिनेषु पूजापि विज्ञेया॥१७॥

**टीका—महासमुद्रे** स्वयंभूरमणस्थानीयमहोदधौ **प्रक्षिप्तः** अतिसृष्ट आस्तां भूरिसङ्ख्याक **एकोप्युदकबिन्दुर्**जललवो **यथा** दृष्टान्ते **अक्षयः** शोषाभावाद् अविनाशी **जायते** भवति **एवम्** उपनयार्थे **जिनेषु** विश्वविश्वोपकारिषु गुणमहासमुद्रेषु विषयभूतेषु **पूजापि** सपर्यापि फलापेक्षया पुण्यानुबन्धिपुण्यहेतुत्वाद् अक्षया अनन्तफला मोक्षप्रदा **विज्ञेया** समवसेयेति ॥१७॥ एतदेव प्रकारान्तरेणाह—

**अक्खयभावे भावो मिलिओ तब्भावसाहगो नियमा।**
**न हु तंबं रसविद्धं पुणो वि तंबत्तणमुवेइ ॥१८॥**

**अक्षरगमनिका**—अक्षयभावे भावो मिलितस्तद्भावसाधको नियमात्। न खलु ताम्रं रसविद्धं पुनरपि ताम्रत्वमुपैति ॥१८॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका—अक्षयभावे** श्रीजिनसत्कक्षायिकवीतरागत्वसर्वज्ञत्वादिभावे **भावो** पूजकभावः पूज्य-स्वरूपालम्बनाद् **मिलितः** अनुविद्धः समापत्त्या **तद्भावसाधकः** श्रीजिनगतवीतरागत्वादिभावनिष्पादको **नियमाद्** अवश्यं भवति। अत्रार्थे व्यतिरेकेण दृष्टान्तमाह—**न** नैव **खलुरवधारणे** **ताम्रं** धातुविशेषो **रसविद्धं** स्वर्णरसमिलितं **पुनरपि** मुहुरपि **ताम्रत्वं** ताम्रस्वरूपम् **उपैति** प्राप्नोति। श्रीजिनभावस्वर्णरसविद्धं जीवात्मस्वभावताम्रं पुण्यानुबन्धिपुण्यसम्पद्लाभेन जायतेऽप्रतिहतं श्रीजिनभावस्वर्णम्। एकदा श्रीजिन-भावस्वर्णीभूतं न पुनः कदापि भवति संसारिताम्रस्वरूपेणेत्यर्थः ॥१८॥ साम्प्रतं हेतुपुरस्सरं कर्तव्यतया पूजामाह—

**तम्हा जिणाण पूया बुहेण सव्वायरेण कायव्वा।**
**परमं तरंडमेसा जम्हा संसारजलहिम्मि ॥१९॥**

**अक्षरगमनिका**—यस्मात् संसारजलधौ परमं तरण्डमेषा तस्मात् जिनानां पूजा बुधेन सर्वादरेण कर्तव्या ॥१९॥

**टीका—यस्मात्** कारणात् पूजातो जायमानो भावः अक्षयभावसाधकत्वेन **संसारजलधौ** भवोदधौ **परमं** सर्वोत्कृष्टं **तरण्डं** द्रोणिः **एषा** अनन्तरोक्तस्वरूपा **जिनानां** क्षीणरागद्वेषाणां **पूजा**—सपर्या **तस्मात्** कारणाद् **बुधेन**—पण्डितेन **सर्वादरेण** कृत्स्नश्रद्धया **कर्तव्या** विधातव्या। तदुक्तं ग्रन्थकृतैव षोडशके—देवगुणपरिज्ञानात् तद्भावानुगतमुत्तमं विधिना। स्यादादरादियुक्तं, यत्तद्देवतार्चनं चेष्टम् ॥१॥॥१९॥

उपसंहरन्नाह—

**एवमिह दव्वपूया लेसुद्देसेण दंसिया समया।**
**इयरा जईण पाओ जोगाहिगारे तयं वुच्छं ॥२०॥**

इति पूजाविधिविंशिका अष्टमी ॥८॥

**अक्षरगमनिका**—एवमिह द्रव्यपूजा लेशोद्देशेन दर्शिता समयात्। इतरा यतीनां प्रायस्तकां योगाधिकारे वक्ष्ये ॥२०॥

**टीका—एवम्** उक्तनीत्या **इह** प्रकरणे **द्रव्यपूजा** पुष्पादिद्रव्यप्रधानपूजा **लेशोद्देशेन** संक्षिप्तवक्तव्येन **दर्शिता** निरूपिता **समयात्** शास्त्रात्। **इतरा** भावपूजा **प्रायो** बाहुल्येन **यतीनां** साधूनां **तकां** तां भावपूजां **योगाधिकारे** योगप्रस्तावे **वक्ष्ये** निरूपयिष्यामीति ॥२०॥

# नवमी श्रावकधर्मविंशिका

अनन्तरविंशिकायां श्रीजिनपूजोपदिष्टा। पूजातो हि मोहनीयक्षयस्ततो विरतिपरिणामस्तद्वान् श्रावकोऽपीति श्रावकधर्मो निरूप्यतेऽत्र विंशिकायाम्। तस्याश्चेयमाद्या गाथा—

**धम्मोवग्गहदाणाइसंगओ सावगो परो होइ।**
**भावेण सुद्धचित्तो निच्चं जिणवयणसवणरई॥१॥**

**अक्षरगमनिका**—धर्मोपग्रहदानादिसंगतः परः श्रावको भवति। भावेन शुद्धचित्तो नित्यं जिनवचनश्रवणरतिः॥१॥

**टीका—धर्मोपग्रहदानादिसंगतः**—धर्मोपग्रहो ज्ञानाद्युपष्टम्भस्तदर्थं दानम् आदिपदात् शीलतपःप्रभृतिग्रहस्तेन संगतो युक्तः **परः** श्रेष्ठः**श्रावकः** श्रमणोपासको **भवति** जायते। **भावेन** निश्चयतः पुनः **शुद्धचित्तः** तथाविधमोहनीयक्षयोपशमतो मैत्र्यादिभावभावितान्तःकरणस्तथा **नित्यं** सर्वदा **जिनवचनश्रवणरतिः** वीतरागमार्गदर्शीशुश्रूषुर्भवतीति॥१॥ अथ श्रावकं लक्षणद्वारेण निरूपयन्नाह—

**मग्गणुसारी सड्ढो पन्नवणिज्जो कियापरो चेव।**
**गुणरागी सक्कारंभसंगओ देसचारित्ती॥२॥**

**अक्षरगमनिका**—मार्गानुसारी श्राद्धः प्रज्ञापनीयः क्रियापरो गुणरागी शक्यारम्भसंङ्गतश्च देशचारित्री॥२॥

**टीका—मार्गानुसारी** भावमार्गः सम्यग्दर्शनज्ञानचारित्रलक्षणस्तमनुसरति चारित्रमोहनीयक्षयोपशमात् पुनः किंलक्षणः? **श्राद्धो** दर्शनमोहनीयक्षयोपशमाद् जिनोक्तं सर्वं निःशङ्कं सत्यं श्रद्धत्त इति विहितानुष्ठानरुचिर्वा। अत एव **प्रज्ञापनीय** उपदेशयोग्यो ऋजुप्रकृतिकत्वात्, पुनः कथम्भूतः? **क्रियापरः** वीर्यान्तरायकर्मक्षयोपशमात् सामायिकप्रतिक्रमणपौषधोपवासादिविहितानुष्ठानरतः, पुनः कीदृशः? **गुणरागी** औदार्यादिगुणदर्शनेऽनुरागी **शक्यारम्भसङ्गतश्च** निष्फलारम्भवर्जनेन निजशक्तिपरसहायादियोग्यो य आरम्भस्तेन सङ्गतो युक्तः **चः** समुच्चये **देशचारित्री** देशतो विरतिधरः श्रावको भवतीति॥२॥ अथ देशविरतिमेवाह—

**पंच य अणुव्वयाइं गुणव्वयाइं च हुंति तिन्नेव।**
**सिक्खावयाइं चउरो सावगधम्मो दुवालसहा॥३॥**

**अक्षरगमनिका**—पञ्च चाणुव्रतानि गुणव्रतानि च भवन्ति त्रीण्येव शिक्षाव्रतानि चत्वारि। श्रावकधर्मो द्वादशधा॥३॥

**टीका—पञ्च** संख्यया पञ्चैव **चोऽ**वधारणे **अणुव्रतानि** महाव्रतापेक्षयाऽणूनि लघूनि व्रतानि स्थूलप्राणातिपातविरमणादीनि श्रावकधर्मवृक्षमूलकल्पानि तथा **त्रीणि** त्रीण्येव **चः** समुच्चये **गुणव्रतानि** दिक्परिमाणादीनि अणुव्रतोपकारकाणि तथा **चत्वारि** चत्वार्येव **चोऽ**वधारणे **शिक्षाव्रतानि** शिक्षाऽभ्यासश्चारित्रधर्मस्य तदर्थं व्रतानि सामायिकपौषधादीनि धर्ममहाद्रुमशाखास्थानीयानि उत्तरगुणानि **भवन्ति** जायन्ते श्रावकस्येति **श्रावकधर्मो** देशविरतिः **द्वादशधा** मूलोत्तरभेदाद् द्वादशप्रकारोऽवगन्तव्य इति शेषः॥३॥ अनन्तरोक्तः श्रावकधर्मो निवृत्तिप्रवृत्तिरूपोऽथ तं परिणामलक्षणमाह—

**एसो य सुप्पसिद्धो सहाइयारेहिं इत्थ तंतम्मि।**
**कुसलपरिणामरूवो नवरं सइ अंतरो नेओ॥४॥**

**अक्षरगमनिका**—एषः अतिचारैः सहात्र तन्त्रे सुप्रसिद्धः, कुशलपरिणामरूपो नवरं सदाऽऽन्तरो ज्ञेयः॥४॥

**टीका**—**एषः** अनन्तरोक्तो द्वादशधा श्रावकधर्मो निवृत्तिप्रवृत्तिलक्षणो निरतिचारपालनार्थम् **अतिचारै**र्वधबन्धच्छविच्छेदादिभिः परिहाररूपेण ज्ञातव्यैः**सह** सार्धम् **अत्र** अस्मिन् मौनीन्द्रे **तन्त्रे** सिद्धान्ते सुप्रसिद्धः अतीव प्रतीतः। अथ निश्चयनयाभिप्रायेणाह–**नवरं** केवलं रागादिमलक्षयात् **कुशलपरिणामरूपः** शुभाध्यवसायलक्षणः **सदाऽ**नवरतम् **आन्तरः** आध्यात्मिकः सर्वविरतिप्रतिबन्धककर्मक्षयङ्कुरत्वात् सर्वत्यागपरिणामाविर्भावकत्वाच्च भावश्रावकधर्मो **ज्ञेयः** समवसेय इति॥४॥ कालमाश्रित्यैष कुशलपरिणामरूपो भावश्रावकधर्मः कदाऽऽविर्भवति? तदाह—

**सम्मा पलियपुहत्तेऽवगए कम्माण एस होइ त्ति**
मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज
**सो वि खलु अवगमो इह विहिगहणाईहिं होइ जहा॥५॥**

**अक्षरगमनिका**—सम्यक्त्वात् कर्मणां पल्यपृथकत्वेऽपगते एष भवतीति सोऽपि खल्वपगम इह यथा विधिग्रहणादिभिर्भवति॥५॥

**टीका**—**सम्यक्त्वात्** भीमो भीमसेन इति न्यायात् सम्यक्त्वप्राप्तेरूर्ध्वं **कर्मणां** स्थितिस्थितिमतोरभेदोपचाराद् ज्ञानावरणीयप्रभृतिघातिकर्मणां **पल्यपृथकत्वे** द्विप्रभृतिनवपर्यन्तसमयप्रसिद्धपल्योपमकालप्रमाणस्थितेः **अपगते** क्षये सति **एषः** अनन्तरोक्तकुशलपरिणामरूपो भावश्रावकधर्मो **भवति** प्रादुर्भवति, **इतिः** समाप्तौ। **सोऽपि** कर्मणाम् **अपगमः** क्षय **इह** मौनीन्द्रप्रवचने **यथा** श्रीजिनवरगणधरैरुपदिष्टं तथा **विधिग्रहणादिभिः** गुरुसकाशाद् विधिना श्रावकधर्मस्य ग्रहणपालनादिभि**र्भवति** जायते। इदमुक्तं भवति—अनन्तरोक्तकुशलपरिणामं विनाऽपि विधिना देशविरतिग्रहणपालनादिभिरपि घातिकर्मक्षयाद् देशविरतिपरिणामः प्रादुर्भवतीति॥५॥ एतदेवाह—

**गुरुमूले सुयधम्मो संविग्गो इत्तरं व इयरं वा।**
**गिण्हइ वयाइं कोइ पालइ य तहा निरइयारं॥६॥**

**अक्षरगमनिका**—गुरुमूले श्रुतधर्मः कोऽपि संविग्न इत्वरं वेतरं वा गृह्णाति व्रतानि पालयति च तथा निरतिचारम्॥६॥

**टीका**—**गुरुमूले** गुरुः संविग्नगीतार्थस्तस्य मूले पार्श्वे, उक्तं च–गुरुर्गृहीतशास्त्रार्थः परां निसङ्गतां गतः। मार्तण्डमण्डलसमो भव्याम्भोजविकाशने॥१॥ गुणानां पालनं चैव तथा वृद्धिश्च जायते। यस्मात्सदैव स गुरुर्भवकान्तारनायकः॥२॥ **श्रुतधर्म** आकर्णितः प्रथमतो यतिधर्मस्तत्करणेऽसमर्थः पश्चात् श्रावकधर्मः **कोऽपि** भव्यसत्त्वः **संविग्न**स्तीव्रमोक्षाभिलाषी भवोद्विग्नो वा सन् **इत्वरं** चातुर्मासकादिरूपं शिक्षाव्रतानि **वा** विकल्पे **इत्वरं** यावज्जीवं प्रायः अणुगुणव्रतानि **गृह्णाति** स्वीकरोति **व्रतानि** पूर्वोक्तरूपाणि तदूर्ध्वं **पालयति** निर्वहति **चः** समुच्चये यथा गृहीतानि **तथा निरतिचारम्** अक्षुण्णमनुतिष्ठतीति॥६॥ एवं विधिग्रहणादिभिरपि देशविरतिपरिणामो जायते न तु नियमादित्याह—

**एसो ठिइओ इत्थं न उ गहणादेव जायई नियमा।**
**गहणोवरिं पि जायइ जाओ वि अवेइ कम्मुदया॥७॥**

**अक्षरगमनिका**—एष स्थितित इत्थं न तु ग्रहणादेव नियमाज्ञायते, ग्रहणोपर्यपि जायते, जातोऽपि कर्मोदयादपैति॥७॥

**टीका**—**एष** द्वादशधा श्रावकधर्मः**स्थितितो** मर्यादातो व्यवहारत इति यावद् **इत्थम्** उक्तन्यायेन विधिग्रहणादिभिर्यतो **न** नैव **तुर**वधारणे **ग्रहणादेव** गुरुसकाशे स्वीकारमात्रादेव **नियमाद**वश्यं परिणामरूपेण **जायत** आविर्भवति। **ग्रहणोपर्यपि** स्वीकारादूर्ध्वमपि **जायते** प्रकटति प्रयत्नपूर्वकपरिपालनात्। अतः अत्रोद्यमो भवति कर्तव्यः। उद्यमे सत्यपि निकाचितकर्मोदये प्रतिपततीत्याह—**जातोऽपि** आविर्भूतोऽपि विरति-परिणामः**कर्मोदयात्** तथाविधाऽप्रत्याख्यानावरणीयकषायोदयाद् **अपैति**—प्रतिपततीति॥७॥ यत एवम्

**तम्हा निच्चसईए बहुमाणेणं च अहिगयगुणंमि।**
**पडिवक्खदुगुंछाए परिणइयालोयणेणं च॥८॥**

**तित्थंकरभत्तीए सुसाहुजणपज्जुवासणाए य।**
मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज
**उत्तरगुणसद्धाए इत्थ सया होइ जइयव्वं॥९॥**

**अक्षरगमनिका**—तस्मान्नित्यस्मृत्याऽधिकृतगुणे च बहुमानेन, प्रतिपक्षजुगुप्सया परिणत्यालोचनेन च॥८॥ तीर्थङ्करभक्त्या, सुसाधुजनपर्युपासनयोत्तरगुणश्रद्धया चात्र सदा भवति यतितव्यम्॥९॥

**टीका**—यस्मात् कर्मोदयादाविर्भूतोऽपि कुशलपरिणामरूपः श्रावकधर्मः अपैति **तस्मात्** कारणात् गृहीताऽणुव्रतादे**र्नित्यस्मृत्या** सदा स्मरणेन यथा कर्मविवरेण प्रापितोऽहमियतीं भुवं पुनर्मा पप्तमिति, तथाऽ**धि कृतगुणे** स्वीकृतसम्यक्त्वादिविरतिधर्मे **बहुमानेन** भावप्रतिबन्धेन प्राप्तगुणः सानुबन्धः स्यादिति, किञ्च–**प्रतिपक्षजुगुप्सया** मिथ्यात्वाऽविरत्याद्युद्विग्नतया पापप्रवृत्तिप्रतिरोधो भवेदिति, तथा **परिणत्यालोचनेन** मिथ्यात्वप्राणातिपातादिविपाकः परलोके नारकादिदारुणदुःखोपनिपातः सम्यक्त्वव्रतानि चाशुभभावनिरोधात् परमार्थहितव इति विपाकविचारणया पापविचारोऽपि विरमेदिति, तथा **तीर्थङ्करभक्त्या**ऽनुपकृतपरहितरत-श्रीजिनेश्वरविषये तद्गुणज्ञानपूर्वं विनयोपचारेण पापविचारहेतुमोहनीयकर्माऽपि क्षयं यायादिति, अपि च–**सुसाधुजनपर्युपासनया** भावयोगिषु वैयावृत्त्येन सदुपदेशादितः प्राप्तगुणः स्थैर्यं वृद्धिं च प्राप्नुयादिति, **तथोत्तरगुणश्रद्धया** चाधिकृतसम्यक्त्वदेशविरत्याद्यपेक्षयोत्तरगुणः देशविरतिसर्वविरत्यादिकस्तदभिलाष-रूपाऽऽदरेण तथाहि–सम्यक्त्वे सति अणुव्रतलिप्सयाऽणुव्रतेषु सत्सु महाव्रताभिलाषया तत्प्राप्तिरिह जन्मनि भाविभवेषु वा स्यादिति **अत्र** नित्यस्मृत्यादौ **सदा**ऽनवरतं **यतितव्यम्** अभ्यसितव्यं **भवति** युज्यते॥८–९॥ एतत्फलनिरूपणपूर्वमुपदिशन्नाह—

**एवमसंतो वि इमो जायइ जाओ वि न पडइ कयाइ।**
**ता इत्थं बुद्धिमया अपमाओ होइ कायव्वो॥१०॥**

**अक्षरगमनिका**—एवमसन्नप्ययं जायते, जातोऽपि न पतति कदाचित् तस्मादत्र बुद्धिमताऽप्रमादो **भवति** कर्तव्यः॥१०॥

**टीका**—**एवम्** अनन्तरोक्तनित्यस्मृत्यादितः **असन्नपि** अविद्यमानोऽपि **अयं** कुशलपरिणामो **जायते**

प्रादुर्भवति **जातोऽपि** प्रादुर्भूतोऽपि **न** नैव **पतति** भ्रंशते **कदाचित्** कस्मिन्नपि काले **तस्मात्** कारणाद् **अत्र** नित्यस्मृत्यादौ **बुद्धिमता** मतिमताऽ**प्रमाद** उद्यमी भवति युज्यते **कर्तव्यो** विधातव्य इति ॥१०॥ अथ योगक्षेमार्थं विधिविशेषमाह—

**निवसिज्ज तत्थ सड्ढो साहूणं जत्थ होइ संपाओ।**
**चेइयघरा उ जहियं तदन्नसाहम्मिया चेव ॥११॥**

**अक्षरगमनिका**—निवसेत्तत्र श्राद्धः यत्र साधूनां भवति सम्पातश्चैत्यगृहाणि तु यस्मिन् तदन्यसाधर्मिकाश्च ॥११॥

**टीका**—अप्राप्तकुशलपरिणामस्य प्राप्त्यर्थं प्राप्तस्य च संरक्षणार्थं **निवसेद्** आवसेत् **तत्र** ग्रामनगरादौ **श्राद्धः** श्रमणोपासको **यत्र** निवासस्थाने **साधूनां** यतीनां **भवति** जायते **सम्पात** आगमनं तत एव सदुपदेशादिप्राप्तिरिति **चैत्यगृहाणि** श्रीजिनभवनानि पुन**र्यस्मिन्** ग्रामनगरादौ स्युः **तुः** पुनरर्थे तत एव साधूनामागमनमिति तथा **तदन्यसाधर्मिकाश्चः** स्वव्यतिरिक्तान्यसमानधार्मिकाश्च श्रावका यत्र निवसेयुस्तत एव प्रमादादिपरिहारेण वंशजालमध्यस्थछिन्नमूलस्यापि वंशस्येव स्थितिस्थापकता। उक्तं च—

उड्ढगुणेहिं तुल्लगुणेहिं च णिच्च संवासो। तग्गुणठाणोचियकिरियापालणसइ समाउत्तो ॥१॥ (योगशतक गा. ४४) ॥११॥

साम्प्रतं दिनकर्तव्यतामाह—

**नवकारेण विबोहो अणुसरणं सावओ वयाइं मे।**
**जोगो चिइवंदणमो पच्चक्खाणं तु विहिपुव्वं ॥१२॥**

**अक्षरगमनिका**—नमस्कारेण विबोधः अनुस्मरणं श्रावको व्रतानि मे योगस्तु विधिपूर्वं चैत्यवन्दनं प्रत्याख्यानं ॥१२॥

**टीका—नमस्कारेण** पञ्चपरमेष्ठिनमस्कारक्रियालक्षणमहामन्त्रेण परममङ्गलत्वात्तस्येति **विबोधो** जागरणं निद्रात्याग इति यावत् ततः **अनुस्मरणं** चिन्तनं यथा **श्रावकः** श्राद्धोहं **व्रतानि** मेऽमुकानि प्राणातिपातविरमणादीनि नियमाश्चोपलक्षणं चैतद् जातिकुलदेवगुरुधर्मद्रव्यक्षेत्रकालभावादिचिन्तनस्य ततो **योगो** व्यापारो मलमूत्राद्युत्सर्गशौचादिलक्षणो भावबाधापरिहारेण चित्तसमाधिहेतुत्वाद् यदिवा योगो धर्मव्यापारस्त-मेवाह—**विधिपूर्वं** जिनगणधरोक्तविधानपुरस्सरं **चैत्यवन्दनं** गृहचैत्ये पूजापुरस्सरं जिनेन्द्रबिम्बवन्दनं तथा तत्रैवाऽऽकारोच्चारणपूर्वं **प्रत्याख्यानं** नमस्कारसहितादिकं विधेयं **तुः** पुनरर्थे। आवश्यकं तु स्वभूमिकानुसारेणा-ऽवश्यकर्तव्यतया चैत्यवन्दनादिना गतार्थत्वादनुक्तमपि ग्राह्यमिति ॥१२॥ दिनकृत्यमेवाह—

**तह चेईहरगमणं सक्कारो वंदणं गुरुसगासे।**
**पच्चक्खाणं सवणं जइपुच्छा उचियकरणिज्जं ॥१३॥**

**अक्षरगमनिका**—तथा चैत्यगृहगमनं सत्कारो वन्दनं गुरुसकाशे प्रत्याख्यानं श्रवणं यतिपृच्छो-चितकरणीयम् ॥१३॥

**टीका—तथा** समुच्चये **चैत्यगृहगमनं** श्रीसंघजिनालये गमनं यानम् तत्र गमनविधि :—"सव्वाए इड्ढिए सव्वाए दित्तीए सव्वाए जुत्तीए सव्वसमुदएणं" इत्यादि समुचिताडम्बरेण प्रवचनप्रभावनाहेतुत्वात्।

प्रवेशविधिस्तु "सचित्तदव्वाणं विउसरणाए" इत्यादि पञ्चाभिगमपूर्वकम्। **सत्कारो** जिनेन्द्रप्रतिमायाः पुष्पाद्याभूषणैः पूजा। **वन्दनं** प्रसिद्धविधिना चैत्यवन्दनम्। ततो **गुरुसकाशे** सुविहिताचार्यादिपार्श्वे प्रतिश्रयादौ गमनं द्वादशावर्तादिवन्दनपूर्वं च **प्रत्याख्यानं** स्वयंगृहीतस्य नमस्कारसहितादेः पुनर्गुरुसमक्षविधानम्। ततः **श्रवणम्** आकर्णनं श्रीजिनागमस्य सद्बोधहेतुरिति। ततो **यतिपृच्छा** साधुशरीरसंयमयात्रानिर्वाहपृच्छनम्। तत्र **चोचितकरणीयं** विहितकर्तव्यं साधोर्ग्लानत्वादौ वैद्याऽऽकारणौषधप्रदानादि विधेयमिति॥१३॥ किञ्च—

**अविरुद्धो ववहारो काले विहिभोयणं च संवरणं।**
**चेइहरागमसवणं सक्कारो वंदणाई य॥१४॥**

**अक्षरगमनिका**—अविरुद्धो व्यवहारः काले विधिभोजनं च संवरणं चैत्यगृहागमश्रवणं सत्कारो वन्दनादि च॥१४॥

**टीका—अविरुद्धो व्यवहारः** पञ्चदशकर्मादानवर्जनेन राजजातिकुलदेशाद्यविरुद्धाल्पारम्भिका वृत्तिः, अन्यथा धर्मबाधा प्रवचनहीलना च स्यादिति। **काले** मध्याह्ने देहारोग्याद्यनुगुणे वा प्रत्याख्याततीरितत्वसमय-लक्षणे वा **विधिभोजनं** विधिनाऽभ्यवहरणम्। तद्विधिश्चायं–जिणपूयोचितदाणं परियरसंभालणा उचियकिच्चं। ठाणुववेसो य तहा पच्चक्खाणस्स संभरणं॥१॥ **चः** समुच्चये **संवरणं** भोजनानन्तरं त्रिविधाद्याहारग्रन्थिमुष्टि-सहितादिप्रत्याख्यानं प्रमादपरिहारफलं विधेयम्। ततोऽवसरे **चैत्यगृहे** जिनालये **आगमश्रवणं** जिनागमाकर्णनं चैत्यगृहे हि प्राग् आगमव्याख्यानमभवदिति आगमव्याख्यानस्थानान्तरोपलक्षणार्थं चैत्यग्रहणम्, यदाह–जत्थ पुण अनिस्सकडं पूरिंति तहिं समोसरणं। पूरिंति समोसरणं अन्नासइ निस्सचेइएसुंपि। इहरा लोगविरुद्धं सद्धाभंगो य सड्ढाणं॥१॥ ततो विकाले **सत्कारः** पूजा **वन्दनादि** च जिनेन्द्रप्रतिमानामेव आदिशब्दा-च्चैत्यसम्बन्धितत्कालोचितं कृत्यान्तरं ग्राह्यं प्रतिश्रयागमनं साधुवन्दनादि भूमिकौचित्येन षड्विधावश्यकं **चः** समुच्चये॥१४॥ अपि च—

**जइविस्सामणमुचिओ जोगो नवकारचिंतणाईओ।**
**गिहिगमणं विहिसुवणं सरणं गुरुदेवयाईणं॥१५॥**

**अक्षरगमनिका**—यतिविश्रामणमुचितो योगो नमस्कारचिन्तनादिको गृहगमनं विधिस्वपनं स्मरणं गुरुदेवतादीनाम्॥१५॥

**टीका**—सन्ध्याप्रतिक्रमणानन्तरं **यतिविश्रामणं** साधुशरीरसम्बाधनमेवं विनयप्रतिपत्तिरपि स्यादिति **उचितः** स्वभूमिकायोग्यो **योगो** धर्मव्यापारस्तमेवाह–**नमस्कारचिन्तनादिकः** पञ्चपरमेष्ठिनमस्कारप्रकरणग्रन्थादि-परावर्तनादिलक्षणस्वाध्यायप्रभृतिकः। ततो **गृहगमनं** स्ववेश्मगमनं तत्र चौचित्येन स्वजनादिभ्यो धर्मोपदेशदानम् ततो **विधिस्वपनं** शयनक्रियाविधिमेवाह—**स्मरणं** मनसि धारणम्, केषां ?**गुरुदेवतादीनां** गुरुणां धर्मदायकानां देवतानां चार्हत्सिद्धानाम् आदिशब्दादन्येषां च धर्मोपकारकाणां प्रत्याख्यानादीनां च यदि वा शरणं गमनं गुरुदेवतादीन् णं च वाक्यालङ्कार इति॥१५॥ तथा—

**अब्बंभे पुण विरई मोहदुगुंछा सतत्तचिंता य।**
**इत्थीकलेवराणं तव्विरएसुं च बहुमाणो॥१६॥**

**अक्षरगमनिका**—अब्रह्मणि पुनर्विरतिः, मोहजुगुप्सा स्वतत्त्वचिन्ता च स्त्रीकलेवराणां तद्विरतेषु च बहुमानः॥१६॥

**टीका—अब्रह्मणि** संभोगलक्षणे **पुनर्विशेषे** प्रायेण **विरतिर्विरमणं** दुरन्तकाम इति। **मोहजुगुप्सा** पुंवेदादिमोहनीयतिरस्कारः। यथा–यल्लज्जनीयमतिगोप्यमदर्शनीयं, बीभत्समुल्बण**मलाविल**पूतिगन्धि। तद् याचतेऽङ्गमिह कामकृमिस्तदेवं; किंवा दुनोति न मनोभववामता सा॥१॥ तथा **स्वतत्त्वचिन्ता** वस्तुतत्त्वचिन्ता, यथा शुद्धोऽहं बुद्धोहमित्यादिचिन्तनं **चः** समुच्चये यदि वा स्वतत्त्वचिन्ता च **स्त्रीकलेवराणां** स्त्रीशरीराणां सततांशुचिश्रावचिन्तनम्। **तद्विरतेषु** अब्रह्मविरतेषु जम्बूकुमारवज्रस्वामिस्थूलभद्रसुदर्शनश्रेष्ठि-विजयविजयाप्रभृतिषु साधुसाध्वीश्रावकश्राविकासु **बहुमानो** भावप्रतिबन्धः। यथा–धन्यास्ते भुवि ये निवृत्तमदना धिग् दुःखितान् कामिनः। इत्यादि॥१६॥ पुनर्विधिविशेषमाह—

**सुत्तविउद्धस्स पुणो सुहुमपयत्थेसु चित्तविन्नासो।**
**भवठिइनिरूवणे वा अहिगरणोवसमचित्ते वा॥१७॥**

**अक्षरगमनिका**—सुप्तविबुद्धस्य पुनश्चित्तविन्यासो सूक्ष्मपदार्थेषु भवस्थितिनिरूपणे वाऽधिकरणो-पशमचित्ते वा॥१७॥

**टीका—सुप्तविबुद्धस्य** निद्रापगमे जाग्रतः श्रावकस्य **पुनर्विशेषे चित्तविन्यासो** मानसावेशनं चिन्तनमिति यावत् **सूक्ष्मपदार्थेषु** कर्मात्मपरिणामादिषु **भवस्थितिनिरूपणे** संसारदुःस्थताविचारणे वा तदुक्तं च–रङ्को राजा नृपो रङ्कः, स्वसा जाया जनी स्वसा। दुःखी सुखी सुखी दुःखी; यत्रासौ निर्गुणो भवः॥१॥ **अधिकरणो-पशमचित्ते** वाऽधिकरणानि कलहाः कृष्यादीनि वा तेषामुपशमाय निवर्तनाय यच्चितं तत्तथा तत्र, यथा कथं कदा वा मेऽधिकरणोपशमचित्तं भविष्यति, वाशब्दौ विकल्पार्थौ॥१७॥ चित्तविन्यासविषयमेवाह—

**आउयपरिहाणीए असमंजसचिट्ठियाण व विवागे।**
**खणलाभदीवणाए धम्मगुणेसुं च विविहेसु॥१८॥**

**अक्षरगमनिका**—आयुःपरिहाणौ असमञ्जसचेष्टितानां वा विपाके क्षणलाभदीपनायां धर्मगुणेषु च विविधेषु चित्तविन्यासः॥१८॥

**टीका—आयुःपरिहाणौ** प्रतिक्षणमावीचिमरणेनाऽऽयुष्कक्षयलक्षणायां चित्तविन्यास इति सर्वत्र योज्यम्, **असमञ्जसचेष्टितानां वा विपाके** असदाचरितानां प्राणातिपातादीनां वा विपाके नरकादिदारुण-दुःखफलदायके चित्तविन्यासः। तथा **क्षणलाभदीपनायां** क्षणः सुषमाद्यपेक्षया दुःषमायामायुष्कालः स्तोकस्तस्मिन् यः अद्भुत आराधनालाभः अशुभकर्मनिर्जराविपुलपुण्यानुबन्धिपुण्योपार्जनलक्षणस्तस्य दीपना प्रकाशना यथाऽल्पकालिकी साधना सार्वदिकं च सुखमिति प्रमादो न श्रेयसे, यदि वा तडिल्लतेव दुर्लभः क्षणः अवसरो मोक्षसाधनायास्तस्य लाभो युगशमिलान्यायेन कथत् प्राप्तिस्तस्य दीपना पूर्ववत् तस्यां चित्तविन्यासः। यथोक्तम्—

माणुस्सखेत्तं जाई कुलरूवारोगआउयं बुद्धी। सवणोग्गहसद्धा संजमो य लोगम्मि दुलहाइं॥१॥
**धर्मगुणेषु** ज्ञानादिगुणेषु **च विविधेषु** बहुप्रकारेषु यथाऽत्र जन्मनि निर्मलयशःप्राप्तिः प्रेत्य धर्मावाप्तिस्ततः स्वर्गः अपवर्गश्च तत्र चित्तविन्यासः। यदुक्तं च–

जीवंतस्स इह जसो, कित्ती य मयस्स परभवे धम्मो।
सगुणस्स निग्गुणस्स य, अयसोऽकित्ती अहम्मो अ॥१॥१८॥

तथा—

**बाहगदोसविवक्खे धम्मायरिए य उज्जयविहारे।**
**एमाइचित्तनासो संवेगरसायणं देयं ॥१६॥**

**अक्षरगमनिका—**बाधकदोषविपक्षे उद्यतविहारे च धर्माचार्ये। एवमादिचित्तन्यासः संवेगरसायणं ददाति॥

**टीका—बाधकदोषविपक्षे** बाध्यते च्याव्यते धर्मानुष्ठानात् पुरुषो यै रागादिदोषैस्तेषां विपक्षः प्रतिपक्षभावनारूपस्तत्र चित्तविन्यासः। तथाहि–रागः अनित्यभावनया, द्वेषो मैत्रीभावनया, क्रोधः क्षमया, मानो मार्दवेन, मायाऽऽर्जवेन, लोभस्तुष्ट्या, मोहश्च विवेकेन सुखं जीयत इत्यत्र चित्तन्यासः कर्तव्यः। तथा **धर्माचार्ये** सम्यक्त्वदातरि गुरौ कीदृशे? **उद्यतविहारे** आगमानुसारिणीचर्यावति यदि वाऽऽत्मगते उद्यतविहारे चित्तविन्यासः,यथा—इच्छे वेयावडियं, गुरुमाईण महाणुभावाणं। जेसिं पभावेणेयं, पत्तं तह पालियं चेव॥१॥ तेसिं नमो तेसिं, भावेण पुणो वि चेव तेसिं नमो। अणुक्कयपरहियरया, जे एयं देंति जीवाणं॥२॥ तथा—कइया होइ सो वासरो उ गीयत्थगुरुसमीवम्मि। सव्वविरइं पवज्जिअ विहरिस्सामि अहं जम्मि॥१॥ **एवमादिचित्तविन्यासः** एवम् उक्तप्रकारेणादिपदात् स्वगतप्रमादनिन्दाग्रहस्तत्र चित्तन्यासः। एनमेव फलद्वारेणाह—**संवेगरसायनं** संवेगो भवनिर्वेदो मोक्षतीव्राभिलाषो वा स एव रसायनम् अजरामरत्वहेतुत्वात् तं **ददाति** प्रयच्छति। अयं भावः—अनन्तरोक्तचिन्तनतः संवेगो जायत इति॥१६॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

उपसंहरन्नाह—

**गोसे भणिओ य विही इय अणवरयं तु चिट्ठमाणस्स।**
**पडिमाकमेण जायइ संपुन्नो चरणपरिणामो॥२०॥**

इति श्रावकधर्मविंशिका नवमी॥६॥

**अक्षरगमनिका—**प्रातर्भणितश्च विधिः, एवमनवरतं तु चेष्टमानस्य प्रतिमाक्रमेण जायते चारित्रपरिणामः॥२०॥

**टीका—प्रातः** प्रत्युषसि **भणितो** निरूपित एव **चो**ऽवधारणे **विधिः** श्रावकाणां विहितानुष्ठान-लक्षणः। **एवम्** अनन्तरोक्तप्रकारेण **अनवरतं** सततमेव **तु**रवधारणे **चेष्टमानस्य** विदधानस्य **प्रतिमाक्रमेण** वक्ष्यमाणलक्षणेन **जायते** प्रादुर्भवति **सम्पूर्णः** अखण्डः **चारित्रपरिणामः** भवविरहबीजभूतः सर्वविरतिपरिणामः अत्रैव जन्मनि परभवे वा।॥२०॥

# दशमी श्रावकप्रतिमाविंशिका

अनन्तरविंशिकायां यदुक्तं प्रतिमाक्रमेण जायते सम्पूर्णश्चारित्रपरिणाम इत्यत्र विंशिकायां श्रावकप्रतिमा निरूप्यन्ते। तत्र प्रतिमानामनिर्देशिकाऽऽद्या गाथेयम्—

**दंसणवयसामाइयपोसहपडिमा अबंभसचित्ते।**
**आरंभपेस उद्दिट्ठवज्जए समणभूए य॥१॥**

**अक्षरगमनिका**—दर्शन-व्रत-सामायिक-पौषध-प्रतिमाऽब्रह्म-सचित्ताऽऽरम्भ-प्रैष्योद्दिष्टवर्जकः श्रमणभूतश्च॥१॥

**टीका**—**दर्शनं** सम्यग्दर्शनं, **व्रतानि** चाऽणुव्रतगुणव्रतादीनि, **सामायिकं** च समतासाधनं सावद्येतर-योगनिवृत्तिप्रवृत्तिलक्षणं, **पौषधं** चाऽष्टमीचतुर्दश्यादिदिनविधेयोपवासादि, **प्रतिमा** च कायोत्सर्गः, एतद्विषयक-प्रतिमेति सर्वत्र योज्यम्। एताश्च पञ्चाऽपि प्रतिमा विधेयत्वाद् विधिरूपा अवसेयाः। अतः परं पञ्च प्रतिमास्तत्तद्विषयवर्जनान्निषेधरूपा ज्ञातव्याः, तथाहि—**अब्रह्म** चाऽब्रह्मचर्यं **सचित्तं** सचेतनद्रव्यमिति समाहारद्वन्द्वाद् अब्रह्मसचित्तम्, **आरम्भश्च** स्वयं कृषिवाणिज्यादिकरणं, **प्रैषश्च** प्रैष्यद्वारा कृष्यादिकारणम्, **उद्दिष्टं** चात्मानमुद्दिश्य सचित्तं सदचित्तीकृतं पक्वं वा यो वर्जयति सः अब्रह्मसचित्ताऽऽरम्भप्रैषोद्दिष्टवर्जकः प्रतिमा, प्रतिमाप्रतिमावतोरभेदोपचाराद् एतद्वर्जनविषयाः प्रतिमाः समवसेयाः। एवमुत्तरत्रापि भावनीयम्। तथा—श्रमणः साधुः स इव यः स **श्रमणभूतः, चः** समुच्चये। सर्वत्र दर्शनव्रतादिपदेषु प्रतिमाशब्दो योज्यः, तथा च दर्शनप्रधाना प्रतिमा दर्शनप्रतिमा। एवमेव व्रतप्रधाना व्रतप्रतिमा। एवमुत्तरत्रापि नेयम्॥१॥ अथासां ज्ञानोपायमाह—

**एया खलु इक्कारस गुणठाणगभेयओ मुणेयव्वा।**
**समणोवासगपडिमा बज्झाणुट्ठाणलिंगेहिं॥२॥**

**अक्षरगमनिका**—एताः खल्वेकादश गुणस्थानकभेदतो बाह्यानुष्ठानलिङ्गैः श्रमणोपासकप्रतिमा मुणितव्याः॥२॥

**टीका**—**एता** अनन्तरोक्ता एव **खलुरवधारणे एकादश** सङ्ख्यया श्रमणोपासकप्रतिमा ज्ञातव्या इति सम्बन्धः। **गुणस्थानकभेदतो** देशविरतस्यैकमेव पञ्चमगुणस्थानं तथापि तदपान्तरालभूमिकापेक्षया प्रतिमाक्रमेण वा विशुद्धितारतम्यसूचका वा क्रमश आत्मोत्थानसूचका भेदास्तैः, **बाह्यानुष्ठानलिङ्गैश्च** बाह्यैस्तत्तत्प्रतिमा-योग्यैर्वक्ष्यमाणैः शुश्रूषादिभिर्लिङ्गैश्चिह्नैः **श्रमणोपासकप्रतिमाः** श्रमणोपासकः श्रावकस्तस्य प्रतिमाः प्रतिज्ञा अभिग्रहविशेषा इति यावद् **मुणितव्या** बोद्धव्या इति॥२॥ एतदेवाह—

**सुस्सूसाई जम्हा दंसणपमुहाण कज्जसूय त्ति।**
**कायकिरियाइ सम्मं लक्खिज्जइ ओहओ पडिमा॥३॥**

**अक्षरगमनिका**—यस्मात् शुश्रूषादय ओघतो दर्शनप्रमुखाणां कार्यसूचका इति कायक्रियया सम्यग् लक्ष्यते प्रतिमा॥३॥

**टीका**—**यस्मात्** कारणात् **शुश्रूषादयः** श्रवणेच्छाधर्मरागादय **ओघतः** सामान्येन **दर्शनप्रमुखाणां**

सम्यग्दर्शनव्रतादीनां **कार्यसूचकाः** फलाभिव्यञ्जका **इति** हेतोः **कायक्रियया** तत्त्वश्रवणदेवगुर्वादिवैयावृत्यादि-लक्षणया देहचेष्टया **सम्यक्** समीचीनतया **लक्ष्यते** ज्ञायते **प्रतिमा** पूर्वोक्तस्वरूपा दर्शनादिकेति। अत एव प्रतिमापञ्चाशके बोन्दी प्रतिमेत्युक्तं बोन्दीहेतुकत्वात् क्रियाभिव्यङ्ग्यानाम् प्रतिमागुणानामिति ॥३॥

अथ दर्शनप्रतिमामाह—

**सुस्सूस धम्मराओ गुरुदेवाणं जहासमाहीए।**
**वेयावच्चे नियमो दंसणपडिमा भवे एसा ॥४॥**

**अक्षरगमनिका**—शुश्रूषा धर्मरागो यथासमाधिना गुरुदेवानां वैयावृत्त्ये नियमो दर्शनप्रतिमा भवेदेषा ॥४॥

**टीका**—ग्रन्थिभेदेन तत्त्वे तीव्रभावात् **शुश्रूषा** तत्त्वश्रवणेच्छा तथा **धर्मरागोऽ**हिंसालक्षणे धर्मे चेतसोऽनुबन्धः। तथा **यथासमाधिना** शक्त्यनुरूपं यथा समाधिव्याघातो न स्यात्तथा **गुरुदेवानां** चैत्यसाधूनाम् देवस्वरूपप्रकाशकत्वाद् विवक्षया गुरूणां पूज्यतरत्वख्यापनार्थं गुरुपदस्य पूर्वनिपातो **वैयावृत्त्ये** व्यावृत्तकर्मणि प्रतिपत्तिविश्रामणादिसेवायामिति यावद् **नियमः** अवश्यकर्तव्यतया स्वीकारो **दर्शनप्रतिमा** दर्शनं प्रशमादि-गुणसम्यग्दर्शनं तस्य प्रतिमा पालनाभिग्रहो यावदेकमासं **भवेद्** जायेत **एषा** प्रथमा दर्शनप्रतिमा। इदं त्वत्र ध्येयम् प्रतिमास्वीकारतः प्रागपि श्रावकस्य दर्शनमोहनीयकर्मक्षयोपशमात् सम्यक्त्वं भवत्येव तथापि प्रतिमाराधनकाले शङ्कादिदोषराजाभियोगाद्यपवादवर्जितत्वेन तथाविधसम्यग्दर्शनाचारपालनाभ्युपगमेन च प्रतिमात्वं संभाव्यते। तदुक्तं च–

सम्मदंसणसंकाईसल्लपामुक्कसंजुओ जो जन्तु।
सेसगुणविप्पमुक्को एसा खलु होइ पढमा उ ॥१॥ (उपासकदशावृत्तौ)

अथ द्वितीयामाह—

**पंचाणुव्वयधारित्तमणइयारं वएसु पडिबंधो।**
**वयणा तदणइयारा वयपडिमा सुप्पसिद्ध त्ति ॥५॥**

**अक्षरगमनिका**—अनतिचारं पञ्चाणुव्रतधारित्वं व्रतेषु प्रतिबन्धो वचनात्तदनतिचाराद् व्रतप्रतिमा सुप्रसिद्धेति ॥५॥

**टीका**—**अनतिचारं** वधबन्धादिसुप्रतीतातिचाराणां वर्जनं महता प्रयत्नेन यथा स्यात्तथा **पञ्चाणुव्रतधारित्वं** स्थूलप्राणातिपातादिविरमणनिर्वाहकत्वं तथा **व्रतेषु** स्थूलप्राणातिपातादिविरमणरूपेष्वेव **प्रतिबन्ध** उत्तरगुणबहुमानपूर्विका प्रीतिः, **वचनात्** श्रीजिनोक्तात् **तदनतिचाराद्** व्रतविषयकातिचाराभावाच्च **व्रतप्रतिमा** व्रतप्रधाना द्वितीया श्रावकप्रतिमा **सुप्रसिद्धा** सुप्रतीता। अयं विशेष :—

अस्यां प्रतिमायां प्रथमप्रतिमोक्तमनुष्ठानं निरवशेषमपि कर्तव्यम्। तदुक्तं चोपासकदशावृत्तौ—

दंसणपडिमाजुत्तो पालेन्तोऽणुव्वए निरइयारे।
अणुकंपाइगुणजुओ जीवो इह होई वयपडिमा ॥१॥

तृतीयायां तु प्रतिमायां प्रथमाद्वितीयाप्रतिमाद्वयोक्तमप्यनुष्ठानं विधेयम्, एवं यावदेकादश्यां पूर्वप्रतिमादशकोक्तं सर्वमप्यनुष्ठानं करणीयमिति। तथा-प्रथमप्रतिमायां कालमानमेको मास उक्तमेव। अस्यां

द्वितीयायां तु द्वौ मासौ, तृतीयायां त्रयो मासा एवमुत्तरत्रापि प्रतिप्रतिमां मासवृद्ध्या यावदेकादश्यां प्रतिमायामेकादश मासा उत्कृष्टं कालमानं, जघन्यतः पुनरेकादशापि प्रतिमाः प्रत्येकमन्तर्मुहूर्तादिमाना एव, तच्च मरणे वा प्रव्रजितत्वे वा सम्भवति, नान्यथेति ज्ञेयम् ॥५॥ अथ तृतीयामाह—

**तह अत्तवीरिउल्लासजोगओ रयतसुद्धिदित्तिसमं।**
**सामाइयकरणमसइ सम्मं सामाइयप्पडिमा ॥६॥**

**अक्षरगमनिका**—तथा–आत्मवीर्योल्लासयोगतः असकृत् सम्यग् रजतशुद्धिदीप्तिसमं सामायिककरणं सामायिकप्रतिमा ॥६॥

**टीका—तथा** समुच्चये,**आत्मवीर्योल्लासयोगतो** वीर्यान्तरायकर्मक्षयोपशमाद् यद् आत्मवीर्यं स्वजीवबलं तेनोल्लास उत्साहो गुणाराधनार्थं तस्य योगतो व्यापारेण **असकृद्** बहुशः **सम्यग्** यथाविधि **रजतशुद्धिदीप्तिसमं** रजतं धातुविशेषस्तच्छुद्धिरनवद्यता तत एव दीप्तिः कान्तिस्तया समं तुल्यम् अतिचारपरिहारेण यथाविधिसेवनाद् विशुद्धिमत्वाच्च, **सामायिककरणं** सामायिकं सावद्येतरयोगनिवृत्तिप्रवृत्तिलक्षणः अनुष्ठानविशेषो मुहूर्तादिकालावधिकं तस्य करणं विधानम्। श्रावकस्य परमगुणस्थानमेतद् यतः सामायिके कृते सति श्रमण इव श्रावको भणितः। एवं **सामायिकप्रतिमा** तृतीया सामायिकप्रधाना प्रतिमा यावत् त्रीन् मासान्। उक्तं च–वरदंसणजुओ सामाइयं कुणइ जो तिसञ्झासु। उक्कोसेण तिमासं एसा सामाइयप्पडिमा ॥१॥ (उपासकदशावृत्तौ) ॥६॥

अथ चतुर्थीमाह—

**पोसहकिरियाकरणं पव्वेसु तहा तहा सुपरिसुद्धं।**
**जइभावभावसाहगमणघं तह पोसहप्पडिमा ॥७॥**

**अक्षरगमनिका**—तथा पर्वसु तथा तथाऽनघं यतिभावभावसाधकं सुपरिशुद्धं पौषधक्रियाकरणं पौषधप्रतिमा ॥७॥

**टीका—तथा** समुच्चये **पर्वसु** अष्टमीचतुर्दश्यादिषु **तथा तथा** तेन तेन प्रकारेण **अनघं** निष्पापं **यतिभावभावसाधकं** यतिः साधुस्तस्य भावः सर्वविरतिपरिणामस्तस्य भावतः परमार्थतः साधकं निष्पादकं **सुपरिशुद्धं** यथाविधि निरतिचारं **पौषधक्रियाकरणं** पुष्णाति धर्ममिति पौषधं चतुर्विधाहारशरीरसत्काराऽब्रह्मसावद्यव्यापारपरिहाररूपमनुष्ठानं तस्य क्रिया परिपूर्णपालनात्मिका न पुनरन्यतरेणापि प्रकारेण परिहीना तस्याः करणं विधानं चतुर्थी पौषधप्रधाना **पौषधप्रतिमा** ज्ञेया। तदुक्तं चोपासकदशाटीकायाम्–पुव्वोदियपडिमाजुओ पालइ जो पोसहं तु संपुण्णं। अट्ठमीचउद्दसाइसु चउरो मासे चउत्थी सा ॥१॥ ॥७॥

अथ पञ्चमीमाह—

**पव्वेसु चेव राइं असिणाणाइकिरियासमाजुत्तो।**
**मासपणगावहि तहा पडिमाकरणं तु तप्पडिमा ॥८॥**
**असिणाण वियडभोई मउलियडो रत्तिबंभमाणेण।**
**पडिवक्खमंतजावाइसंगओ चेव सा किरिया ॥९॥**

**अक्षरगमनिका**—पर्वस्वेवाऽस्नानादिक्रियासमायुक्तो मासपञ्चकावधि रात्रिं तथाप्रतिमाकरणं तु

तत्प्रतिमा ॥८॥ अस्नानो विकटभोजी मुत्कलकच्छो रात्रावब्रह्ममानेन प्रतिपक्षमन्त्रजापादिसंङ्गतश्च सा क्रिया ॥६॥

**टीका—पर्वस्वेव** अष्टमीचतुर्दश्यादिष्वेव पौषधदिनेषु **अस्नानादिक्रियासमायुक्तो** वक्ष्यमाणाऽस्नानविकटभोज्यादिक्रियासमन्वितो **मासपञ्चकमुक्ति** यावत् पञ्च मासान् **रात्रिं** निशामेकां चतुष्पथादौ **तथाप्रतिमाकरणं** वक्ष्यमाणप्रकारेण प्रतिमा कायोत्सर्गस्तस्य करणं विधानमेव **तु**रवधारणे **तत्प्रतिमा** प्रतिमाप्रतिमा पञ्चमी स्थिरसत्त्वस्य ज्ञानिनः अणुव्रतगुणव्रतशिक्षाव्रतवतः श्रमणोपासकस्य। तदुक्तं चोपासकदशावृत्तौ सम्ममणुव्वयगुणवयसिक्खावयं थिरो य नाणी य अट्ठमी चउद्दसीसुं पडिमं ठाएगराइयं ॥१॥ प्रतिज्ञातामस्नानादिक्रियामाह–**अस्नानः** प्रतिमादिनेषु स्नानपरिवर्जकः, तथा **विकटभोजी** प्रतिमावर्जेष्वपि दिवसेषु रात्रिभोजनत्यागेन प्रस्तुतप्रतिमायां तु विकटे दिवा भुङ्क्त इति, तथा **मउलियडो** प्राकृतत्वाद् मुत्कलकच्छः प्रतिमादिनेषु अबद्धपरिधानकच्छः कच्छां नारोपयतीत्यर्थः, तथा प्रतिमावर्जेषु दिवसेषु **रात्रौ** निशि**अब्रह्ममानेन** संभोगपरिमाणेन सङ्गत इति वक्ष्यमाणमत्रापि योज्यम्। अयं भावः—अत्र तु प्रतिमायां प्रतिमारात्रिषु पौषधप्रतिमागताऽब्रह्मपरिहारात् प्रतिमावर्जास्वपि रात्रिषु अब्रह्मपरिमाणेन युक्तो ज्ञेयः। उक्तं चोपासकदशाविवरणे–राइं परिमाणकडो पडिमावज्जेसु दियहेसु ॥ तथा **प्रतिपक्षमन्त्रजापादिसङ्गतः** अब्रह्मणः प्रतिपक्षः प्रतीपो विरुद्धः पक्षः सहायो ब्रह्म तदेव ब्रह्मचर्यं तद्रक्षार्थं मन्त्रो यथा 'ॐ नमो बंभवयधारीणं' इत्यादिरूपस्तस्य जापः पुनःपौन्येन स्मरणम् आदिपदात् स्त्रीदेहाशुचिभावनादिग्रहस्तेन **संगतो** युक्तो जीवाजीवादितत्त्वज्ञः श्रमणोपासको भवति। क्रियाक्रियावतोरभेदोपचारात् **सा**ऽनन्तरगाथोक्ताऽस्नानादिका **क्रिया**ऽनुष्ठानरूपा ज्ञेया। प्रसङ्गतः कायोत्सर्गे स्थितो यद् ध्यायति तदुच्यते–लोकपूज्यान् जिनान् जितकषायान् अन्यद्वा जिनापेक्षया निजकामक्रोधादिदोषप्रत्यनीकं कामनिन्दाक्षान्तिप्रभृतिकम्। तदुक्तं चोपासकदशावृत्तौ झायइ पडिमाए ठिओ तिलोयपुज्जे जिणे जियकसाए। नियदोसपच्चणीयं अण्णं वा पञ्च जा मासा ॥१॥८-६॥

अथ षष्ठीमाह—

**एवं किरियाजुत्तोऽबंभं वज्जेइ नवरं राइं पि।**
**छम्मासावहि नियमा एसा उ अबंभपडिमत्ति ॥१०॥**

**अक्षरगमनिका**—एवं क्रियायुक्तः अब्रह्म वर्जयति केवलं रात्रावपि षण्मासावधि नियमादेषा त्वब्रह्मप्रतिमेति ॥१०॥

**टीका—एवं** पूर्वोदितगुणवान् **क्रियायुक्तः** अस्नानादिक्रियासमन्वितः स्थिरचित्तो विजितमोहनीयश्चाऽत एव **अब्रह्म** मैथुनं **वर्जयति** परिहरति **नवरं** प्राकृतत्वात् पुनरर्थ विशेषद्योतकम्, तथाहि–पूर्वस्यां हि प्रतिमायां दिवस एव मैथुनं प्रतिषिद्धमासीत् अस्यां तु दिवापि **रात्रावपि** रजन्यामपि सर्वथेत्यर्थः **षण्मासावधि** यावत् षण्मासान् **नियमा**दवश्यंतयाऽत एवात्र विस्रोतसिकाहेतूनां श्रृङ्गारकथाविभूषोत्कर्षादीनामपि प्रतिषेधः कृतः। उक्तं चोपासकदशाटीकायाम्—

पुव्वोदियगुणजुत्तो विसेसओ विजियमोहणिज्जो य।
वज्जइ अबम्भमेगन्तओ य राइं पि थिरचित्तो ॥१॥
सिङ्गारकहाविरओ इत्थीए समं रहसि नो ठाई।
चयइ य अइप्पसङ्गं तहा विभूसं च उक्कोसं ॥२॥

**एषाऽनन्तरोक्तस्वरूपैव तुरवधारणे अब्रह्मप्रतिमा** अब्रह्मवर्जनप्रधाना प्रतिमा **इतिः** समाप्तौ ॥१०॥ अथाब्रह्मणो वर्जनमेव प्रसङ्गेन विशेषतो निरूपयति—

**जावज्जीवाए वि हु एसाऽबंभस्स वज्जणा होइ।**
**एवं चिय जं चित्तो सावगधम्मो बहुपगारो॥११॥**

**अक्षरगमनिका**—एवमेव यावज्जीवतयापि खल्वेषाऽब्रह्मणो वर्जना भवति यच्चित्रः श्रावकधर्मो बहुप्रकारः ॥११॥

**टीका—एवमेव** अनन्तरोक्तनीत्यैव **यावज्जीवतयापि**—यावज्जीवं प्राणधारणं तस्य भावो यावज्जीवता तयापि न केवलं षण्मासावधीत्यपेरर्थः, **हु** प्राकृतत्वात् सम्भावनायाम् **एषा** ग्रन्थकारहृदयस्था **अब्रह्मणो** मैथुनस्य **वर्जना** परिहरणा **भवति** जायते **यद्** यस्मात् **चित्रः** अद्भुतः **श्रावकधर्मः** श्रमणोपासकधर्मो **बहुप्रकारः** अनेकविध इति ॥११॥ अथ सप्तमीमाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**एवंविहो उ नवरं सच्चित्तं पि परिवज्जए सव्वं।**
**सत्त य मासे नियमा फासुयभोगेण तप्पडिमा॥१२॥**

**अक्षरगमिनका**—एवंविधस्तु केवलं प्रासुकभोगेन सचित्तमपि सर्वं परिवर्जयति सप्त च मासान् नियमात् तत्प्रतिमा ॥१२॥

**टीका—एवंविधः** अनन्तरोक्तषष्ठीप्रतिमागुणवानेव **तुरवधारणे नवरं** प्राकृतत्वात् केवलं **प्रासुकभोगेन** अचेतनाशनाद्यभ्यवहारेण **सचित्तमपि** न केवलमब्रह्म सचेतनाशनादिकमपि **सर्वं** निरवशेषं **परिवर्जयति** परिहरति यावत् **सप्त च मासान् नियमाद्** अवश्यंतया **तत्प्रतिमा** सचित्तवर्जना प्रतिमा सप्तमीति॥१२॥ सचित्तपरिहारमेव प्रसङ्गेन विशेषत आह—

**जावज्जीवाए वि हु एसा सच्चित्तवज्जणा होइ।**
**एवं चिय जं चित्तो सावगधम्मो बहुपगारो॥१३॥**

**अक्षरगमनिका**—एवमेव खल्वेषा सचित्तवर्जना यावज्जीवतयापि भवति यत् चित्रः श्रावकधर्मो बहुप्रकारः ॥१३॥

**टीका—एवमेव** अनन्तरोक्तप्रकारेणैव **हु** प्राकृत्वात् सम्भावनायाम् **एषा** ग्रन्थकारहृदयस्थितत्वात् प्रत्यक्षा **सचित्तवर्जना** पूर्वोक्तस्वरूपा **यावज्जीवतयापि** यावत्कथिकमपि भवति **यद्** यतश्चित्रः पूर्ववत् **श्रावकधर्म** उपासकधर्मो **बहुप्रकारः** पूर्ववदिति॥१३॥ अथाष्टमीमाह—

**एवं चिय आरम्भं वज्जइ सावज्जमट्ठमासं जा।**
**तप्पडिमा पेसेहि वि अप्पं कारेइ उवउत्तो॥१४॥**

**अक्षरगमनिका**—एवमेत सावद्यमारम्भं वर्जयति यावदष्ट मासान् उपयुक्तः प्रैष्यैरप्यल्पं कारयति॥१४॥

**टीका—एवमेव** अधस्तनीप्रतिमोक्तानुष्ठानं विदधान एव **सावद्यारम्भं** कर्मबन्धकारणं कृषि-वाणिज्यादिकं स्वयं करणतो **वर्जयति** परिहरति **यावदष्ट मासान्** अष्टमासावधि तावद् वृत्तिनिमित्तम् **उपयुक्तः**

तथाविधतीव्रपरिणामरहितः **प्रैष्यैरपि** कर्मकरैरपि **अल्पं** स्तोकं सावद्यारम्भं **कारयति** विधापयति। ननु स्वयं करणतः सावद्यारम्भं परिहरन् कर्मकरैः कारयन् निर्दयता तदवस्थैवेति चेत्, सत्यं तथापि स्वपरोभयकरणकारणजन्या या हिंसा सा स्वयमकरणतः परिहृता भवति यतः स्तोकोपि सावद्यपरिहारप्रारम्भ उल्वणव्याधेः स्तोकक्षय इव हितकर एव भवतीति॥१४॥ अथ नवमीमाह—

**तेहिं पि न कारेई नवमासे जाव पेसपडिम त्ति।**
**पुव्वोइया उ किरिया सव्वा एयस्स सविसेसा॥१५॥**

**अक्षरगमनिका**—तैरपि न कारयति नव मासान् यावत् प्रैषप्रतिमेति। पूर्वोदिता तु क्रिया सर्वैतस्य सविशेषा॥१५॥

**टीका**—पुत्रभ्रात्रादिषु न्यस्तकुटुम्बादिकृत्यभार ईश्वरः सन्तुष्टो वा धनधान्यादिषु अल्पाभिष्वङ्गतया चास्तां स्वयं **तैरपि** प्रैष्यैरपि **न** नैव **कारयति** विधापयति गुरुकान् सावद्यान् कृष्यादीनारम्भान्। अनेनाऽऽसनदापनादिलघुव्यापाराणामनिषेधः प्राप्यते। **नव मासान् यावद**वधि। **एषा**ऽनन्तरोक्तस्वरूपा नवमी **प्रैषप्रतिमा इति** एवम्। अत्र विशेषमाह-**पूर्वोदिता** अधस्तनीप्रतिमोदिता **तुः** पुनरर्थः **क्रिया** अनुष्ठानलक्षणा **सर्वा** निरवशेषा **एतस्य** नवमीप्रतिमाराधकश्रावकस्य **सविशेषा** साधिकेति॥१५॥ अथ दशमीमाह—

**उद्दिट्ठाहाराईण वज्जणं इत्थ होइ तप्पडिया।**
**दसमासावहि सज्झायझाणजोगपहाणस्स॥१६॥**

**अक्षरगमनिका**—स्वाध्यायध्यानयोगप्रधानस्योद्दिष्टाहारादीनां वर्जनमत्र दश मासावधि भवति तत्प्रतिमा॥१६॥

**टीका**—**स्वाध्यायध्यानयोगप्रधानस्य** स्वाध्यायश्च वाचनाप्रच्छनादिलक्षणो ध्यानं च धर्म्यादि स्वाध्यायध्याने त एव योगो धर्मव्यापारः प्रधानः प्रमुखो यस्य स तथा तस्य **उद्दिष्टाहारादीनाम्** आस्तां शेषसावद्ययोगस्य, उद्दिष्टं तमेव प्रस्तुतप्रतिमासमाराधकश्रावकमुद्दिश्य कृतमाहारादि अशनपानादिकमादौ येषां खादिमादीनां तानि तथा तेषामपि यद् **वर्जनं** परिहारः **अत्र** प्रस्तुतप्रतिमायां **दश मासावधि** दश मासान् यावत् **तद्** उद्दिष्टाहारवर्जनप्रधाना **प्रतिमा** दशमी **भवति** जायते। अयं तु विशेष :—एतत्प्रतिमाप्रतिपत्ता पुनः कश्चित् क्षुरमुण्डितमस्तको भवति शिखां वा शिरसि कोऽपि धारयति। तथा तत्र प्रतिमायां स्थितः साधूपासनापरः सूक्ष्मपदार्थेषु नित्यलिप्सः सन् पूर्वं भूम्यादौ यत् सुवर्णादिकं द्रव्यं निक्षिप्तं तत्पृच्छतां पुत्रादीनां यदि जानाति तर्हि कथयति, अकथने वृत्तिविच्छेदापत्तेः। अथ नैव जानाति ततो ब्रूते-नैवाहं किमपि जानामीति। एतावन्मुक्त्वा नान्यत्किमपि तस्य गृहकृत्यं कर्तुं कल्पत इति तात्पर्यम्॥ यदुक्तं चोपासकदशावृत्तौ-दसमा पुण दस मासे उद्दिट्ठकयंपि भत्त नवि भुंजे। सो होइ छुरमुंडो छिहलिं वा धारए जाहिं॥१॥ जं निहियमत्थजायं पुच्छंति नियाण नवरि सो आह। जइ जाणे तो साहे अह नवि तो बेंति नवि जाणे॥२॥१६॥

अथैकादशीं चरमामाह—

**इक्कारस मासे जाव समणभूयपडिमा उ चरिम त्ति।**
**अणुचरइ साहुकिरियं इत्थ इमो अविगलं पायं॥१७॥**

**अक्षरगमनिका**—एकादश मासान् यावत् श्रमणभूतप्रतिमा तु चरिमेति अयमत्र प्रायः अविकलां साधुक्रियामनुचरति ॥१७॥

**टीका**—**एकादश** संख्यया **मासान् यावद**वधि पुनः **चरिमा** पश्चिमा **तुः** पुनरर्थे **श्रमणभूतप्रतिमा** पूर्वोक्तशब्दार्था **इति** हेतोः,**अयं** श्रमणोपासकः क्षुरमुण्डो लोचमुण्डो वा प्रतिपत्ता अत्र प्रतिमायां रजोहरणपतद्ग्रहादिकं समस्तसाधूपकरणमादाय गृहान्निर्गत्य श्रमण इव **प्रायो** बाहुल्येन **अनुचरति** अनुतिष्ठति कायेन न मनोमात्रेण, काम्? **अविकलां** सम्पूर्णां **साधुक्रियां** समितिगुप्त्यादियतिसामाचारीम्। अयं विशेष :—अव्युच्छिन्नममत्वः स्वज्ञातीन् द्रष्टुं संज्ञातकपल्लिं गच्छति। तत्र ज्ञातयः स्नेहादनेषणीयं भक्तादि कुर्वन्ति। आग्रहेण च तद् ग्राहयितुमिच्छन्ति। अनुवर्तनीयाश्च ते तथापि तदसौ न गृह्णाति, अपि तु साधुरिवैषणीयं प्रासुकं च गृह्णाति। तदुक्तं चोपासकदशाटीकायाम्—

खुरमुंडो लोओ वा रयहरण पडिग्गहं च गेण्हित्ता।
समणब्भुओ विहरे णवरिं सण्णायगा उवरिं॥१॥

मार्गदर्शक :- आचार्य श्री

ममिकार अवोच्छिन्ने वच्चइ सण्णायपल्लिं दट्ठुं जे।
तत्थ वि साहुव्व जहा गिण्हइ फासुं तु आहारं॥२॥१७॥

अथ फलभेदद्वाराऽनन्तरोक्तश्रमणभूतप्रतिमागतविशुद्धिसङ्क्लेशभेदेन भावभेदमाह—

**आसेविऊण एयं कोई पव्वयइ तह गिही होइ।**
**तब्भावभेयओ चिय विसुद्धिसंकेसभेएणं॥१८॥**

**अक्षरगमनिका**—विशुद्धिसङ्क्लेशभेदेनाऽऽसेव्यैतां तद्भावभेदत एव कोऽपि प्रव्रजति तथा गृही भवति॥१८॥

**टीका**—**विशुद्धिसङ्क्लेशभेदेन** अश्रद्दधानविपरीतप्ररूपणातोऽत्रापि श्रमणभूतप्रतिमायामतिचार-सम्भवः, तदुक्तं चोपासकदशावृत्तौ—पण्णवणवितहअसद्दहणाभावाउ अइयारो॥ यदि वा विहितेषु तपोज्ञानादिषु मनाग्रागतो निषिद्धेषु चेषद् द्वेषतोऽपि मालिन्यसम्भवः, उक्तं च योगशतके—

पडिसिद्धेसु अ देसे, विहिएसु य ईसिरागभावे वि।
सामाइयं असुद्धं, सुद्धं समयाए दोसुं पि॥१७॥

अत एव अतिचारमालिन्यभावाभावाभ्याम् **आसेव्य** अनुष्ठाय **एताम्** अनन्तरोक्तां प्रतिमां **तद्भावभेदत एव** विशुद्धसङ्क्लिष्टाध्यवसायभेदत एव **कोऽपि** आसन्नसिद्धिको **प्रव्रजति** यतिभावमङ्गीकरोति **तथा**ऽन्यः सङ्क्लिष्टः पुनरपि **गृही** गृहस्थो **भवति** जायते। अत्राध्यवसायकृत एव भेदो न तु क्रियाकृतो भेदः अविकलसाधुक्रियाविधानादिति॥१८॥ अथासामेव प्रतिमानां हेतुपुरस्सरं यथोत्तरं विशुद्धितारतम्यं निरूप्य जीवविशुद्धिकारणत्वेन प्राशस्त्यमाह—

**एया उ जहुत्तरमो असंखकम्मक्खओवसमभावा।**
**हुंति पडिमा पसत्था विसोहिकरणाणि जीवस्स॥१९॥**

**अक्षरगमनिका**—एताः प्रतिमास्तु यथोत्तरमसंख्यकर्मक्षयोपशमभावाद् जीवस्य विशोधिकारणानि प्रशस्ता भवन्ति॥१९॥

**टीका**—**एता** अनन्तरोक्ता एकादश **प्रतिमा** दर्शनव्रतादिकास्**तुः** पुनरर्थः, **यथोत्तरं** प्रथमप्रतिमापेक्षया द्वितीयाप्रतिमा, द्वितीयापेक्षया तृतीया, तृतीयापेक्षया चतुर्थी, एवं यावदेकादशी प्रतिमा, **असङ्ख्य-कर्मक्षयोपशमभावाद्** असङ्ख्यः पदैकदेशे पदसमुदायोपचाराद् असङ्ख्यगुणः स चासौ मोहनीयप्रभृतिकर्मणां क्षयोपशमः पूर्वोक्तस्वरूपस्तस्य भावो भवनं तस्माद् **जीवस्य** प्रतिमाराधकभव्यसत्त्वस्य **विशोधिकारणानि** चारित्रमोहनीयादिकर्मनिर्जरया रागादिसहजमलक्षयापादनादात्मशुद्धिहेतवः अत एव **प्रशस्ताः** शुभा **भवन्ति** वर्तन्त इति ॥१९॥ उपसंहरन्नाह—

मार्गदर्शक — आचार्य श्री सुविधिसागर जी महाराज

**आसेविऊण एया भावेण निओगओ जई होइ।**
**जं उवरि सव्वविरई देसविरई उ॥२०॥**

इति श्रावकप्रतिमाविंशिका दशमी॥१०॥

**अक्षरगमनिका**—आसेव्यैता भावेन नियोगतो यतिर्भवति यद् भावेन देशविरतित **उपरि** सर्वविरतिः॥२०॥

**टीका**—श्रमणोपासक **आसेव्य** समाराध्य **एता** अनन्तरोक्ता एकादश प्रतिमा **भावेन** यथाविधि निराशंसभावेन **नियोगतः** अवश्यं **यतिः** श्रमणो **भवति** जायते **यद्** यस्माद् **भावेन** निश्चयतो **देशविरतितः** पञ्चमगुणस्थानकलक्षणश्रावकधर्माद् **उपरि** पश्चाद् भाविनी **सर्वविरतिः** षष्ठसप्तमादिगुणस्थानकरूपो यतिधर्मो वर्तत इति शेषः। अनन्तरोक्तक्रम ओघत एव ज्ञेयो न तु सर्वथा यतः कर्मग्रन्थाभिप्रायेण कश्चित् प्रथमगुणस्थानकवर्ती भव्यसत्त्वो युगपदेव चतुर्थं सप्तमं च गुणस्थानकमारोहति तथा श्रावकप्रतिमा अनासेव्यैव बहूनां प्रव्रज्याश्रवणात् तथापि दुःषमकालानुभावाद् दुरनुचरत्वाच्च संयमस्य प्रव्रजितुकामेन प्रतिमाभ्यासो विधेय इति॥२०॥

*

# एकादशी यतिधर्मविंशिका

समाप्ता श्रावकप्रतिमाविंशिका, तत्समाप्तौ च समाप्तं ग्रन्थार्धम्। तत एव प्राप्तो मध्यमङ्गलावसरः। अतस्तत्पुरस्सरं श्रावकप्रतिमाफलभूतं तदुपरिभाविनं च यतिधर्मं निरूपयितुकाम आह—

**नमिऊण खीणदोसं गुणरयणनिहिं जीणं महावीरं।**
**संखेवेण महत्थं जइधम्मं संपवक्खामि॥१॥**

**अक्षरगमनिका**—नत्वा क्षीणदोषं गुणरत्ननिधिं जिनं महावीरं सम्प्रवक्ष्यामि संक्षेपेण महार्थं यतिधर्मम्॥१॥

**टीका**—**नत्वा** प्रणम्य मनोवाक्कायैः **क्षीणदोषं** क्षीणाः समूलं क्षयं गता मोहाज्ञानादयो दोषा आत्मगुणदूषका यस्य स क्षीणदोषस्तम्, अत एव **गुणनिधिं** दोषविगमेन प्रादुर्भूतवीतरागत्वसर्वज्ञत्वादिगुणानां धर्मतीर्थप्रवर्तनादिगुणानामुपकाराणां च निधिर्निधानं तम्, **जिनं** रागादिरिपुजेतारं **महावीरम्** आसन्नोपकारिवर्तमान-धर्मशासनपतिं **सम्प्रवक्ष्यामि** सम्यक् प्रकर्षेण भणिष्यामि **संक्षेपेण** समासेन, व्यासेन तु ग्रन्थकृता स्वयं ग्रन्थान्तरेषु भणितत्वात्, **महार्थं** गभीरार्थं तीर्थकरगणधरैराचीर्णत्वादुपदिष्टत्वाच्च **यतिधर्मं** यतीनां साधूनां क्षान्त्यादिदशविधो धर्मस्तम्, न तु श्रावकधर्मं तस्यानन्तरमेवोक्तत्वादिति॥१॥ अथ यतिधर्मतया गुणानाह—

**खंती य मद्दवज्जव मुत्ती तव संजमे य बोद्धव्वे।**
**सच्चं सोयं आकिंचणं च बंभं च जइधम्मो॥२॥**

**अक्षरगमनिका**—क्षान्तिमार्दवार्जवं मुक्तिस्तपः संयमश्च सत्यं शौचमाकिञ्चन्यं च ब्रह्म च यतिधर्मो बोद्धव्यः ॥२॥

**टीका**—प्राकृतत्वेन विभक्तिप्रत्ययलोपात् समाहारद्वन्द्वाद्वैकवद्भावात् **क्षान्तिः** सहनपरिणामः क्रोधनिरोधात्तितिक्षा यतिधर्मः, एवमुत्तरत्रापि योज्यम्। **मार्दवं** मृदुता मानत्यागः,**आर्जव**मृजुता मायापरिहारः, **मुक्ति**र्लोभविवेकस्तृष्णाच्छेदेन मुक्तिसुखास्वादाद् मुक्तिहेतुरिति, **तपो**ऽनशनादिद्वादशविधम्, **संयम** आश्रवकषायेन्द्रियादिनिरोधेन षड्जीवनिकायरक्षणम्, **सत्यं** मृषापरिहारेण सद्भ्यो हितो वाग्व्यापारः, **शौचं** संयमं प्रति निरुपलेपता निरतिचारतेत्यर्थः अचौर्यमित्यन्ये, **आकिञ्चन्यं** धनकनकादिरहितता, **ब्रह्म** ब्रह्मचर्यम्, **च**शब्दाः समुच्चयार्थाः, **यतिधर्मः** श्रमणधर्मो **बोद्धव्यो** ज्ञातव्य इति॥२॥ अथ क्षान्तिमेव विशेषत आह—

**उवगारवगारिविवागवयणधम्मुत्तरा भवे खंती।**
**साविक्खं आदितिगं लोगिगमियरं दुगं जइणो॥३॥**

**अक्षरगमनिका**—उपकार्यपकारिविपाकवचनधर्मोत्तरा भवेत् क्षान्तिः। सापेक्षमादित्रिकं लौकिकमितरद् द्विकं यतेः॥३॥

**टीका**—**उपकारी** उपकारवान्, **अपकारी** अपकारप्रवृत्तः, **विपाकः** कर्मफलानुभवनमनर्थपरम्परा वा, **वचनम्** आगमः, **धर्मः** शुद्धात्मस्वभावस्त**दुत्तरा** तत्प्रधाना **भवेद्** जायेत **क्षान्तिः** क्षमा। तदुक्तं च षोडशकवृत्तौ—तत्रोपकारिणि क्षान्तिरुपकारक्षान्तिः, तदुक्तं दुर्वचनाद्यपि सहमानस्य। तथा अपकारिणि क्षान्तिरपकारक्षान्तिः, मम दुर्वचनाद्यसहमानस्यायमपकारी भविष्यतीत्यभिप्रायेण क्षमां कुर्वतः। तथा विपाके क्षान्तिः विपाकक्षान्तिः, कर्मफलविपाकं नरकादिगतमनुपश्यतो दुःखभीरुतया मनुष्यभव एव वाऽनर्थपरम्परामालोचयतो विपाकदर्शनपुरस्सरा संभवति। तथा वचनक्षान्तिः आगममेवालम्बनीकृत्य या प्रवर्तते, न पुनरुपकारित्वापकारित्वविपाकाख्यालम्बनत्रयं सा वचनपूर्वकत्वादन्यनिरपेक्षत्वात्तथोच्यते। धर्मोत्तरा तु क्षान्तिश्चन्दनस्येव शरीरस्य छेददाहादिषु सौरभादिस्वधर्मकल्पा परोपकारकारिणी, न विक्रियते सहजत्वेनावस्थिता सा तथोच्यते। एवं क्षान्तिः पञ्चधा। तत्रा**दित्रिकम्** उपकार्यपकारिविपाकक्षान्तिलक्षणं **लौकिकं सापेक्षं** लोके प्राकृतजनाचीर्णत्वाद् लौकिकफलसापेक्षत्वाच्च। **इतरद्** लोकोत्तरं **द्विकं** वचनधर्मक्षान्तिरूपं लौकिकफलनिरपेक्षतया लोकोत्तरमोक्षफलत्वाद् **यतेः** श्रमणस्य भवतीति॥३॥ एतदेव हेतुपुरस्सरमाह—

**बारसविहे कसाए खविए उवसामिए य जोगेहिं।**
**जं जायइ जइधम्मो ता चरिमं तत्थ खंतिदुगं॥४॥**

**अक्षरगमनिका**—यद् योगैर्द्वादशविधे कषाये क्षपित उपशामिते च जायते यतिधर्मस्तस्मात्तत्र, चरमं क्षान्तिद्विकम्॥४॥

**टीका**—**यद्** यस्माद् **योगैः** ज्ञानक्रियालक्षणैः **द्वादशविधे** अनन्तानुबन्धिचतुष्काप्रत्याख्यानावरणचतुष्कप्रत्याख्यानावरणचतुष्कलक्षणे **कषाये** क्रोधमानमायालोभरूपे चारित्रमोहनीयादिकर्मणामुदीर्णेऽशे **क्षपिते** क्षयं नीते तथानुदीर्णेऽशे **च उपशामिते** उपशमं प्रापिते सति **जायते** प्रादुर्भवति **यतिधर्मः** क्षान्त्यादिलक्षणः

श्रमणधर्मः, **तस्मात्** कारणात् **तत्र** यतिधर्मे धर्मधर्मिणोर्वा कथञ्चिदभेदाद् यतौ **चरमं** वचनधर्मलक्षणं **क्षान्तिद्विकं** क्षमाद्वयं वचनक्षान्तिधर्मक्षान्तिश्च भवतीति॥४॥ ननु द्वादशविधे कषाये क्षपित उपशमिते च यतिधर्मो जायते तथापि संज्वलनानामुदयस्तदवस्थस्ततस्तत्र कथं निरपेक्षा क्षान्तिरित्याशङ्क्याह—

**सव्वे य अईयारा जं संजलणाणमुदयओ हुंति।**
**ईसिजलणा य एए कुओवगारादविक्खेह॥५॥**

**अक्षरगमनिका**—यत् सर्वे चातिचाराः संज्वलनानामुदयतो भवन्ति, ईषज्ज्वलनाश्चैते कुत उपकाराद्यपेक्षेह॥५॥

**टीका**—**यद्** यस्मात् **सर्वे** निरवशेषा एव **चः** अवधारणे **अतिचारा** व्रतमालिन्यापादका लघवः अपराधाः **संज्वलनानां** षष्ठादिगुणस्थानकवर्तिजीवेषु लब्धसत्तानां क्रोधादीनाम् **उदयतो** विपाकोदयतो **भवन्ति** जायन्ते, तथा स्वभावत एव **ईषज्ज्वलनाः** स्वल्पदहनाः कादाचित्कत्वान्निरनुबन्धाच्च **चः** पुनरर्थे **एते** संज्वलनक्रोधादयः। अत एव **इह** यतिधर्मे क्रोधादिकण्डूर्नातितीव्रा। एवं सति **कुतः** कस्मात् **उपकाराद्यपेक्षा** उपकारादिलौकिकफलसापेक्षा लालसा, न कुतोऽपीत्यर्थः। इदं तु ध्येयम्—वचनक्षान्त्यामेवाति-विरलातिचारसम्भवः, धर्मक्षान्त्यां तु विक्रियाऽभावाद् अतिचाराभाव एव॥ तदुक्तं च–चरमाद्यायां सूक्ष्मा अतिचाराः प्रायशोऽतिविरलाश्च। (षोडशक १०–११ पूर्वार्धम्)॥५॥

एतदेवाह—

**छट्ठे उण गुणठाणे जइधम्मो दुग्गलंघणं तं च।**
**भणियं भवाडवीए न लोगचिंता तओ इत्थं॥६॥**

**अक्षरगमनिका**—षष्ठे पुनर्गुणस्थाने यतिधर्मः, तच्च भवाटव्यां दुर्गलंघनं भणितं, ततोऽत्र न लोकचिन्ता॥६॥

**टीका**—यत्र **षष्ठ** एव सङ्ख्यया **गुणस्थाने** प्रतीते **यतिधर्मः** क्षान्त्यादिलक्षणः श्रमणधर्मः प्रारभ्यते, न तु पञ्चमादिषु गुणस्थानकेषु। **तच्च** षष्ठं गुणस्थानकं दुष्प्रापं यतो **भवाटव्यां** संसारारण्ये **दुर्गलंघनं** दुरतिक्रममोहपर्वतातिक्रमणं **भणितं** कथितं तीर्थकरगणधरैस्ततस्तस्माद् **अत्र** यतिधर्मे **न** नैव **लोकचिन्ता** लोकयात्रातप्तिरिति॥६॥ निष्कर्षमाह—

**तम्हा नियमेणं चिय जइणो सव्वासवा नियत्तस्स।**
**पढममिह वयणखंती पच्छा पुण धम्मखंति त्ति॥७॥**

**अक्षरगमनिका**—तस्मात् सर्वाश्रवान्निवृत्तस्य यतेर्नियमेनैव प्रथममिह वचनक्षान्तिः पश्चात् पुनर्धर्मक्षान्तिः॥१७॥

**टीका**—यस्माद् यतिधर्मे लोकचिन्ता नास्ति **तस्मात्** कारणात् **सर्वाश्रवात्** प्राणातिपातादि-निरवशेषाश्रवाद् **निवृत्तस्य** विरतस्य **यतेः** श्रमणस्य **प्रथमम्** आदावभ्यासदशायाम् **इह** यतिधर्मे **वचनक्षान्तिः** श्रीजिनवचनानुसारिणीक्षमा धर्मक्षान्तिसाधनं **पश्चात्** तदूर्ध्वं तन्मयीभावेनाध्ययनाद्यभिरतेः स्वभ्यस्तदशायामेव **पुनरवधारणे** **धर्मक्षान्तिः** धर्मः प्रशमादिस्तत्प्रधाना क्षान्तिः क्षमेति॥७॥ अथानन्तरोक्तोपकार्यपकार्यादि-पञ्चप्रकारत्वं मार्दवादिष्वप्यतिदिशन्नाह—

**एमेवऽज्जवमद्दवमुत्तीओ हुंति पंचभेयाओ।**
**पुव्वोइयनाएणं जइणो इत्थं पि चरमदुगं॥८॥**

**अक्षरगमनिका**—एवमेवार्जवमार्दवमुक्तयो भवन्ति पञ्चभेदाः। पूर्वोदितन्यायेन यतेरत्रापि चरमद्विकम्॥८॥

**टीका**—**एवमेव** उपकार्यपकार्यादिभेदेनैव **आर्जवमार्दवमुक्तय** उक्तार्था **भवन्ति** वर्तन्ते **पञ्चभेदाः** पञ्चप्रकाराः। **पूर्वोदितन्यायेन** शुभयोगैर्द्वादशकषायक्षयोपशमभावात् संज्वलनानामुदयाद् दुष्प्रापयति-धर्मप्राप्तेर्लोकचिन्ताभावाच्च सर्वाश्रवनिवृत्तस्य **यतेः** साधोः **अत्रापि** न केवलं क्षान्तौ, आर्जवमार्दवमुक्तिष्वपि **चरमद्विकं** वचनधर्मलक्षणम्, तथाहि-वचनार्जवं धर्मार्जवं, वचनमार्दवं धर्ममार्दवं तथा वचनमुक्तिर्धर्म-मुक्तिश्चेति॥८॥ अथ तपोधर्ममाह—

**इहपरलोगादणविक्खं जमणसणाइ चित्तणुट्ठाणं।**
**तं सुद्धनिज्जराफलमित्थ तवो होई नायव्वो॥९॥**

**अक्षरगमनिका**—इहपरलोकाद्यनपेक्षं यदनशनादिचित्रानुष्ठानं तत् शुद्धनिर्जराफलमत्र तपो भवति ज्ञातव्यम्॥९॥

**टीका**—**इहपरलोकाद्यनपेक्षं** इह अत्रैव जन्मनीष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदादेः परलोके च देवेन्द्रनरेन्द्रादिपदव्यादेः आदिपदात् श्लाघाकीर्त्यादिग्रहणं तस्मान्निरपेक्षं निस्पृहं **यद्** वक्ष्यमाणम् **अनशनादि-चित्रानुष्ठानम्** अनशनोनोदरिकादिलक्षणं बाह्यं प्रायश्चित्तविनयादिरूपमभ्यन्तरं, तदुक्तं च—

अणसणमूणोयरिया वित्तीसंखेवणं रसच्चाओ।
कायकिलेसो संलीणया य बज्झो तवो होइ॥१॥
पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ।
झाणं उस्सग्गो वि य अब्भिंतरओ तवो होइ॥२॥

एतद्विधानं यत्र **तत् तपः शुद्धनिर्जराफलं** शुद्धं कषायनिरोधब्रह्मचर्यादिविधानात्मकम्, तदुक्तं च—

यत्र ब्रह्म जिनार्चा च, कषायाणां हतिस्तथा।
सानुबन्धा जिनाज्ञा च, तत्तपः शुद्धमिष्यते॥१॥ज्ञानसारः॥

यदि वा शुद्धं केवलं निर्जराफलं कर्मक्षयकारणम् **अत्र** मौनीन्द्रप्रवचने **तप** उक्तस्वरूपं **भवति** युज्यते **ज्ञातव्यं** बोद्धव्यमिति॥९॥ साम्प्रतं संयमधर्ममाह—

**आसवदारनिरोहो जमिंदियकसायदंडनिग्गहओ।**
**पेहातिजोगकरणं तं सव्वं संजमो नेओ॥१०॥**

**अक्षरगमनिका**—आश्रवद्वारनिरोधो यदिन्द्रियकषायदण्डनिग्रहतः प्रेक्षादियोगकरणं तत् सर्वं संयमो ज्ञेयः॥१०॥

**टीका**—**आश्रवद्वारनिरोध** आश्रवद्वाराणि अभिनवकर्मबन्धहेतवः प्राणातिपातादयः पञ्च तेषां निरोधो निग्रहः। तथा **यद्** वक्ष्यमाणम् **इन्द्रियकषायदण्डनिग्रहत** इन्द्रियाणि श्रोत्रादीनि पञ्च, कषायाश्च क्रोधादयश्चत्वारः, दण्ड्यते चारित्रैश्वर्याऽपहारतः असारीक्रियत एभिरात्मेति दण्डा दुष्प्रणिहिता मनोवाक्कायास्त्रयश्च तेषां निग्रहो निरोधः। उक्तं च—

पंचासवा विरमणं पंचिंदियनिग्गहो कसायजओ।
दंडत्तयस्स विरई सत्तरसहा संजमो होइ॥१॥

एवमिन्द्रियकषायादिनिग्रहतः **प्रेक्षादियोगकरणं** प्रेक्षा दृष्ट्वा प्रेक्ष्य बीजहरितजन्तुरहितं यत् स्थानं तत्र शयनाऽऽसनादीनां योगानां धर्मव्यापाराणां करणम्। अथवा सीदन्तं साधुं प्रति प्रेरणम्। आदिपदाद् उपेक्षा गृहस्थस्य पापव्यापारं कुर्वत उपेक्षणं न पुनरिदं गृहचिन्तादिकं सावधानः कुरु इत्याद्युपदेशनम्। अथवा पार्श्वस्थादीनां निर्दयव्यापाराणामुपेक्षा, तथा–प्रमार्जनाऽप्रमार्जना ग्रामादिप्रवेशनिर्गमने कृष्णादिभूप्रदेशात् पीतादिभूप्रदेशे विहरतां साधूनां गृहस्थाद्यनिरीक्षणे सचित्ताचित्तमिश्ररजोगुण्ठितपादादीनां रजोहरणादिना प्रमार्जनं सागारिकादिनिरीक्षणे त्वप्रमार्जनम्। यदुक्तं—

पायाई सागरिए अपमज्जित्तावि संजमो होइ। ते चेव पमज्जंतेऽसागरिए संजमो होइ। तथापृथिव्यप्तेजोवायुवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियजीवानां मनोवाक्कायैः करणकारणानुमतिभिश्च संरम्भसमारम्भारम्भवर्जनमिति नवधा जीवरक्षणम्। तथा–अजीवरूपाण्यपि पुस्तकादीनि प्रतिलेखनाप्रमार्जनापूर्वं धारयतः साधोः अजीवसंयमः। तथा परिष्ठपना त्याज्याहारमलवस्त्रपात्रादीनां जन्तुरहितस्थाने विधिना परिष्ठापनम्। तथा मनसो द्रोहेर्ष्याभिमानादिभ्यो निवर्तनं धर्मध्यानादिषु प्रवर्तनम्। तथा वाचो हिंस्रपरुषादिभाषाभ्यो निवर्तनं शुभभाषायां च प्रवर्तनम्। तथा गमनागमनाद्यवश्यकरणीयेषु सोपयोगं कायस्य व्यापारणम्। इत्येवं विधानं **तत् सर्वं** निरवशेषं **संयमः** सम् एकीभावेन यम उपरमो **ज्ञेयः** अवसेयः। तदुक्तं—पुढवी दग अगणि मारुय वणस्सइ बि ति चउ पणिंदि अज्जीवा। पेहुप्पेह पमज्जण परिठवण मणो वई काए॥१॥

अधुना सत्यधर्ममाह—

**गुरुसुत्ताणुन्नायं जं हियमियभासणं ससमयम्मि।**
**अपरोवतावमणघं तं सच्चं निच्छियं जइणो॥११॥**

**अक्षरगमनिका**—स्वसमये यतेर्यद् गुरुसूत्रानुज्ञातमपरोपतापमनघं निश्चितं हितमितभाषणं तत् सत्यम्॥११॥

**टीका**—**स्वसमये** मौनीन्द्रप्रवचने **यतेः** श्रमणस्य **यद्** वक्ष्यमाणस्वरूपं **गुरुसूत्रानुज्ञातं** गुरुश्चाचार्यादिः सूत्रं चागमो गुरुसूत्रे ताभ्यामनुज्ञातम् अनुमतम् तथा **अपरोपतापम्** अपरसंतापकम् **अनघम्** अनवद्यं **निश्चितं** निस्सन्देहं **हितमितभाषणं** हितं च हितकरं मितं दीर्घसूत्रितापरिहारेण प्रमाणोपेतं प्रयोजननिष्पादकमित्यर्थः हितमितं भाषणं व्याहरणं **तत् सत्यम्** प्रतीतमिति॥११॥

अथ शौचमाह—

**आलोयणाइदसविहजलओ पावमलखालणं विहिणा।**
**जं दव्वसोयजुत्तं तं सोयं जइजणपसत्थं॥१२॥**

**अक्षरगमनिका**—द्रव्यशौचयुक्तं यदालोचनादिदशविधजलतो विधिना पापमलक्षालनं तद् यतिजनप्रशस्तं शौचम्॥१२॥

**टीका**—**द्रव्यशौचयुक्तं** द्रव्यशौचं मलत्यागानन्तरं प्रासुकजलेन यदाचमनं तेन युक्तं संगतं **यद्** वक्ष्यमाणम् **आलोचनादिदशविधजलत** आलोचनाप्रतिक्रमणादिदशविधप्रायश्चित्तनीरेण **विधिना**ऽऽगमोक्तेन

**पापमलक्षालनं** पापं प्राणातिपाताद्यष्टादशप्रकारं तन्निमित्तं वोपार्जितं यद् ज्ञानावरणीयाद्यशुभकर्म तदेव ज्ञानादिगुणमलनाद् मलं तस्य क्षालनं शोधनं **तद् यतिजनप्रशस्तं** साधुलोकश्लाघितं **शौचं** नैर्मल्यं निरतिचारतेत्यर्थः ॥१२॥ अथाऽऽकिञ्चन्यमाह— सागर जी महाराज

**पक्खीए उवमाए जं धम्मोवगरणाइरेगेण।**
**वत्थुस्सागहणं खलु तं आकिंचन्नमिह भणियं॥१३॥**

**अक्षरगमनिका**—पक्षिण उपमया यद् धर्मोपकरणाऽतिरेकेण वस्तुनोऽग्रहणं खलु तदाकिञ्चन्यमिह भणितम् ॥१३॥

**टीका—पक्षिणो** विहङ्गमस्य **उपमया** दृष्टान्तेन, यथा पक्षी प्रायश उड्डयनसमये पक्षातिरेकेण न किञ्चिद् धारयति, अत एव सुखेनोड्डयते तथैव साधोरपि **यद् धर्मोपकरणातिरेकेण** संयमयात्रोपकारिवस्त्रपात्रादीन् विहाय मूर्च्छया समधिकस्य **वस्तुनो** वस्त्रपात्रादिपदार्थजातस्यापि **अग्रहणम्** अनादानमेव **खलु**रवधारणे **तद् आकिञ्चन्यम्** अपरिग्रहः अमूर्च्छेति यावद् **इह** मौनीन्द्रप्रवचने यतिधर्मे वा **भणितम्** उपदिष्टं तीर्थकर-गणधरैरिति ॥१३॥ अथ ब्रह्माह—

**मेहुणसन्नाविजएण पंचपरियारणापरिच्चाओ।**
**बंभे मणवत्तीए जो सो बंभं सुपरिसुद्धं॥१४॥**

**अक्षरगमनिका**—मैथुनसंज्ञाविजयेन ब्रह्मणि मनोवृत्त्या यः पञ्चपरिचारणापरित्यागः स सुपरिशुद्धं ब्रह्म ॥१४॥

**टीका—मैथुनसंज्ञाविजयेन** मैथुनसंज्ञा पुंवेदोदयान्मैथुनाय संभोगाय या स्त्रीविलोकनप्रसन्नवदन-संस्तम्भितोरुवेपथुप्रभृतिलक्षणा क्रिया तस्या विजयेन निरोधेन **ब्रह्मणि** स्वतत्त्वे ज्ञानादौ तत्साधनस्वाध्यायादौ वा **मनोवृत्त्या** विशिष्टमनोव्यापारलक्षणया वक्ष्यमाणस्वरूपया वा **यो** वक्ष्यमाणः **पञ्चपरिचारणात्यागः** पञ्चभिः कायस्पर्शरूपशब्दमनोलक्षणैः परिचारणा मैथुनसेवनं तस्य परित्यागो योगत्रिककरणत्रिकेण परिहारः **स सुपरिशुद्धं** निरतिचारादनवद्यं **ब्रह्म** ब्रह्मचर्यमिति ॥१४॥ परिचारणामेवाह—

**कायफरिसरूवेहिं सद्ददमणेहिं च इत्थ पवियारो।**
**रागा मेहुणयोगो मोहुदयं रइफलो सव्वो॥१५॥**

**अक्षरगमनिका**—कायस्पर्शरूपैः शब्दमनोभ्यां चात्र प्रविचारो मोहोदयो रागात् सर्वो मैथुनयोगो रतिफलः ॥१५॥

**टीका—कायस्पर्शरूपैः** प्रतीतैः **शब्दमनोभ्यां** प्रसिद्धाभ्यां **चात्र** अस्मिन् संसारे **प्रविचारो** मैथुनसेवनं **मोहोदयो** वेदमोहनीयोदयः प्राकृतत्वाद् लिङ्गव्यत्ययः। अत एवाह—**रागात्** कामाभिष्वङ्गात् **सर्वो** निखिलो **मैथुनयोगः** पशुक्रीडा **रतिफलो** मोहजन्यक्षणिकसांसारिकसुखहेतुः। अत्रेदं तु ध्येयम्—वेदमोहोदयात् कामरागस्ततो मैथुनसेवनं ततो रतिस्ततो वेदमोहनीयकर्मबन्धस्ततुदयात् पुनः कामरागादिका सैवानर्थपरम्परेति विषचक्रमेतदिति ॥१५॥ बह्मणि मनोवृत्तिं विना मैथुनयोगाभावेऽपि न ब्रह्मेत्याह—

**एयस्साभावंमि वि नो बंभमणुत्तराण जं तेसिं।**
**बंभे ण मणोवित्ती तह परिसुद्धासयाभावा॥१६॥**

**अक्षरगमनिका**—एतस्याभावेऽपि नो ब्रह्माऽनुत्तराणं यत्तेषां ब्रह्मणि न मनोवृत्तिस्तथा-परिशुद्धाशयाभावात् ॥१६॥

**टीका**—आस्तां मैथुनयोगसद्भावे **एतस्य** मैथुनयोगस्य **अभावेऽपि** असत्त्वेऽपि **नो** नास्ति **ब्रह्म** ब्रह्मचर्यम् **अनुत्तराणां** पदैकदेशे पदोपचार इति अनुत्तरविमानवासिदेवानां **यद्** यस्मात् **तेषाम्** अनुत्तरविमानवासिनां **ब्रह्मणि** पूर्वोक्तस्वरूपे **न** नैव **मनोवृत्तिः** पूर्वोक्तस्वरूपा वक्ष्यमाणस्वरूपा वा **तथापरिशुद्धाशयाभावात्** तथाविधनिरवद्यविरतिपरिणामाभावादिति ॥१६॥ निष्कर्षमाह—

**बंभमिह बंभचारिहिं वन्नियं सव्वमेवऽणुट्ठाणं।**
**तो तम्मि खओवसमो सा मणवित्ती तहिं होइ ॥१७॥**

**अक्षरगमनिका**—इह ब्रह्म ब्रह्मचारिभिर्वर्णितं सर्वमेवानुष्ठानम्, ततस्तस्मिन् क्षयोपशमः सा मनोवृत्तिस्तत्र भवति ॥१७॥

**टीका**—**इह** मौनीन्द्रप्रवचने यतिधर्मे वा **ब्रह्म** ब्रह्मचर्यं **ब्रह्मचारिभिः** स्वतत्त्वे रममाणैर्घोरब्रह्मचारिभिस्तीर्थकरगणधरैः **वर्णितं** विधेयत्वेनोपदिष्टं **सर्वमेव** निरवशेषमेव **अनुष्ठानं** वक्ष्यमाणं यतेर्ग्रहणासेवनाशिक्षारूपं चरणकरणलक्षणं वा। **ततस्**तस्मात् कारणात् **तस्मिन्** अनुष्ठाने यः **क्षयोपशमः** चारित्रमोहनीयकर्मणो वीर्यान्तरायकर्मणश्चोदीर्णांशस्य क्षयस्तथाऽनुदीर्णांशस्य च विपाकमाश्रित्योपशमः। एवम्भूतः क्षयोपशम एव **सा मनोवृत्तिः** मनस्कारः **तत्र** ब्रह्मणि **भवति** जायते। अयं भावः—संयमानुष्ठाने मनसो व्यापृतत्वेन बहिर्गमनाभावात् कारणे कार्योपचारादुक्तलक्षणः क्षयोपशम एव ब्रह्मणि मनोवृत्तिरिति ॥१७॥ अनन्तरोक्तक्षयोपशमसाधनं मनोनिरोधोऽपि ब्रह्मेत्याह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**एवं परिसुद्धासयजुत्तो जो खलु मणोनिरोहो वि।**
**परमत्थओ जहत्थं सो भण्णइ बंभमिह समए ॥१८॥**

**अक्षरगमनिका**—एवं परिशुद्धाशययुक्तो यः खलु मनोनिरोधः सोऽपि परमार्थत इह समये यथार्थं ब्रह्म भण्यते ॥१८॥

**टीका**—**एवम्** अनन्तरोक्तनीत्याऽऽस्तां संयमानुष्ठाने क्षयोपशमः **परिशुद्धाशययुक्तो** विरति-परिणामसंगतो **यः** पुनः **खलुः** पुनरर्थे **मनोनिरोधः** विषयप्रवृत्तस्य मनसो निग्रहः **सोऽपि परमार्थतो** वस्तुत **इह** अस्मिन् मौनीन्द्रे **समये** प्रवचने **यथार्थं** सार्थकं **ब्रह्म** ब्रह्मचर्यं **भण्यते** कथ्यते तीर्थकरगणधरैः। प्रथमतः अभ्यासदशायां मनोनिग्रहोऽपि स्वतत्त्वे मनोवृत्तिकारणमिति सुष्ठूक्तमिति ॥१८॥ अनन्तरोक्तनीत्या कार्यकारणभावेन सर्वत्र सूत्रार्थे भावनार्थमाह—

**इय तंतजुत्तिनीईइ भावियव्वो बुहेहिं सुत्तत्थो।**
**सव्वो ससमयपरसमयजोगओ मुक्खकंखीहिं ॥१९॥**

**अक्षरगमनिका**—एवं तन्त्रयुक्तिनीत्या मोक्षकाङ्क्षिभिर्बुधैः सर्वोऽपि सूत्रार्थः स्वपरसमययोगतो भावयितव्यः ॥१९॥

**टीका**—**एवम्** अनन्तरोक्तरीत्या **तन्त्रयुक्तिनीत्या** तन्त्रं चाप्तागमो युक्तिश्च तर्कः तन्त्रयुक्ती तयोर्नीत्या न्यायेन आगमहेतुभ्यामित्यर्थः, **मोक्षकाङ्क्षिभिः** मुक्तिकामिभिः **बुधैः** पण्डितैः **सर्वोऽपि** निरवशेषोऽपि

**सूत्रार्थ** आगमार्थः **स्वसमयपरसमययोगतः** स्वसिद्धान्तपरसिद्धान्तसङ्गत्या **भावयितव्यः** अन्वयव्यतिरेकेण सूक्ष्मेक्षिकया विचारणीय इति ॥१६॥ उपसंहरन्नाह—

**संखेवेणं एसो जइधम्मो वन्निओ अइमहत्थो।**
**मंदमइबोहणट्ठा कुग्गहविरहेण समयाओ ॥२०॥**

इति यतिधर्मविंशिका एकादशी ॥११॥

**अक्षरगमनिका**—अतिमहार्थ एष यतिधर्मो मन्दमतिबोधनार्थं कुग्रहविरहेण समयतः संक्षेपेण वर्णितः ॥२०॥

**टीका—अतिमहार्थः** सुगभीरार्थ **एषः** अनन्तरोक्तो **यतिधर्मः** साधुधर्मो **मन्दमतिबोधनार्थं** मन्दाऽतीक्ष्णा मतिः शैमुषी येषां ते मन्दमतयस्तेषां बोधनार्थं ज्ञापनार्थं **कुग्रहविरहेण** कदाग्रहरहितेन माध्यस्थ्येनेत्यर्थः, स्वमतिकल्पनाजालनिरासात् **समयतः** सिद्धान्ततः **संक्षेपेण** समासेन प्रस्तुतग्रन्थस्य प्रकरणरूपत्वाद् **वर्णितो** निरूपित इति ॥२०॥

* * *

# द्वादशी यतिशिक्षाविंशिका

समाप्ता यतिधर्मविंशिकाऽधुना तस्यैव यतेः शिक्षाविंशिकाऽऽरभ्यते। तस्याश्चेयमाद्या गाथा—

**सिक्खा इमस्स दुविहा गहणासेवणगया मुणेयव्वा।**
**सुत्तत्थगोयरेगा बीयाऽणुट्ठाणविसय त्ति ॥१॥**

**अक्षरगमनिका**—अस्य शिक्षा ग्रहणाऽऽसेवनगता द्विविधा मुणितव्या—एका सूत्रार्थगोचरा द्वितीयाऽनुष्ठानविषयेति ॥१॥

**टीका—अस्य** यतेः शिक्ष्यतेऽनया **शिक्षा** वक्ष्यमाणस्वरूपा **ग्रहणाऽऽसेवनगता** ग्रहणं च ज्ञानोपार्जनम् आसेवनं च स्थानाद्यनुष्ठानं ग्रहणाऽऽसेवने तद्गता तद्विषया **द्विविधा** द्विप्रकारा **मुणितव्या** बोद्धव्या। एनयोर्विषयमाह **एका** तावत् प्रथमा ग्रहणशिक्षा **सूत्रार्थगोचरा** सूत्रं च गणधरादिस्थविरसन्दृब्धम् अर्थं च तदभिधेयः सूत्रार्थौ तद्गोचरा तद्विषया। **द्वितीया** क्रमापेक्षया पुनः**अनुष्ठानविषया** प्रतिलेखनाद्यासेवनविषया इतिः समाप्तौ ॥१॥ अनन्तरोक्तशिक्षाद्वयं विहायाऽपरं किमपि यतये कर्तव्यतारूपेण न रोचते इत्युपमाद्वारेणाह—

**जह चक्कवट्टिरज्जं लद्धुणं नेह खुद्दकिरियासु।**
**होइ मई तह चेव उ नेयस्सवि धम्मरज्जवओ ॥२॥**

**अक्षरगमनिका**—यथा चक्रवर्तिराज्यं लब्ध्वा नेह क्षुद्रक्रियासु भवति मतिस्तथैव तु नैतस्यापि धर्मराज्यवतः ॥२॥

**टीका—यथा** दृष्टान्ते **चक्रवर्तिराज्यं** षट्खण्डसार्वभौमसाम्राज्यं **लब्ध्वा** प्राप्य **न** नैव **इह** संसारे

चक्रवर्तिनः **क्षुद्रक्रियासु** बालधूलिक्रीडातुल्यप्राकृतजनसुलभकृष्यादितुच्छचेष्टासु **भवति** जायते **मतिः** धीस्त**थैव** दार्ष्टान्तिकेऽर्थे **तु**रवधारणे **न** नैव **एतस्यापि** श्रमणसिंहस्यापि **धर्मराज्यवतः** त्यागवैराग्यसंयमज्ञानध्यानादि-योगैश्वर्यवत्त्वाद् राज्यमिव राज्यं तद्वतो मतिः शिक्षाद्वयं मुक्त्वा नान्यत्र पामरजनसुलभक्षुद्रक्रियासु प्रवर्तत इति ॥२॥ अत्रैव हेतुमाह—

**जह तस्स व रज्जं कुव्वंतो वच्चए सुहं कालो।**
**तह एयस्स वि सम्मं सिक्खादुगमेव धन्नस्स ॥३॥**

**अक्षरगमनिका**—यथा तस्य च राज्यं तथैतस्यापि धन्यस्य शिक्षाद्वयमेव कुर्वतः सुखं व्रजति कालः ॥३॥

**टीका**—**यथा** येन प्रकारेण **तस्य च** चक्रवर्तिनः पुना राज्ञो कर्म **राज्यं** प्रभुसत्ता तत्कुर्वतः सातोपभोगेन सुखं व्रजति कालः **तथा** तेन प्रकारेण **एतस्यापि** यतिशार्दुलस्यापि **धन्यस्य** पुण्यधनमर्हतीति धन्यस्तस्य **सम्यग्** यथाविधि **शिक्षाद्वयमेव** उक्तस्वरूपमेव **कुर्वतो** विदधानस्य **सुखं** निराकुलं सानन्दं **व्रजति** याति **कालः** पूर्वकोट्यादिलक्षणः अद्धासमय इति ॥३॥ ननु वर्षपर्यायस्य यतेः सुखम् अनुत्तरविमान-वासिनां देवानां सुखमतिशेत इति श्रूयते, तर्हि चक्रवर्तिन इव साधोः सुखं कालो यातीति कथमुक्तमिति चेदुच्यते, सत्यम् उपमाभावादेवमुक्तमन्यथा चक्रिसुखात् साधुसुखं प्रधानमस्त्येवेत्युच्यते—

**तत्तो इमं पहाणं निरुवमसुहहेउभावओ नेयं।**
**इत्थ वि होदइगसुहं तत्तो एवोपसमसुहं ॥४॥**

**अक्षरगमनिका**—तत एतत्प्रधानं निरुपमसुखहेतुभावतो ज्ञेयम्। अत्रापि ह्यौदयिकसुखं तत उपशमसुखमेव ॥४॥

**टीका**—**तत**श्चक्रिसुखाद् **एतत्** साधुसुखं **प्रधानं** सातिशयम्। अत्र हेतुमाह–**निरुपमसुखहेतुभावतो** निरुपमम् उपमातीतं सुखं शिवशर्म तस्य हेतुभावतः कर्मोपशान्तिभवनाद् **ज्ञेयं** बोद्धव्यम्। आस्तां परलोके **अत्रापि** इहभवेऽपि **हि**र्हेतौ यस्माच्चक्रवर्तिन **औदयिकसुखं** सातवेदनीयकर्मोदयभवं सुखं तच्च विषयसापेक्षं विषयरागवर्धनं सावधिकं बाहुल्येन च हिंसाजन्यमत एव विपाकदारुणं च ब्रह्मदत्तादीनामिव **तत**स्तस्माद् औदयिकसुखाद् **उपशमसुखमेव** श्रमणसत्कं शमशर्मैव विषयवैराग्येण तत्त्यागात् तथाविधकषायोपशमेन चित्तप्रसादजन्यत्वाद् विषयनिरपेक्षत्वेन स्वाधीनत्वात् स्वाभाविकत्वेन निरवधिकत्वाद् विपाकमधुरत्वाच्च प्रधानमिति भावः ॥४॥ अत एवाह–

**सिक्खादुगंमि पीई जह जायइ हंदि समणसीहस्स।**
**तह चक्कवट्टिणो वि हु नियमेण न जाउ नियकिच्चे ॥५॥**

**अक्षरगमनिका**—हन्त! यथा श्रमणसिंहस्य शिक्षाद्विके नियमेन प्रीतिर्जायते तथा चक्रवर्तिनोऽपि खलु न जातु निजकृत्ये ॥५॥

**टीका**—**हन्त!** आमन्त्रणेऽनन्तरोक्तनीत्या चक्रवर्तिनो राज्यसुखाद् यतः शिक्षाद्विकसुखं प्रधानम् तत एव **यथा** येन प्रकारेण **श्रमणसिंहस्य** साधुशार्दूलस्य **शिक्षाद्विके** पूर्वोक्तस्वरूपे **नियमेनाऽ**वश्यंतया **प्रीतिः** प्रमोदो **जायते** भवति **तथा** तेन प्रकारेण **चक्रवर्तिनोऽपि** आस्तां कस्यचिद् राज्ञश्चक्रिणोऽपि **हु**शब्दोऽवधारणे

**न** नैव **जातु** कदाचिद् **निजकृत्ये** सार्वभौमत्वे प्रभुसत्तायां भोगलीलायां वा प्रीतिर्जायत इति ॥५॥

शिक्षाद्विकप्राधान्यं प्रदर्श्याऽथ ग्रहणशिक्षामाहात्म्यं विशेषत आह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**गिण्हइ विहिणा सुत्तं भावेणं परममंतरूव त्ति।**
**जोगो वि बीयमहुरोदजोगतुल्लो इमस्स त्ति ॥६॥**

**अक्षरगमनिका**—परममन्त्ररूपं सूत्रमिति भावेन विधिना गृह्णाति। अस्य योगोऽपि बीजमधुरोदयोगतुल्य इति ॥६॥

**टीका**—**परममन्त्ररूपं** परमः श्रेष्ठो मन्त्रो देवादिसाधनं तद्वद् रूपं स्वरूपं यस्य तत् **सूत्रं** श्रीजिनोपज्ञं गणधरादिस्थविरैः सन्दृब्धं श्रुतम् **इति** हेतोः **भावेन** आन्तरप्रीत्या **विधिना** 'पत्तं परियाएणे'त्यादिना वक्ष्यमाणस्वरूपेण तत् सूत्रं यतिः **गृह्णाति** आददाति। सूत्रमाहात्म्यमेवाह—**अस्य** सूत्रस्याऽऽस्तां परिणतिः **योगोऽपि** विधिग्रहणलक्षणसम्बन्धोऽपि **बीजमधुरोदयोगतुल्यो** बीजं गोधूमादि तेन सह मधुरोदयोगो स्वादुजलसंयोगस्तेन तुल्यः समः अवश्यं सानुबन्धविरतिपरिणामफलो ज्ञानस्य फलं विरतिः **इति** हेतोर्भाविन विधिना गृह्याति। अयं भावः—यथा बीजं मधुरजलसंयोगेन फलं प्रयच्छति तथैव चारित्रबीजं सूत्रलक्षणमधुरजलसंयोगेन मुक्तिफलं प्रयच्छतीति ॥६॥ अथ सूत्रग्रहणविधिमाह—

**पत्तं परियाएणं सुगुरुसगासाउ कालजोगेण।**
**उद्देसाइकमजुयं सुत्तं गेज्झंति गहणविहि ॥७॥**

**अक्षरगमनिका**—पर्यायेण प्राप्तं सूत्रं कालयोगेन सुगुरुसकाशादुद्देशादिक्रमयुतं ग्राह्यमिति ग्रहणविधिः ॥७॥

**टीका**—**पर्यायेण** दीक्षापर्यायेण **प्राप्तं** क्रमागतं **सूत्रं** पूर्वोक्तस्वरूपं **कालयोगेन** कालो त्रिपञ्चादिवर्षलक्षणस्तद्योगेन तत्सङ्गत्या यदि वा पदैकदेशे पदोपचारात् कालग्रहणयोगोद्वहनेन **सुगुरुसकाशात्** सुगुरुः पूर्वोक्तस्वरूपो गुणगुरुस्तस्य सकाशात् पार्श्वाद् **उद्देशादिक्रमयुतम्** उद्देशसमुद्देशादिक्रमसङ्गतं **ग्राह्यं** ग्रहीतव्यम् **इति**र्निदर्शने **ग्रहणविधिः** सूत्रग्रहणविधानमिति ॥७॥ उक्तः सूत्रग्रहणविधिरथ दानविधिमाह—

**एसु च्चिय दाणविही नवरं दाया गुरूऽथ एयस्स।**
**गुरुसंदिट्ठो वा जो अक्खयचारित्तजुत्तु त्ति ॥८॥**

**अक्षरगमनिका**—एतस्य दानविधिरेष एव केवलं दाता यः अक्षतचारित्रयुक्त इति गुरुरथ गुरुसन्दिष्टो वा ॥८॥

**टीका**—**एतस्य** सूत्रस्य **दानविधिः** प्रयच्छनविधानम् **एष एवा**नन्तरोक्तः'पत्तं परियाएणं' इत्यादिरेव **नवरं** प्राकृतत्वात् केवलं **दाता** प्रयच्छको **यः** अनिर्दिष्टनामा **अक्षतचारित्रयुक्तः** अक्षुण्णमहाव्रतधारक एव **इति**शब्दोऽवधारणे स **गुरुरथवा गुरुसन्दिष्टोवा** गुर्वनुज्ञातः सूत्रदाता **अथ**शब्दो विकल्प इति ॥८॥ अथार्थग्रहणविधिमाह—

**अत्थगहणे उ एसो विन्नेओ तस्स तस्स य सुयस्स।**
**तह चेव भावपरियागजोगओ आणुपुव्वीए ॥९॥**

**अक्षरगमनिका**—तस्य तस्य च सूत्रस्यार्थग्रहणे तु एष तथैवानुपूर्व्या भावपर्यायियोगतो विज्ञेयः ॥९॥

**टीका**—**तस्य तस्य** चाऽऽवश्यकदशवैकालिकादेः **सूत्रस्य** पूर्वोक्तस्वरूपस्य **अर्थग्रहणे** अभिधेयग्रहणे **तु**शब्दो विशेषे स च वक्ष्यत एव, **एष** विधिर्यथा सूत्रग्रहणे 'पत्तं परियाएणं' इत्यादिस्**तथैव** तेनैव प्रकारेण **आनुपूर्व्या** परिपाट्या, तथाहि—प्रथमं तावदावश्यकं ततो दशवैकालिकं तत उत्तराध्ययनानि तत आचाराङ्गमित्यादिरूपया। अथ विशेषमाह–**भावपर्याययोगतो** भावश्च यथा सूत्रं तथा सूत्रार्थोऽपि परममन्त्ररूप इत्यध्यवसायः पर्यायश्चाऽस्खलितचारित्रपर्यायो भावपर्यायौ ताभ्यां योगतः सङ्गत्या। 'भावपरिवागजोगओ'त्ति पाठान्तरमाश्रित्य भावः परिणामस्तस्य परिपाकः परिणतिः, अपरिणामित्वातिपरिणामित्वपरिहारेण परिणामित्वमित्यर्थस्तद्योगतस्तत्सङ्गत्या विधिः **विज्ञेयो** बोद्धव्यः। **अयं भावः**—अर्थग्रहणे पर्यायेण प्राप्तोऽपि अपरिणामी अतिपरिणामी चाऽयोग्य इति तत्परिहारेण परिणामिन्येवार्थन्यास इति विधिः ॥९॥ अर्थग्रहणविधिमेव विशेषत आह—

**मंडलिनिसिज्ज अक्खाकिइकम्मुस्सग्ग वंदणं जिट्ठे।**
**उवओगो संवेगो ठाणे पसिणो य इच्चाइ ॥१०॥**

**अक्षरगमनिका**—मण्डली निषद्याऽक्षाः कृतिकर्मोत्सर्गो वन्दनं ज्येष्ठ उपयोगः संवेगः स्थाने प्रश्नश्चेत्यादि ॥१०॥

**टीका**—**मण्डली** साधूनां यथापर्यायं गोलाकारावस्थानं यत्र वा तद् व्याख्यानादिस्थानम्। क्वचिद् ग्रन्थान्तरे 'मज्जन' इतिपाठस्तथा च मण्डलीस्थानप्रमार्जनम्। **निषद्या**ऽऽसनविशेषो गुर्वादेः, आदिपदात् स्थापनाचार्यस्याऽक्षाणां मनागुच्चतरा। **अक्षाः** चन्दनका उपनीयन्ते, क्वचित् 'सिक्खा' 'सक्खा' चापपाठ इति नाद्रियते। **कृतिकर्म** वन्दनमाचार्यस्य। **कायोत्सर्गः** अनुयोगार्थमूर्ध्वस्थानम्। **ज्येष्ठे** ज्येष्ठविषयं वन्दनम्, इह भाषमाणो भवति ज्येष्ठः, न तु पर्यायेण, ततो वन्देत तमेवेति। **उपयोगः** समीपयोगः प्रस्तावाच्च सूत्रार्थव्याख्यानश्रवणविषयः अवितथभावः, एतल्लिङ्ग एव बोधः परलोकपक्षपातो भगवद्बहुमानश्च। उक्तं च–

उवओगो पुण एत्थ विण्णेओ समीवजोगो त्ति।
विहियकिरियागओ खलु अवितहभावो उ सव्वत्थ ॥यो. श. गा. ७६॥

**संवेगः** अहोभावस्तदभिव्यञ्जको वा रोमाञ्चगद्गदध्वन्यादिः। उक्तं च–जह जह नवनवसुअमभिगाहइ तह तह संवेगमेइ। **स्थाने** योग्यावसरे **प्रश्नः** पृच्छा **चः** समुच्चय आदिपदात् प्रतिप्रश्नादिग्रहणमवसेयमिति ॥१०॥ अथाऽऽसेवनशिक्षामाह—

**आसेवइ य जहुत्तं तहा तहा सम्ममेस सुत्तत्थं।**
**उचियं सिक्खापुव्वं नीसेसं उवहिपेहाए ॥११॥**

**अक्षरगमनिका**—यथोक्तं सूत्रार्थं तथा तथैष उपधिप्रेक्षया शिक्षापूर्वमुचितं निःशेषं सम्यगासेवते ॥११॥

**टीका**—**यथोक्तं** येन येन प्रकारेण श्रीजिनवरगणधरैरुपदिष्टं **सूत्रार्थं** पूर्वोक्तस्वरूपं **तथा तथा** तेन तेन प्रकारेण एष यतिः **उपधिप्रेक्षया** उपधिर्मायाचारस्तत्प्रेक्षया निरीक्षणेन **शिक्षापूर्वम्** आत्मानुशासनपूर्वं यथा

रे जीव! माया संसारबीजम्, मोक्षमार्गप्रस्थितस्य तव किमनया, त्यजैनाम्, भव ऋजुः, ऋजूभूतस्य शोधिरिति। यदि वोपधिः वस्त्रपात्रादिस्तत्प्रेक्षया प्रतिलेखनेन सह शिक्षापूर्वम् आचार्योपाध्यायाद्युपदेशपूर्वम् **उचितं** देशकालस्वशक्त्यनुरूपं **निःशेषं** सर्वं यतिचर्यारूपं **सम्यग्** अवितथम् **आसेवते** अनुतिष्ठतीति॥११॥ आसेवनशिक्षाया एव महत्त्वमाह—

**पडिवत्तिविरहियाणं न हु सुयमित्तमुवयारगं होइ।**
**नो आउरस्स रोगो नासइ तह ओसहसुईओ॥१२॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—प्रतिपत्तिविरहितानां न खलु श्रुतमात्रमुपकारकं भवति। तथौषधश्रुतितो नातुरस्य रोगो नश्यति॥१२॥

**टीका**—**प्रतिपत्तिविरहितानां** प्रतिपत्तिरासेवनं प्रस्तावात् सूत्रार्थस्य तद्विरहितानां तच्छून्यानां **न** नैव **हु** प्राकृतत्वादवधारणे **श्रुतमात्रं** श्रवणगोचरीभूतमात्रम् **उपकारकम्** अनुग्राहकं **भवति** जायते। अत्रार्थे दृष्टान्तमाह— **तथौषधश्रुतितः** केवलं भेषजश्रवणाद् **न** नैव **आतुरस्य** रोगिणो **रोगो** व्याधिः **नश्यति** क्षयमुपैति, अपि तु तत्प्रयोगत एव नश्यति। एवमेव सूत्रार्थासेवनादेव संसाररोगो नश्यति, न तु श्रवणमात्रत इति॥१२॥ आस्तां प्रतिपत्तिविरहेण विपरीतेनापि क्रियायोगेन न नश्यति, अपि तु वर्धत इत्याह—

**न य विवरीएणेसो किरियाजोगेण अवि य वड्ढेइ।**
**इय परिणामाओ खलु सव्वं खु जहुत्तमायरइ॥१३॥**

**अक्षरगमनिका**—न च विपरीतेन क्रियायोगेनैषः, अपि च वर्धत इति परिणामात् खलु सर्वं यथोक्तमाचरति॥१३॥

**टीका**—**न च** नापि **विपरीतेन** विरोधिना **क्रियायोगेन** कुपथ्यादिसेवनलक्षणेन **एष** रोगो क्षयमुपैति, **अपि च** परं वर्धते एवमेवोत्सूत्राचरणेन भवरोगोपि न नश्यति, अपि तु वर्धते **इति** हेतोः **परिणामाद्** जिनोक्तमिति भावसारमेव **खलु**शब्दोऽवधारणे **सर्वं** निरवशेषं **यथोक्तमाचरति** यथा तीर्थकरगणधरैरुपदिष्टं तथैव श्रमणः अनुतिष्ठतीति॥१३॥ एतदेवाभ्युच्चयति—

**थेवो वित्थमजोगो नियमेण विवागदारुणो होइ।**
**पागकिरियागओ जह नायमिणं सुप्पसिद्धं तु॥१४॥**

**अक्षरगमनिका**—इत्थं स्तोकोऽप्ययोगो नियमेन विपाकदारुणो भवति यथा पाकक्रियागतो ज्ञातमिदं सुप्रसिद्धं तु॥१४॥

**टीका**—**इत्थम्** अनन्तरोक्तनीत्या **स्तोकोऽपि** स्वल्पोऽपि **अयोगः** क्रियान्यूनतालक्षणो विपरीतो वा क्रियायोगो **नियमेना**ऽवश्यंतया विपाकदारुणः अभ्युपगतस्याऽकरणात् प्राप्तदुरापस्य विनाशात् सानुबन्धाऽशुभकर्मबन्धात् श्रीजिनाज्ञाविराधनाच्च दुर्लभबोधित्वेन दीर्घसंसारफलत्वात् परिणामकटुः **भवति** जायते, **यथा** दृष्टान्ते **पाकक्रियागतः** पाचनक्रियासत्कः अयोगो लवणादेरभावो पाकानुकूलसामग्र्यभावो वा व्यापाराभावो वा विपरितयोगो वा खण्डस्थाने लवणप्रयोगो द्रव्यविनाशकः अयशःकरश्च भवति। **ज्ञातं** दृष्टान्तम् **इदं** पाकक्रियागतं **सुप्रसिद्धं तु** सुप्रतीतमेव॥१४॥ ननु कालस्य विषमत्वात् संयमस्य च दुष्करत्वात् कथं यथोक्तमनुष्ठातव्यमित्याशङ्क्याह—

**जह आउरस्स रोगक्खयत्थिणो दुक्करा वि सुहहेउ।**
**इत्थ चिगिच्छाकिरिया तह चेव जइस्स सिक्ख त्ति ॥१५॥**

**अक्षरगमनिका**—यथाऽत्र रोगक्षयार्थिन आतुरस्य दुष्कराऽपि चिकित्साक्रिया सुखहेतुस्तथैव यतेः शिक्षेति ॥१५॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**–**यथा** दृष्टान्ते **अत्र** संसारे **रोगक्षयार्थिनो** गदोन्मूलनाभिलाषिण **आतुरस्य** रोगिणो **दुष्कराऽपि** आस्तां मृदुका चण्डापि **चिकित्साक्रिया** रुक्प्रतिक्रिया **सुखहेतुः** स्वास्थ्यशर्मफला **तथैव** तेनैव प्रकारेण **यतेः** श्रमणस्य **शिक्षा** दुष्कराऽपि प्रस्तावादासेवनशिक्षा शिवशर्मफला **इति** हेतोर्यथोक्तमासेवनीयमिति ॥१५॥

अपि च–

**जं सम्मनाणमेयस्स तत्तसंवेयणं निओगेण।**
**अन्नेहि वि भणियमओ विज्जसंविज्जपदमिसिणो ॥१६॥**

**अक्षरगमनिका**—एतस्य यत् सम्यग्ज्ञानं नियोगेन तत्त्वसंवेदनमतः अन्यैरपि ऋषेर्वेद्यसंवेद्यपदं भणितम् ॥१६॥

**टीका**—**एतस्य** यतेः **यत् सम्यग्ज्ञानं** जिनोपज्ञहिताहितावबोधस्तद् **नियोगेन** नियमेन **तत्त्वसंवेदनं** तत्त्वं संयमाद्यनुष्ठानं हितं तत्संवेदनं तत्र प्रवृत्तितोऽपि तथानुभवनं स्त्र्यादि चाऽपायहेतुरिति तद्विरतिपरिणामः, यदागमः—'जं सम्मंति पासहा तं मोणं ति पासहा' इत्यादि निश्चयनयाभिप्रायेण यत् सम्यक्त्वं तदेव मौनं मुनिभावो ज्ञातस्याऽऽसेवनात्। **अतः** कारणाद् **अन्यैरपि** स्वव्यतिरिक्तपतञ्जलिप्रभृतिभिरपि **ऋषेर्योगिनो वेद्यसंवेद्यपदम्** आगमविशुद्धबुद्ध्या तथाऽप्रवृत्तितः अपायहेतुः स्त्र्यादि वेद्यं यत्र संवेद्यते सम्यगनुभूयते तत् पदं गुणस्थानं **भणितं** कथितम्। तथा चाह—

वेद्यं संवेद्यते यस्मिन्नपायादिनिबन्धम्।
तथाऽप्रवृत्तिबुद्ध्यापि स्त्र्याद्यागमविशुद्धया॥
तत्पदं साध्ववस्थानाद्भिन्नग्रन्थ्यादिलक्षणम्।
अन्वर्थयोगतस्तन्त्रे वेद्यसंवेद्यमुच्यते॥ यो. दृ. स. ७३-७४॥ ॥१६॥

अथ प्रसङ्गतः अनुष्ठानभेदानाह–

**पढममह पीई वि हु पच्छा भत्ती उ होइ एयस्स।**
**आगममित्तं हेऊ तओ असंगत्तमेगंता ॥१७॥**

**जइणो चउव्विहं चिय अन्नेहि वि वन्नियं अणुट्ठाणं।**
**पीईभत्तिगयं खलु तहागमासंगभेयं च ॥१८॥**

**अक्षरगमनिका**—अथैतस्य प्रथमं प्रीतिः पश्चाद् भक्तिस्तु भवति। आगममात्रं हेतुस्ततः असङ्गत्वमेकान्तात् ॥१७॥ यतेश्चतुर्विधमेवान्यैरपि वर्णितमनुष्ठानं प्रीतिभक्तिगतं खलु तथाऽऽगमासङ्गभेदं च ॥१८॥

**टीका**—**अथाऽऽनन्तर्ये एतस्य** यतेः **प्रथमं** प्रारम्भकाले विशिष्टगुणानवबोधेऽपि **प्रीतिः** अभिरुचिर्जायते। अत एव अपुनर्बन्धकोऽपि सर्वसङ्गत्यागेन संयमानुष्ठानमभ्युपगच्छति। करोति च तत् परमादरात्।

**पश्चात्** तदूर्ध्वं रागद्वेषाकरणात् सर्वजीवेषु मैत्रीभावेनाऽभयानुभवनात् सङ्गत्यागतोऽपि तद्वैराग्येण निःस्पृहत्वसुखसंवेदनात् कषायोपशमेन च चित्तप्रसादात् संयमानुष्ठानगुणज्ञानेन बहुमानात् तत्प्रति **भक्तिः** पूज्यत्वमेव प्रादुर्भवति **तु**शब्दोऽवधारणे। तत्संगतं प्रीत्यनुष्ठानमेव विशुद्धतरव्यापारवद् भक्त्यनुष्ठानं **भवति** जायते। तदुक्तं च षोडशकप्रकरणे—

यत्रादरोस्ति परमः प्रीतिश्च हितोदया भवति कर्तुः।
शेषत्यागेन करोति यच्च तत्प्रीत्यनुष्ठानम्॥१॥

मार्गदर्शक :- आचार्य श्री सु

गौरवविशेषयोगाद्बुद्धिमतो यद्विशुद्धतरयोगम्।
क्रिययेतरतुल्यमपि ज्ञेयं तद्भक्त्यनुष्ठानम्॥२॥

आह कः पुनः प्रीतिभक्त्योर्विशेष? उच्यते—सदृशमपि भोजनाच्छादनादिकृत्यं जननीपत्न्योः क्रियते परं प्रीत्या पत्न्याः क्रियते भक्त्या मातुरितीयान् विशेषः प्रीतिभक्त्योः। तदुक्तं च षोडशकप्रकरणे—

अत्यन्तवल्लभा खलु पत्नी तद्वद्धिता च जननीति।
तुल्यमपि कृत्यमनयोर्ज्ञातं स्यात् प्रीतिभक्तिगतम्॥१॥

ततः परम् **आगममात्रं** श्रीजिनवचनमेव **हेतुः** प्रवर्तककारणं सर्वत्रौचित्येन यत्रानुष्ठाने तद्वचनानुष्ठानं यतेर्नियोगेन भवति नान्यस्य विपर्ययान्निश्चयनयमतमेतद् व्यवहारतस्त्वन्यस्यापि मार्गानुसारिणो वचने प्रवर्तमानस्य देशत इदं भवत्येव। तदुक्तं च षोडशकप्रकरणे—

वचनात्मिका प्रवृत्तिः सर्वत्रौचित्ययोगतो या तु।
वचनानुष्ठानमिदं चारित्रवतो नियोगेन॥१॥

एतन्न्यायाचार्यवृत्तिः—वचनेत्यादि। वचनात्मिकाऽऽगमार्थस्मरणाविनाभाविनी प्रवृत्तिः क्रियारूपा सर्वत्र सर्व्वस्मिन् धर्म्मव्यापारे क्षान्तिप्रत्युपेक्षादौ औचित्ययोगतो देशकालपुरुषव्यवहाराद्यानुकूल्येन या तु भवति इदमेवं प्रवृत्तिरूपं वचनानुष्ठानं चारित्रवतः साधोर्नियोगेन नियमेन भवति तस्यैव भवदुर्गलङ्घनं षष्ठगुणस्थानावाप्तेस्तत्र च लोकसंज्ञाभावान्नान्यस्य विपर्ययान्निश्चयनयमतमेतद् व्यवहारतस्त्वन्यस्यापि मार्गानुसारिणो वचने प्रवृर्त्तमानस्य देशत इदं भवत्येवेति द्रष्टव्यम्॥ **ततो** वचनानुष्ठानाभ्यासातिशयेन तथा संस्काराधानात् चन्दनगन्धन्यायेन सात्मीभावमागतम् **असङ्गत्वं** निरालम्बनभावः प्रादुर्भवति अत एव तत्प्रधानमसङ्गानुष्ठानं भवति **एकान्तात्** तीव्रभावात् जिनकल्पिकानाम्॥ तदुक्तं च षोडशकप्रकरणे—

यत्त्वभ्यासातिशयात् सात्मीभूतमिव चेष्टयते सद्भिः।
तदसङ्गानुष्ठानं भवति त्वेतत्तदावेधात्॥१॥

इदं त्वत्र ध्येयम्—यथा चक्रभ्रमणमेकं दण्डसंयोगात् प्रयत्नपूर्वकाद्भवति तथा वचनानुष्ठानमप्यागम-संयोगात् प्रवर्तते। यथा चान्यच्चक्रभ्रमणं दण्डसंयोगाभावे केवलादेव संस्काराऽपरिक्षयात् संभवति। एवमागमसंस्कारमात्रेण वस्तुतो वचननिरपेक्षमेव स्वाभाविकत्वेन यत्प्रवर्तते तदसङ्गानुष्ठानमितीयान् विशेष इति न्यायाचार्याः षोडशकवृत्तौ। एषां चतुर्णामनुष्ठानानां चाद्ये प्रीतिभक्त्यनुष्ठानेऽभ्युदयफले तथा चरमे वचनासङ्गानुष्ठाने च विघ्नरहिते मोक्षफले विज्ञेये। अत एव पूर्वसंयमः स्वर्गहेतुरपूर्वसंयमश्च मोक्षहेतुः॥१७॥ तदुक्तं च- चक्रभ्रमणं दण्डात्तदभावे चैव यत्परं भवति। वचनासङ्गानुष्ठानयोस्तु तज्ज्ञापकं ज्ञेयम्॥१॥ अभ्युदयफले चाद्ये निःश्रेयससाधने तथा चरमे। एतदनुष्ठानानां विज्ञेये इह गतापाये॥२॥ एतच्चतुर्विध-

मप्यनुष्ठानमन्यैरपि वर्णितमित्याह—**यतः** श्रमणस्य **चतुर्विधमेवा**ऽनन्तरोक्तस्वरूपमेव **अन्यैरपि** पतञ्जलिप्रभृतिभिरपि **वर्णितं** संशितम् **अनुष्ठानं** कृत्यासेवनं **प्रीतिभक्तिगतमित्यादि** व्याख्यातप्रायमिति ॥१८॥

श्रमणः सर्वत्राहारादिषु संयतो भवतीत्याह—

**आहारोवहिसिज्जासु संजओ होइ एस नियमेण।**
**जायइ अणहो सम्मं इत्तो य चरित्तकाउ त्ति ॥१९॥**

**एयासु अवत्तवओ जह चेव विरुद्धसेविणो देहो।**
**पाउणइ न उणमेवं जइणो वि हु धम्मदेहु त्ति ॥२०॥**

इति शिक्षाविंशिका द्वादशी ॥१२॥

**अक्षरगमनिका**—एष आहारोपधिशय्यासु नियमेन संयतो भवति। इतश्च चारित्रकायः सम्यग् जायतेऽनघ इति ॥१९॥ यथैव विरुद्धसेविनो देहो न प्राप्नोति गुणं यतेरपि खल्वेतास्वयत्नवतो धर्मदेह इति ॥२०॥

**टीका**—**एष** शिक्षाद्वयान्वितो यतिः **आहारोपधिशय्यासु** आहारश्चाशनादिक उपधिश्च वस्त्रपात्रादिकः शय्या च प्रतिश्रयादिलक्षणा साधुवसतिश्च आहोरोपधिशय्याः, एतासु **नियमेन** नियोगेन **संयतः** सम्यग् रागद्वेषविरहेण सर्वत्र यतो यतनाशील आधाकर्मादिद्विचत्वारिंशदुत्पादनादिदोषाऽङ्गारधूमादिपञ्चमण्डलीदोषवर्जको **भवति** वर्तते। यदागमः—जयं चरे जयं चिट्ठे, जयमासे जयं सए। जयं भुंजंतो भासंतो, पावं कम्मं न बंधई॥ द. वै. सू. अ. ४–८॥ **इतश्चा**ऽत एव संयतत्वात्तस्य यतेः **चारित्रकायश्चा**रित्रं संयमः स एव ज्ञानादिगुणैश्चीयत इति कायो देहः **सम्यग्** अवितथभावेन सर्वत्र प्रवर्तनाद् **जायते** भवति **अनघः** परिशुद्ध **इतिः** समाप्तौ ॥१९॥ अथैतद्विपर्ययमाह **यथैव** दृष्टान्ते **विरुद्धसेविन**श्चिकित्साकाले कुपथ्यसेविन आतुरस्य **देहः** शरीरं **न** नैव **प्राप्नोति** याति **गुणम्** आरोग्यलक्षणलाभं तथैव **यतेरपि** साधोरपि **हु**शब्दोऽवधारणे **एतासु** आहारोपधिशय्यास्वेव **अव्यक्तव्रतः** अव्यक्तान्यतिचारशबलानि व्रतानि यस्याऽसौ **धर्मदेहः** चारित्रकायो **न** नैव प्राप्नोति **गुणं** ज्ञानादिस्फातिम्। 'अवत्तवओ' इति पाठान्तरमाश्रित्याऽव्यक्तश्चयो व्रतानां तदाधारभूतज्ञानादीनां वा यस्य स धर्मदेहः शेषं पूर्ववत्। अथवाऽऽहारोपधिशय्यासु **अयत्नवतः** अयतनाशीलस्य धर्मदेहो न प्राप्नोति गुणमिति ॥२०॥

# त्रयोदशी शुद्धभिक्षाविधिविंशिका

अनन्तरमेवोक्तं यथाऽऽहारोपधिशय्यासु यतेरयत्नवतो धर्मदेहो न प्राप्नोति गुणम्। अत्र विंशिकायां तु गुणप्राप्त्यर्थं शुद्धभिक्षाविधिमाह—

**भिक्खाविही उ नेओ इमस्स एसो महाणुभावस्स।**
**बायालदोसपरिसुद्धपिंडगहणं ति ते य इमे॥१॥**

**अक्षरगमनिका**—एतस्य महानुभावस्य तु द्वाचत्वारिंशद्दोषपरिशुद्धपिण्डग्रहणमित्येष भिक्षाविधिर्ज्ञेयस्ते चेमे—॥१॥

**टीका**—**एतस्या**नन्तरोक्तशिक्षाद्वयान्वितस्य **महानुभावस्य** परमतेजोलेश्याकस्य भावयतेरेव **तु** शब्दोऽवधारणे, तथा चानीदृशस्य व्यवच्छेदो बलादापद्यते, **द्वाचत्वारिंशद्दोषपरिशुद्धपिण्डग्रहणं** द्वाचत्वारिंशद् दोषा आधाकर्मादयस्तेभ्यः परिशुद्धो विनिर्मुक्तः पिण्डः अशनादिकस्तस्य ग्रहणमादानम् **इति** निर्देशे **एष** ग्रन्थकारहृदयस्थत्वात् प्रत्यक्षो **भिक्षाविधिः** अशनादिग्रहणविधानं मोक्षसाधनभूतस्य धर्मदेहस्य धारणार्थं निरवद्यो जिनोपदिष्टो **ज्ञेयो** बोद्धव्यः। यदागमः—

अहो जिनेहिं असावज्जा वित्ति साहूण देसिआ।
मुक्खसाहणहेउस्स साहूदेहस्स धारणा॥१॥

**ते चा**ऽऽधाकर्मादय इमेऽनन्तरं वक्ष्यमाणा उद्गमादिभेदभिन्ना बोद्धव्याः॥१॥

तथाहि—

**सोलस उग्गमदोसा सोलस उप्पायणाइ दोसा उ।**
**दस एसणाइ दोसा बायालीसं इय हवंति॥२॥**

**अक्षरगमनिका**—उद्गमदोषाः षोडश षोडश तूत्पादनाया दोषा दशैषणाया दोषा एवं द्वाचत्वारिंशद् भवन्ति॥२॥

**टीका**—**उद्गमदोषाः** साधूनाश्रित्य गृहस्थैर्विधीयमाना अशनादिनिष्पादनेऽपराधा आधाकर्मादयः सङ्ख्यया **षोडश**। तथा गणनया **षोडशैव तु**शब्दोऽवधारणे **उत्पादनायाः** पिण्डग्रहणे साधुभिरापाद्यमाना धात्र्यादयो **दोषा** अपराधा अपि। तथा **दश** सङ्ख्यया **एषणायाः** साधुगृहस्थोभयाभ्यां विधीयमानाः शङ्कितादयो **दोषा** अपराधाः। **एवं** सर्वमिलने गणनया दोषा **द्वाचत्वारिंशद् भवन्ति** जायन्ते॥२॥

अथोद्गमदोषानाह—

**आहाकम्मुद्देसिय पूइकम्मे य मीसजाए य।**
**ठवणा पाहुडियाए पाओयरकीयपामिच्चे॥३॥**

**परियट्टिए अभिहडे उब्भिन्ने मालोहडे इइ य।**
**अच्छिज्जे अनिसिट्ठे अज्झोयरए य सोलसमे॥४॥**

**अक्षरगमनिका**—आधाकर्मोद्देशिकपूतिकर्म च मिश्रजातं स्थापना प्राभृतिका प्रादुष्करक्रीत-

प्रामित्यम् ॥३॥ परिवर्तिताभ्याहृतोद्भिन्नमालोपहृतं चाऽऽच्छेद्याऽनिसृष्टाऽध्यवपूरकश्चेति षोडश ॥४॥

**टीका**—इमे उद्गमदोषाः—साध्वर्थं यत्सचित्तमचित्तीक्रियते तद् **आधाकर्म** १। तथाऽऽत्मार्थं यत्पूर्वसिद्धमेव लड्डुकचूर्णादि साधुमुद्दिश्य पुनरपि गुडादिना संस्क्रियते तद् **उद्देशिकं** सामान्येन, विशेषतः पिण्डनिर्युक्त्यादिग्रन्थतोऽवगन्तव्यम् २। यद् आधाकर्माद्यवयवमिश्रं तत्**पूतिकर्म** ३। साधुगृहस्थाद्यर्थमादेरारभ्याहारपरिपाको **मिश्रम्** ४। साध्वर्थं क्षीरादिस्थापनं **स्थापना** ५। विवाहादिप्रकरणस्य साध्वर्थमुत्सर्पणमवसर्पणं वा **प्राभृतिका** ६। साधूनाश्रित्य गवाक्षादिप्रकाशकरणं बहिर्वा प्रकाशे आहारस्य व्यवस्थापनं **प्रादुष्करणम्** ७। द्रव्यादिविनिमयेन स्वीकृतं **क्रीतम्** ८। साध्वर्थं यदन्यस्मादुच्छिन्नकं गृह्यते तत् **प्रामित्यम्** ९॥ यत् शाल्योदनादि कोद्रवादिना प्रातिवेशिकगृहे परिवर्त्य ददादि तत् **परिवर्तितम्** १०। यद् गृहादेः साधुवसतिमानीय ददाति तद् **अभ्याहृतम्** ११। गोमयाद्युपलिप्तं भाजनमुद्भिद्य ददाति तद् **उद्भिन्नम्** १२। मालाद्यवस्थितं निश्रेण्यादिनाऽवतार्य ददाति तद् **मालाहृतम्** १३। भृत्यादेराच्छिद्य यद् दीयते तद् **आच्छेद्यम्** १४। सामान्यं गोष्ठिभक्ताद्येकस्य ददतः **अनिसृष्टम्** १५। स्वार्थमधिश्रयणादौ कृते पश्चात् तन्दुलादिप्रसृत्यादिप्रक्षेपाद् **अध्यवपूरकः** १६। **चशब्दः** समुच्चये। **इति** एवं सर्वमिलने **षोडशोद्गमदोषा** भवन्ति ॥३–४॥ अथोत्पादनाया दोषानाह—

**धाईदूईनिमित्ते आजीव वणीमगे तिगिच्छा य।**
**कोहे माणे माया लोभे य हवंति दस एए॥५॥**

**पुव्विं पच्छा संथव विज्जा मंते य चुन्न जोगे य।**
**उप्पायणाइ दोसा सोलसमे मूलकम्मे य॥६॥**

**अक्षरगमनिका**—धात्री दूती निमित्तमाजीववनीपकश्चिकित्सा च क्रोधो मानो माया लोभश्च भवन्ति दशैते ॥५॥ पूर्वपश्चात्संस्तवो विद्या मन्त्रश्च चूर्णं योगः षोडशं मूलकर्म चोत्पादनाया दोषाः ॥६॥

**टीका**—अमी उत्पादना दोषाः, तद्यथा—अशनाद्यर्थं दातुरपत्योपकारे श्रमणो वर्तत इति धात्रीकर्म तद्दोषदुष्टः अशनादिपिण्डोऽपि **धात्रीपिण्डः**। एवं सर्वत्र योज्यम्। तथा दातुः कार्यसङ्घट्टनाय दौत्यं करोतीति **दूतीपिण्डः** २। अङ्गुष्ठप्रश्नादि निमित्तं तेनावाप्तो **निमित्तपिण्डः** ३। तथा जात्याद्याजीवनादवाप्त **आजीविकापिण्डः** ४। दातुर्यस्मिन् भक्तिस्तत्प्रशंसयाऽवाप्तो **वनीपकपिण्डः** ५। सूक्ष्मेतरचिकित्सयाऽवाप्त**श्चिकित्सापिण्डः** ६। एवं क्रोधमानमायालोभैरवाप्तः**क्रोधादिपिण्डः** ७–८–९–१०। भिक्षादानात् पूर्वं पश्चाद्वा दातुः 'कर्णायते भवानि'त्येवं संस्तवादवाप्तः **पूर्वपश्चात्संस्तवपिण्डः**११। विद्ययाऽवाप्तो **विद्यापिण्डः** १२। तथैव मन्त्रजापावाप्तो **मन्त्रपिण्डः** १३। वशीकरणाद्यर्थं द्रव्यचूर्णादवाप्त**श्चूर्णपिण्डः** १४। अञ्जनादियोगादवाप्तो **योगपिण्डः**१५ **षोडशं मूलकर्म** यत्कर्मणो गर्भशातनादेर्मूलप्रायश्चित्तमवाप्यते तद्विधानादवाप्तो मूलपिण्डः १६। एवमेते साधुसमुत्थाः षोडशो**त्पादनाया दोषा** अपराधा इति ॥५–६॥

अथैषणादोषानाह—

**संकिय मक्खिय निक्खित्त पिहिय साहरिय दायगुम्मीसे।**
**अपरिणय लित्त छड्डिय एसणदोसा दस हवंति॥७॥**

**अक्षरगमनिका**—शङ्कितम्रक्षितनिक्षिप्तपिहितसंहृत दायकोन्मिश्राऽपरिणतलिप्तछर्दितम् एषणादोषा दश भवन्ति ॥७॥

**टीका**—**शङ्कितम्** आधाकर्मादिना १। **म्रक्षितम्** उदकादिना २। **निक्षिप्तं** पृथिवीकायादौ ३। **पिहितं** बीजपूरकादिना ४। मात्रकादेस्तुषाद्यदेयमन्यत्र सचित्तपृथिव्यादौ संहृत्य तेन मात्रकादिना यद्ददाति तत् **संहृतम्** उच्यते ५। **दायको** दाता बालवृद्धाद्ययोग्यः ६। **उन्मिश्रं** सचित्तमिश्रम् ७। यद्देयं न सम्यगचित्तीभूतं दातृग्राहकयोर्वा न सम्यग्भावोपेतं तद् **अपरिणतम्** ८। **लिप्तं** वसादिना ९। **छर्दितं** परिशाटवदिति **१० दश** संख्यया **एषणादोषा** उक्तस्वरूपा भवन्तीति ॥७॥ अनन्तरोक्तद्वाचत्वारिंशद्दोषपरिशुद्धपिण्डस्य भोजनविधिमाह—

**एयद्दोसविमुक्को जईण पिंडो जिणेणऽणुन्नाओ।**
**संजोयणाइरहिओ भोगो वि इमस्स कारणओ ॥८॥**

**अक्षरगमनिका**—एतद्दोषविमुक्तः पिण्डो यतीनां जिनेनाऽनुज्ञातः अस्य भोगोऽपि संयोजनादिदोषरहितः कारणतः ॥८॥

**टीका**—**एतद्दोषविमुक्तः** अनन्तरोक्ताधाकर्मादिद्वाचत्वारिंशद्दोषपरिशुद्धः **पिण्डः** अशनादिको **यतीनां** श्रमणानां **जिनेन** श्रीसर्वज्ञभगवता **अनुज्ञातो** निर्दिष्टः। **अस्य** परिशुद्धपिण्डस्य **भोगोऽपि** न केवलं ग्रहणमभ्यवहरणमपि **संयोजनादिदोषरहितो** वक्ष्यमाणसंयोजनाप्रमाणादिदोषविनिर्मुक्तः **कारणतो** वक्ष्यमाणवेदनावैयावृत्त्यादिप्रयोजनाद् अनुज्ञात इति शेषः ॥८॥ संयोजनादिदोषानाह—

**दव्वाईसंजोयणमिह बत्तीसाहिगं तु अपमाणं।**
**रागेण सइंगालं दोसेण सधूमगं जाण ॥९॥**

**अक्षरगमनिका**—इह द्रव्यादिसंयोजनां द्वात्रिंशदधिकं त्वप्रमाणं रागेण साऽङ्गारं द्वेषेण सधूमकं जानीहि ॥९॥

**टीका**—**इह** परिशुद्धपिण्डभोगे लोलुपतया **द्रव्यादिसंयोजनां** द्रव्यादेर्दधिगुडादेः संयोजनां मिश्रणं विदधतः संयोजनादोषं जानीहि। एवं सर्वत्र वाच्यम्। **द्वात्रिंशदधिकं** पदैकदेशे पदसमुच्चयोपचाराद् द्वात्रिंशत्कवलप्रमाणातिरिक्तमेवाहारमाहारयतः **तु**शब्दोऽवधारणे **अप्रमाणम**प्रमाणदोषं, **रागेण** गृद्ध्या भुञ्जानस्य चारित्राङ्गराऽऽपादनात् कारणे कार्योपचाराद् रागोऽपि अङ्गारस्तेन सह **साङ्गारम्** अङ्गारदोषम्, एवमेव **द्वेषेणा**ऽन्तप्रान्तादावाहारद्वेषाच्चारित्रस्याऽभिधूमनात् पूर्वोक्तन्यायेन द्वेषोऽपि धूमस्तेन सह **सधूमकं** धूमदोषं **जानीहि** बोधस्वेति ॥९॥ अथ वेदनादिकारणमाह—

**वेयणवेयावच्चे इरियट्ठाए य संजमट्ठाए।**
**तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए ॥१०॥**

**अक्षरगमनिका**—वेदनावैयावृत्त्येर्यार्थं च संयमार्थं तथा प्राणवृत्त्यै षष्ठं पुनर्धर्मचिन्तायै ॥१०॥

**टीका**—**वेदना** क्षुद्वेदना तत्प्रशमनार्थं तथा **वैयावृत्त्यं** तदर्थं तथा **ईर्यार्थम्** ईर्यापथिकाशोधनार्थं **चः** समुच्चये **संयमार्थं** संयमः पेहोपेहपमज्जणादिलक्षणस्तदर्थं तथा **प्राणवृत्त्यै** प्राणसंधारणार्थं **षष्ठं** कारणं **पुनर्धर्मचिन्तार्थम्**। एतद्गाथाव्याख्यानं वक्ष्यमाणभाष्यगाथाद्वयतोऽवसेयम्—"नत्थि छुहाए सरिसया वेयण भुंजेज्ज तप्पसमणट्ठा। छाओ वेयावच्चं न तरइ काउं अओ भुंजे ॥२९०॥

इरियं नवि सोहेइ पेहाईयं च संजमं काउं।
थामो वा परिहायइ गुणणुप्पेहासु य असत्तो ॥२९१॥ (ओघनिर्युक्ति भाष्य)

एतद्गाथाद्वयार्थलेशः–

नास्ति क्षुत्सदृशी वेदनाऽतो भुञ्जीत तत्प्रशमनार्थम्। छाओ बुभुक्षितो वैयावृत्त्यं कर्तुं न शक्नोति, अतो भुङ्क्ते।।२९०।। ईर्यापथिकां बुभुक्षितो न शोधयति यतो तच्छोधनार्थं भुङ्क्ते। प्रेक्षादिकं संयमं बुभुक्षितो कर्तुं न शक्नोति यतो भुङ्क्ते। 'थामो' स्थाम प्राणस्तस्य परिहानिर्भवति यदि न भुङ्क्तेऽतस्तदर्थं भुञ्जीत। गुणनं परावर्तनं सूत्रार्थस्य तथाऽनुप्रेक्षा चिन्तनं गुणनानुप्रेक्षे तयोर्बुभुक्षितः अशक्तः अतस्तदर्थं भुञ्जीतेति।।२९१।।।१०।।

अथ वस्त्रविधिमाह—

**वत्थं पाहाकम्माइदोसदुट्ठं विवज्जियव्वं तु।**
**दोसाण जहासंभवमेएसिं जोयणा नेया।।११।।**

**अक्षरगमनिका**—वस्त्रमप्याधाकर्मादिदोषदुष्टं विवर्जितव्यम्। एतेषां दोषाणां योजना यथासंभवं ज्ञेया।।११।।

**टीका**—आस्तां पिण्डो **वस्त्रमपि** निर्वसनमपि **आधाकर्मादिदोषदुष्टम्** अनन्तरोक्तस्वरूपैराधाकर्मोद्देशिकादिभिर्दोषैर्दुष्टम् अकल्प्यमिति **विवर्जितव्यं** ग्रहणपरिभोगतः परिहर्तव्यम्। **एतेषाम्** आधाकर्मादीनां **दोषाणाम्** अपराधानां **योजना** घटना वस्त्रेऽपि **यथासंभवं** संभवमनतिक्रम्य **ज्ञेया** बोद्धव्या। तथाहि– आधाकर्म साधुप्रतिज्ञया सूत्रकर्तनादिना वस्त्रं निष्पादयेत्। तथा क्रीतं द्रव्यविनिमयेनाऽवाप्तम्। तथाऽन्यस्मादुच्छिन्नं गृहीतं प्रामित्यम्। तथाऽऽच्छेद्यं कुतश्चिद्बलादाच्छिद्य गृहीतम्। तथाऽनिसृष्टं स्वामिनाऽनुत्सङ्कलितम्। अभ्याहृतं निष्पन्नमेवाऽन्यतः समानीतम्। साधुप्रतिज्ञयैवापरखण्डं संयोज्य बृहत्कृतं यदिवा देशाऽपनयनेन लघुकृतम्। तथा क्षालितम्। काञ्जिकानीलीरागादिना संस्कृतम्। तथा धूपादिना धूपितम्। तदेवम्भूतं वस्त्रं न ग्रहीतव्यम्। विशेषार्थिना श्रीमदाचाराङ्गसूत्रद्वितीयश्रुतस्कन्धगतवस्त्रैषणाध्ययनतोऽवगन्तव्यमिति।।११।।

अथाऽशनपानादिविषयमेव विशेषत आह—

**इत्थेव पत्तभेएण एसणा होइऽभिग्गहपहाणा।**
**सत्त चउरो य पयडा अन्ना वि तहाऽविरुद्धत्ति।।१२।।**

**अक्षरगमनिका**—अत्रैव पात्रभेदेनापि एषणाऽभिग्रहप्रधाना भवति सप्त चतस्रश्च प्रकटाः तथाऽन्यापि अविरुद्धेति।।१२।।

**टीका**—**अत्रैव** अशनपानादिविषय एव **पात्रभेदेनाऽपि** पात्रं साधवो गच्छान्तर्गता गच्छविर्निर्गताश्च तेषां भेदेनाऽपि **एषणा** वक्ष्यमाणस्वरूपा **अभिग्रहप्रधाना** गच्छान्तर्गतानां वक्ष्यमाणानां सप्तानामपि पिण्डैषणानां पानैषणानां च ग्रहणमनुज्ञातं गच्छनिर्गतानां पुनराद्यद्वयोरग्रहः पञ्चस्वभिग्रह इति पात्रभेदेनाभिग्रहप्रधाना एषणा **भवति** जायते। **सप्त** संख्यया पिण्डैषणाः पानैषणाश्चानन्तरवक्ष्यमाणस्वरूपाः। **चतस्रश्च** वस्त्रैषणाः **प्रकटास्तन्त्रप्रसिद्धाः**। **तथा** समुच्चये, आस्तां सप्तभेदा चतुर्भेदा **अन्याऽपि** उक्तव्यतिरिक्ताऽपि द्रव्यक्षेत्रकालभावभिन्ना **अविरुद्धा** सूत्रेण सह सुसङ्गतेत्यर्थः।।१२।।

अथानन्तरोक्ताः सप्त पिण्डैषणाः पानैषणाश्च नामनिर्देशमाह—

**संसट्ठमसंसट्ठा उद्धड तह होइ अप्पलेवा य।**
**ओग्गहियापग्गहिया उज्झियधम्मा य सत्तमिया॥१३॥**

**अक्षरगमनिका**—असंसृष्टा संसृष्टोद्धताऽल्पलेपाऽवगृहीता प्रगृहीता तथोज्झितधर्मा च सप्तमिका भवति॥१३॥

**टीका**—**असंसृष्टा** नाम प्रथमा पिण्डैषणा, तत्राऽसंसृष्टो हस्तः असंसृष्टं च मात्रकं, द्रव्यं पुनः सावशेषं वा स्यान्निरवशेषं वा, तत्र निरवशेषे पश्चात्कर्मदोषस्तथापि गच्छस्य बालवृद्धग्लानाद्याकुलत्वात्तन्निषेधो नास्ति। अथ द्वितीया **संसृष्टा** पिण्डैषणा, तत्र संसृष्टो हस्तः संसृष्टं मात्रकं, शेषं पूर्ववत्। अथ तृतीया **उद्धृता** तत्र कैश्चित् श्रद्धालुभिर्गृहस्थैर्भाजनेषु पूर्वमुत्क्षिप्तमशनादि स्यात्, शेषं पूर्ववत्। अथ चतुर्थी पिण्डैषणा **अल्पलेपा** सा यत्पुनः पृथुकं भुग्नतन्दुलवल्लचनकादि वाऽल्पलेपम्। अथ पञ्चमी पिण्डैषणा **अवगृहीता** तत्रोपहतं भोक्तुकामस्य भाजनस्थितमेव, शेषं पूर्ववत्। अथ षष्ठी पिण्डैषणा नाम **प्रगृहीता** तत्र स्वार्थं परार्थं वा पिठरकादेरुद्धृत्य चट्टकादिनोत्क्षिप्ता परेण च न गृहीता प्रव्रजिताय वा दापिता सा प्रकर्षेण गृहीता तां तथाभूतां प्राभृतिकां पात्रस्थितां वा हस्तस्थितां वा जानीयात्, शेषं पूर्ववत्। **तथा** समुच्चये **सप्तमी** पिण्डैषणा **उज्झितधर्मा** यच्चान्ये द्विपदचतुष्पदश्रमणब्राह्मणातिथिकृपणवनीपका नावकाङ्क्षन्ति तथाप्रकार-मुज्झितधर्मं भोजनजातम् शेषं पूर्ववत्। आसु सप्तस्वपि पिण्डैषणासु, संसृष्टाद्यष्ट भङ्गका ज्ञातव्याः, नवरं चतुर्थ्यां नानात्वम्, तच्च तस्यामल्पलेपत्वात् संसृष्टाद्यभाव इति। एवं पानैषणा अपि नेया भङ्गकाश्च योज्याः, नवरं चतुर्थ्यां नानात्वम् अल्पलेपत्वात्संसृष्टाद्यभाव इति पिण्डैषणावद् ज्ञेयमिति॥१३॥

अथ वस्त्रैषणां नामनिर्देशमाह—

**उदिट्ठ पेह अंतर उज्झियधम्मा चउत्थिया होइ।**
**वत्थे वि एसणाओ पन्नत्ता वीयरागेहिं॥१४॥**

**अक्षरगमनिका**—उद्दिष्टं प्रेक्षितम् अन्तरम् उज्झितधर्मा चतुर्थिका भवति। वस्त्रेऽपि एषणाः प्रज्ञप्ता वीतरागैः॥१४॥

**टीका**—**उद्दिष्टं** प्राक् सङ्कल्पितं वस्त्रं याच्यते यतः सा प्रथमा प्रतिमा। तथा **प्रेक्षितं** दृष्टं सद् वस्त्रं यतो याच्यते सा द्वितीया। तथा **अन्तरं** वस्त्रान्तरं निवसिष्यमाणस्य मुक्तप्रायं वस्त्रं यतो याच्यते सा तृतीया। **तथोज्झितधर्मा** उत्सृष्टधार्मिकं वस्त्रं याच्यते यतः सा **चतुर्थिका** क्रमशश्चतुर्थी **भवति** वर्तते। एवमनन्तरोक्तरीत्याऽऽस्तामशनादिषु **वस्त्रेऽपि** निवसनेऽपि चतस्रो वस्त्रमिष्यते ज्ञायते शुद्धम-शुद्धमाभिरिति **एषणाः प्रज्ञप्ता** निर्दिष्टा **वीतरागै**र्जिनेश्वरभगवद्भिरिति॥१४॥

अथ शय्याविषयमाह—

**सिज्जा वि इहं नेया आहाकम्माइदोसरहिया वि।**
**ते वि दलाविक्खा इत्थं सयमेव जोइज्जा॥१५॥**

**अक्षरगमनिका**—शय्याऽपीह ज्ञेयाऽऽधाकर्मादिदोषरहिताऽपि। तानपि दलापेक्षयाऽत्र स्वयमेव योजयेत्॥१५॥

**टीका**—न केवलमशनपानादि **शय्याऽपि** प्रतिश्रयादिरूपसाधुवसतिरपि **इह** यतनाविषये **ज्ञेया** बोद्धव्या

**आधाकर्मादिदोषरहिता** आधाकर्मादिदोषपरिशुद्धा **अपिशब्दः** पूरणार्थः। आस्तां वक्ष्यमाणस्त्रीपण्डकादिदोषान् **तानपि** आधाकर्मादिदोषानपि **दलापेक्षया** प्रतिश्रयादिनिर्माणे यद्दलं व्याप्रियते तदपेक्षया—'पट्टी वंसो दो धारणाओ चत्तारि मूलवेलीओ' एतैः पृष्ठवंशादिभिः साधुप्रतिज्ञया या वसतिः क्रियते सा मूलगुणदुष्टा। सा च पुरुषान्तरस्वीकृताऽपि न कल्पते। **अत्र** वसतिविषये **स्वयमेवा**ऽऽत्मनैव सूत्रानुसारेण **योजयेद्** उन्नयेत्, तथाहि—आधाकर्म साधुप्रतिज्ञया प्राण्युपमर्दनेन साधुप्रतिश्रयं कश्चित् श्राद्धः कुर्यादिति। तथा क्रीतं मूल्येनाऽवाप्तं प्रतिश्रयादि। तथा प्रामित्यम् अन्यस्मादुच्छिन्नं गृहीतम्। तथाऽऽच्छेद्यं भृत्यादेर्बलादाच्छिद्य गृहीतम्। तथाऽनिसृष्टं स्वामिनाऽनुत्सङ्कलितम्। अभ्याहृतं निष्पन्नमेवाऽन्यतः समानीतम्। एवं मूलगुणदोषदुष्टे प्रतिश्रयादौ पुरुषान्तरकृतादावपि स्थानादि न विधेयमिति। अथोत्तरगुणदोषाश्चेमे—साधुप्रतिज्ञया लघुद्वारं प्रतिश्रयं महाद्वारं विदध्यात्। तथा काष्ठादिभिः कुड्यादौ संस्कृतं, वंशादिकम्बाभिरवबद्धं, दर्भादिभिश्छादितं, गोमयादिना लिप्तं, सुधादिना घृष्टं, लेवनादिना मृष्टं, भूमिकर्मादिना संमृष्टं दुर्गन्धापनयनार्थं धूपादिना धूपितं कुर्यात्। **तदेवम्भूते** प्रतिश्रयेऽपुरुषान्तरस्वीकृते यावदनासेविते स्थानादि न कुर्यात्, पुरुषान्तरकृताऽऽसेवितादौ प्रत्युपेक्ष्य स्थानादि कुर्यात्। विशेषार्थिना श्रीमदाचाराङ्गद्वितीयश्रुतस्कन्धगतशय्यैषणाऽध्ययनतोऽवसेयमिति ॥१५॥ अथ वसतिविषयकस्त्रीपण्डकादिदोषानाह—

**एसा वित्थीपंडगपसुरहिया जाण सुद्धिसंपुन्ना।**
**अन्नापीडाइ तहा उग्गहसुद्धा मुणेयव्वा ॥१६॥**

**अक्षरगमनिका**—एषाऽपि स्त्रीपण्डकपशुरहिता जानीहि शुद्धिसंपूर्णा। अन्याऽपीडया तथाऽवग्रहशुद्धा मुणितव्या ॥१६॥

**टीका**—आस्तामाधाकर्मादिदोषदुष्टा शय्या, **एषाऽपि** आधाकर्मादिदोषपरिशुद्धाऽपि **स्त्रीपण्डकपशुरहिता** नारीनपुंसकगवादिविविक्ता ब्रह्मचर्यविघातकत्वादेषामिति **जानीहि** बोधस्व **शुद्धिसंपूर्णा** शुद्ध्याऽनवद्यतया संपूर्णाऽविकला। **अन्याऽपीडया** अन्यः स्वव्यतिरिक्तप्रातिवेश्मिकादिस्तस्याऽपीडया पीडापरिहारेण, अत्र विषये श्रीवीरप्रभुः स्वयं निदर्शनं यतो वर्षाचातुर्मासेऽपि परिव्राजकानामप्रीतिनिवारणाय विजहार। **तथा** समुच्चये **अवग्रहशुद्धा** अवग्रहः अवकाशः स च वसतिस्वामिसाधर्मिकादेः सकाशाद् याचितस्तेन **शुद्धा** निरवद्या **मुणितव्या** बोद्धव्येति ॥१६॥ अथैतस्या विधिपरिभोगमाहात्म्यमाह—

**एसा वि हु विहिपरिभोगओ य आसंगवज्जियाणं तु।**
**वसही सुद्धा भणिया इहरा उ गिहं परिग्गहओ ॥१७॥**

**अक्षरगमनिका**—एषाऽपि वसतिः खल्वासङ्गवर्जितानां तु विधिपरिभोगतः शुद्धा भणिता, इतरथा तु परिग्रहतो गृहम् ॥१७॥

**टीका**—**एषापि** शुद्धिसंपूर्णाऽपि **वसतिः** शय्या **हु** प्राकृतत्वान्निश्चयत **आसङ्गवर्जितानां** ममत्वरहितानाम् उपलक्षणं चैतद् अमनोज्ञां वसतिं प्राप्याऽरतिवर्जितानां **तुशब्दो** विशेषार्थः स च विशेष उच्यत एव **विधिपरिभोगतो** विधिस्तु नवकल्पविहारक्रमेण साम्प्रतं च गुर्वाज्ञात आगतानां साधूनां प्रावृषि त्रिकालं ऋतुबद्धकाले चोभयकालं प्रमार्जनादिकस्तेन परिभोगत आवश्यकस्वाध्यायादिकरणेन तत्र निवसनात् **शुद्धा** निरवद्या **भणिता** समुपदिष्टा तीर्थकरगणधरैः। **इतरथा**ऽन्यथा उक्तविपर्ययेण **तु**शब्दोवधारणे भिन्नक्रमश्च **परिग्रहतो** मूर्च्छातो **गृहं** गेहमेवेति ॥१७॥ उपसंहरन्नाह—

**एवं आहाराइसु जुत्तवओ निम्ममस्स भावेण।**

**नियमेण धम्मदेहारोगाओ होइ निव्वाणं ॥१८॥**

**अक्षरगमनिका**—एवमाहारादिषु भावेन यत्नवतो निर्ममस्य नियमेन धर्मदेहाऽरोगाद् भवति निर्वाणम् ॥१८॥

**टीका**—**एवम्** अनन्तरोक्तनीत्या **आहारादिषु** आहारोपधिशय्यासु **भावेन** ज्ञानेन तदुपयुक्तेन च **युक्तवतो** युक्तस्याऽथवा 'जुत्तवओ' इति स्थाने 'जत्तवओ' इति पाठं संभाव्य यत्नवतः प्रयत्नशीलस्य **निर्ममस्य** निरीहस्य **नियमेनाऽ**वश्यंतया **धर्मदेहाऽरोगाद्** धर्मदेहे चारित्रकायेऽरोगाद् रोगाभावाद् भावारोग्यादित्यर्थः, **भवति** जायते **निर्वाणम्** अजरामरत्वं मोक्ष इत्यर्थः ॥१८॥ अनन्तरमेव भावेन यत्नवतो यदुक्तं तदेव स्पष्टयति—

**जाणइ असुद्धिमेसो आहाराईण सुत्तभणियाणं।**

**सम्मुवउत्तो नियमा पिंडेसणभणियविहिणा य ॥१९॥**

इति भिक्षाविंशिका त्रयोदशी ॥१३॥

**अक्षरगमनिका**—एष नियमात् सूत्रभणितानामाहारादीनामशुद्धिं जानाति पिण्डैषणाभणितविधिना सम्यगुपयुक्तश्च ॥१९॥

**टीका**—**एष** भावयतिः **नियमादवश्यं सूत्रभणितानां** जिनागमोपदिष्टानाम् **आहारादीनां** पान-भोजनोपधिशय्यानाम् **अशुद्धिं** सदोषतां **जानाति** समवगच्छति, आहारादिदोषानभिज्ञस्य भिक्षायामनधिकार एवेति **पिण्डैषणाभणितविधिना** श्रीदशवैकालिकसूत्रपञ्चमाध्ययनपिण्डनिर्युक्त्यादिग्रन्थोपदिष्टविधानेन **सम्यग्** अवितथभावेन **उपयुक्तस्**तदर्थोपयोगवान् **चः** समुच्चये जानात्युपयुक्तश्चेति ॥१९॥ अत्र विंशिकायां त्वेकोनविंशतिरेव गाथा उपलभ्यन्त इति।

# चतुर्दशी अशुद्धिलिङ्गान्तभिक्षान्तरायविंशिका

अनन्तरभिक्षाविधिविंशिकामुपसंहरता ग्रन्थकारेण यदुक्तं यथैष नियमादशुद्धिं जानाति विधिनोपयुक्तश्च तदत्र विंशिकायामशुद्धिलिङ्गानि तदन्ते च भिक्षान्तरायान् वक्तुकाम आह—

**भिक्खाए वच्चंतो जइणो गुरुणो करेति उवओगं।**

**जोगंतरं पवज्जिउकामो आभोगपरिसुद्धं ॥१॥**

**अक्षरगमनिका**—योगान्तरं प्रपत्तुकामा भिक्षायै व्रजन्तो यतयो गुरावाभोगपरिशुद्धमुपयोगं कुर्वन्ति ॥१॥

**टीका**—**योगान्तरं** योगो धर्मव्यापारः स च प्रस्तावात् सूत्रार्थपौरुषीलक्षणस्तं कृत्वा तदनन्तरं तदन्यो योगो भिक्षाटनलक्षणस्तं **प्रपत्तुकामाः** स्वीचिकीर्षवो **भिक्षायै** गोचरचर्यायै **व्रजन्तो** गच्छन्तो **यतयः**

श्रमणाः प्राकृतत्वेन विभक्तिव्यत्ययाद् **गुरौ** आचार्यपार्श्वे सर्वत्र विहितानुष्ठानेऽवितथभावेन प्रवृत्त्यर्थं प्रस्तावाद् भिक्षाशुद्धिनिमित्तम् **आभोगपरिशुद्धं** ज्ञानपरिपूतम् **उपयोगं** प्रणिधानं प्राकृतत्वेन वचनव्यत्ययात् **कुर्वन्ति** विदधति। सोपयोगप्रवृत्तेस्तथासंस्काराधानेन सानुबन्धानुष्ठानहेतुभावाद् विपुलनिर्जराकारणत्वाच्च। किञ्च-सोपयोगप्रवृत्तिलिङ्ग एव बोधः परलोकपक्षपातो भगवद्बहुमानश्चेति श्री हरिभद्रसूरयो योगशतकवृत्तौ। अयं विशेषः–प्राक्तना यतयो भिक्षायै व्रजन्त उपयोगं कृतवन्तः अद्यतनास्तु प्रातरेव तं कुर्वन्तीति।।१।।

अथोपयोगपदार्थस्य संगतिपुरस्सरं भिक्षायाःकालं प्रयोजनं चाह—

**सामीवेणं जोगो एसो सुत्ताइजोगओ होइ।**
**कालाविक्खाइ तहा जणदेहाणुग्गहट्ठाए।।२।।**

**अक्षरगमनिका**—कालापेक्षया सूत्रादियोगतः सामीप्येनैष योगोस्तथा जनदेहानुग्रहार्थं भवति ।।२।।

**टीका**—**कालापेक्षया** मध्याह्नवेलां गृहस्थानां वा भोजनवेलामाश्रित्य, यदागमः–कालेण निक्खमे भिक्खू, कालेण य पडिक्कमे। अकालं च विवज्जिज्जा, काले कालं समायरे।।४।। द. वै अ.५ उ. २। अन्यथा गृहस्था अपि सुपात्रदानलाभाद् वञ्चिता भवन्तीति। **सूत्रादियोगतः** सूत्रार्थपौरुषीलक्षण-धर्मव्यापारस्य **सामीप्येन** प्रत्यासन्नत्वेन **एष योगो** भिक्षाटनयोग उपयोगस्तदर्थमाभोगोऽपि उपयोगः कारणे कार्योपचारात्। किमर्थमेष योगः ? आचार्य आह – यथा तीर्थकरगणधरैरनुज्ञातं **तथा जनदेहानुग्रहार्थं** तथा तेन विधिना जनश्चगृहस्थलोकस्तस्य पुण्यानुबन्धिपुण्योपार्जकसुपात्रदाने निमित्तभावेन देहश्च धर्मसाधनलक्षणः साधुचारित्रकायो जनदेहौ तयोरनुग्रह उपकारस्तदर्थं **भवति** जायत इति।।२।। प्रसङ्गत उपयोग-स्थाननिरुपणपुरस्सरं गुर्वाज्ञामार्गणायाह—

**एयविसुद्धिनिमित्तं अद्धागहणट्ठ सुत्तजोगट्ठा।**
**जोगतिगेणुवउत्ता गुरुआणं तह पमग्गंति।।३।।**

**अक्षरगमनिका**—एतद्विशुद्धिनिमित्तमद्धाग्रहणार्थं सूत्रयोगार्थं योगत्रिकेणोपयुक्तास्तथा गुर्वाज्ञां प्रमार्गयन्ति।।३।।

**टीका**—**एतद्विशुद्धिनिमित्तं** प्रस्तावाद् भिक्षाशुद्धिनिमितं तथाऽ**द्धाग्रहणार्थं** अद्धा कालसमयस्तद्ग्रहणार्थं कालग्रहणार्थमित्यर्थः, अथवा प्राकृतत्वाद् अध्वा दूरदेशान्तरगमनं तदर्थम् इत्यप्यर्थः, 'अट्ठागहणट्ठ' त्ति पाठान्तरमाश्रित्य अर्थस्य सूत्रार्थस्य आग्रहणं मर्यादया ग्रहणं तदर्थं तथा **सूत्रयोगार्थं** सूत्रप्राप्त्यर्थं योगोद्वह-नार्थमित्यर्थः अथवा सूत्रेण सह योगः सम्बन्धः सूत्रयोगः स एवाऽर्थः प्रयोजनं येषां ते सूत्रयोगार्था यतयो **योगत्रिकेण** मनोवाक्कायलक्षणेन **उपयुक्ताः** प्रणिहिताः कायोत्सर्गे स्थित्वा भिक्षानिमित्तशुद्धिं ज्ञात्वा **तथा गुर्वाज्ञां** वक्ष्यमाणविधिना इच्छाकारेण संदिसह भगवन्! इत्यादिपाठेन 'लाभ' इत्याद्याचार्याऽऽशीर्वचनादिलक्षणां यतिलोकप्रसिद्धां **प्रमार्गयन्ति** याचन्तीति।।३।। ननूपयोगार्थं कायोत्सर्गे स्थित्वा किं चिन्तयन्तीत्याह—

**चिंतेइ मंगलमिह निमित्तसुद्धिं तिहा परिक्खंता**
**कायवयमणेहि तहा नियगुरुयणसंगएहिं तु।।४।।**

**अक्षरगमनिका**—इह त्रिधा निज–गुरु–जनसङ्गतैस्तथाकायवचोमनोभिर्निमित्तशुद्धिं परीक्षमाणा-श्चिन्तयन्ति मङ्गलम्।।४।।

श्री सुविधिसागर जी म

**टीका**—**इह** भिक्षायोगे प्रवर्तमाना मुनयः कायोत्सर्गे चिन्तयन्ति मङ्गलमिति सण्टङ्कः। **त्रिधा** वक्ष्यमाणनीत्या **निजगुरुजनसङ्गतैः** निजैर्दक्षिणाङ्गस्फुरणादिभिः शुभप्रवृत्तिलक्षणैस्तथा गुरुराचार्यादिरत्नाधिक-संघाटकप्रभृतिस्तत्सत्कैस्तथैव शुभप्रवृत्तिलक्षणैस्तथा जनसङ्गतैर्लोकप्रवादादिरूपैर्यथा काचित् सन्नारी स्वशिशुं त्वरयन्ती वदेत् शीघ्रं याहीत्यादिलक्षणै**स्तथाकायवचोमनोभिः** शुभदेहवाक्स्वान्तैरुपलक्षणान्नन्दितूरादिशकुनैश्च **निमित्तशुद्धिं** लिङ्गशुद्धतां **परीक्षमाणाः** परितः समन्ताद् ईक्षमाणा अवलोकयन्तश्चिन्तयन्ति प्राकृतत्वाद्वचनव्यत्यय इति ध्यायन्ति **मङ्गलं** पञ्चपरमेष्ठिनमस्कारलक्षणमहामन्त्रमिति ॥४॥ एतेषां निमित्तानामशुद्धौ यत्कर्तव्यं तदाह—

**एयाणमसुद्धिए चिइवंदण तह पुणो वि उवओगो।**
**सुद्धे गमणं हु चिरं असुद्धभावे ण तद्दियहं ॥५॥**

**अक्षरगमनिका**—एतेषामशुद्धौ पुनरपि चैत्यवन्दनं तथोपयोगोऽपि। शुद्धे खलु गमनम्। चिरम-शुद्धिभावे न तद्दिवसे ॥५॥

**टीका**—**एतेषाम्** अनन्तरोक्तनिजगुरुजनसङ्गतमनोवाक्कायादिनां निमित्तानाम् **अशुद्धौ** शुद्धताऽभावे **पुनरपि** मुहुरपि **चैत्यवन्दनं** जिनप्रतिमाया वन्दनं **तथा** समुच्चये **उपयोगोऽपि** प्रणिधानमपि पुनः कर्तव्य इति शेषः। **शुद्धे** भावनिर्देशाद् निमित्तानां शुद्धत्वे सत्येव **हु** प्राकृतत्वादवधारणे भिक्षायै **गमनं** यानं कार्यम्। **चिरं** मुहुर्मुहुः **अशुद्धिभावे** अशुद्धौ सत्यां **न** नैव **तद्दिवसे** तस्मिन् वासरे गमनं कर्तव्यं परं तद्दिवस उपोषितः स्यादिति ॥५॥ निमित्तशुद्धिं निरूप्याऽथाऽन्तरायानाह—

**सुद्धे वि अंतराया एए परिसेहगा इहं हुंति।**
**आहारस्स इमे खलु धम्मस्स उ साहगा जोगा ॥६॥**

इति लेशतः अशुद्धिलिङ्गान्तभिक्षान्तरायविंशिका चतुर्दशी ॥

**अक्षरगमनिका**—शुद्धेऽपीहैतेऽन्तराया आहारस्य प्रतिषेधका भवन्ति। इमे योगास्तु खलु धर्मस्य साधकाः ॥६॥

**टीका**—आस्तामशुद्धे **शुद्धेऽपि** विशुद्धेऽपि निमित्ते **इह** मौनीन्द्रप्रवचने **एते** वक्ष्यमाणा **अन्तराया** विघ्नानि **आहारस्याऽ**शनादेस्तच्छुद्धेर्वा **प्रतिषेधका** निषेधका **भवन्ति** वर्तन्ते। अत्र हेतुमाह—यस्माद् **इमे** परिशुद्ध्यर्थं भिक्षाटनादिका **योगा** मनोवाक्कायलक्षणा धर्मव्यापारा **धर्मस्य** ज्ञानादिलक्षणस्य **साधका** निष्पादकाः सन्ति। आहारशुद्धौ सत्यामेव योगशुद्धिरिति। तदुक्तं च-गुर्वी पिण्डविशुद्धिरेव संयमाधारः। किञ्च—न्यायोपार्जितं द्रव्यं यथा गृहस्थानामभ्युदयसाधकं तथैव यतीनां शुद्धाहारादयो विशुद्धचारित्रसाधका इति ॥६॥ अतः परं प्रस्तुतविंशिकायां गाथा नोपलभ्यन्ते तथाऽपि स्थानपूर्तये दिगम्बराऽऽम्नायाऽऽगत-मूलाचारग्रन्थेऽन्तरायविषयकं गाथाषट्कमुपलभ्यते, तदत्राऽक्षरगमनिकया सह लिख्यते-

**कागागिद्धाछद्दीरोधनरुधिरं च अस्सुवादं च।**
**जण्हुहेट्ठापरिधं जण्हुवरि वदिकमो चेव ॥१॥**

**णाहिअहोणिग्गमणं पच्चक्खिदसेवण च जंतुवहो।**
**कागादिपिंडहरणं पाणीदो पिंडपडणं च ॥२॥**

**पाणीये जंतुवहो मंसादीदंसणे य उवसग्गे।**
**पादंतरपंचिंदिय संपादो भायणाणं च॥३॥**

**उच्चारं पस्सवणं अभोज्जगिहपवेसणं तहा पडणं।**
मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज
**उववेसण संदंसो भूमी संफासणिट्ठिवणं॥४॥**

**उदरक्किमिणिग्गमणं अदत्तगहणं पहारगामदाहो य।**
**पादेण किंचिगहणं करेण वा जच्च भूमीदो॥५॥**

**एदे अण्णे बहुगा कारणभूदा अभोजणस्सेह।**
**भीहण लोयदुगुच्छण संजमणिव्वेदणट्ठं च॥६॥**

**अक्षरगमनिका**—काकगृद्धादीनां विट्पातः १। छर्दिर्वमनं स्वगतम् २। रोधनं केनचित् ३। रुधिरं स्वकीयात् परकीयाद्वा शरीरादधिकप्रमाणेन रुधिरस्य निर्गमनम् ४। अश्रुपातः शोकादेः ५। गृहप्रवेशादौ जानूपरिपरिघादिकाष्ठोल्लङ्घनम् ६। लघुद्वारगृहप्रवेशादौ व्यतिक्रमः शिरोनामनम् ७। प्रत्याख्यातद्रव्यसेवनम् ८। जन्तुवध ईर्यापथिकायां मार्जारादिना वा मूषकादेः ९। काकादिना पिण्डाऽपहरणम् १०। स्वस्य दातुर्वा पाणितः पिण्डपातः ११। पाने मक्षिकादिजन्तुवधः १२। पशुमांसादिदर्शनम् १३। दिव्याद्युपसर्गः १४। पादयोरन्तराले पञ्चेन्द्रियनिर्गमनम् १५। स्वस्य दातुर्वा भाजनपातः १६। भिक्षाटन एवोच्चारप्रस्रवणम् १७–१८। अनाभोगत एवाऽभोज्यगृहप्रवेशः १९। भ्रमितः श्रमतो वा भूमौ पतनं तदेवोपवेशनम् २०। श्वादिना दंशः २१। हस्तेन भूमिस्पर्शः २२। पिण्डोपरि निष्ठीवनपातः २३। उदरकृमिनिर्गमनम् २४। अदत्तपिण्डग्रहणम् २५। स्वोपरि प्रत्यासन्ने वा जन्तौ प्रहारः २६। ग्रामदाहश्च २७। भूमितो हस्तेन पादेन वा जात्यसुवर्णादिग्रहणम् २८। एतेऽन्ये च बहुका अन्तरायाः कारणभूता अभोजनस्येह जिनप्रवचने, तथाहि-युद्धादेर्भीः २९। लोकजुगुप्सा ३०। संयमः स च जीवरक्षेन्द्रियदमनलक्षणश्च ३१। भवनिर्वेदाच्च ३२। इति गाथाषट्काक्षरगमनिका।

अत्र विंशिकायामनन्तरोक्तव्यतिरिक्तानामपि श्रमणसूत्रभणितानां पिहितकपाटोद्घाटनश्वानवत्स-दारकसंघट्टनप्रभृतीनां दोषाणां निर्देशः संभवति। तत्त्वं तु केवलिगम्यमिति॥

* * *

# पञ्चदशी आलोचनाविधानविंशिका

अनन्तरविंशिकायां भिक्षाया अशुद्धिलिङ्गानि तदन्ते चान्तराया उक्ताः। अत्र विंशिकायां तु भिक्षासु यत्नवतोऽपि येऽतिचारा जायन्ते तेषां शुद्ध्यर्थमालोचनाविधानमाह—

**भिक्खाइसु जत्तवओ एवमवि य माइदोसओ जाओ।**
**हुंतऽइयारा ते पुण सोहइ आलोयणाइ जई॥१॥**

**अक्षरगमनिका**—एवं च भिक्षादिषु यत्नवतोऽपि मातृदोषतो येऽतिचारा भवन्ति तान् पुनर्यति-रालोचनया शोधयतीति॥१॥

**टीका**—**एवं** चानन्तरोक्तनीत्यैव **भिक्षादिषु** गोचरचर्यास्थानगमनागमनस्वाध्यायप्रतिलेखनप्रभृतिषु **यत्नवतोऽपि** यतनाशीलस्याऽपि **मातृदोषतः** पदैकदेशे पदोपचाराद् मातृस्थानदोषतो मायादोषत इत्यर्थः, तथाहि—गृहस्थः कदाचित् कालेनाऽनुप्रविष्टस्यापि भिक्षोराधाकर्मिकमशनादि विदध्यात्, तच्चाऽप्रतिषिध्यैव कश्चित् साधुस्तूष्णीभावेनोत्प्रेक्षेत, किमर्थम्? आहृतमेव प्रत्याख्यास्यामीति, एवं च मातृस्थानं संस्पृशेत्, उपलक्षणाद् विस्मृतेः प्रमाददुश्चरिताच्च **ये** केचनाऽ**तिचारा** अपराधाश्चारित्रमालिन्याऽऽपादका **भवन्ति** जायन्ते **तान्** अतिचारान् **पुनर्यतिः** श्रमण **आलोचनया** गुरुपार्श्वे स्वाऽपराधनिवेदनया **शोधयति** परिमार्जयतीति ॥१॥ अथाऽऽलोचनादानस्याऽवसरं विधिं चाह—

**पक्खे चाउम्मासे आलोयण नियमसो उ दायव्वा।**
**गहणं अभिग्गहाण य पुव्वग्गहिए णिवेदेउं॥२॥**

**अक्षरगमनिका**—पक्षे चातुर्मास्ये चाऽऽलोचना तु नियमशो दातव्या। पूर्वगृहीतान् च निवेद्याऽभिग्रहाणां च ग्रहणम्॥२॥

**टीका**—सामान्यतो यदाऽपराधो जायते तदैवाऽऽलोचना दातव्या, परं तथाविधसंयोगाऽभावे **पक्षे** मासार्धके तथा **चातुर्मास्ये** चतुर्मासान्ते **चः** समुच्चये **आलोचना** पूर्वोक्तस्वरूपा **तु**शब्दोऽवधारणे **नियमशो**ऽवश्यंतयैव **दातव्या** समर्पणीया। किञ्च-**पूर्वगृहीतान्** आलोचनादानात् प्राग् गृहीतानुपात्तानभिग्रहान् च **निवेद्य** गुरवे कथयित्वा नवानां **चाभिग्रहाणां** द्रव्यक्षेत्रकालादिभेदभिन्नानां पक्षादिकालमानानां नियमानां **ग्रहणम्** उपादानं कर्तव्यमिति शेषः। अभिग्रहा हि साधूनां विशिष्टाचारत्वात् सत्त्ववृद्धिहेतुभावात् कर्मक्षयकारणाच्चाऽऽलोचनाऽर्हत्वख्यापका इति।२॥ अथाऽऽलोचनारहस्यार्थमाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**आलोयणा पयडणा भावस्स सदोसकहणमिइ गज्झो।**
**गुरुणो एसा य तहा सुविज्जनाएगा विन्नेआ॥३॥**

**अक्षरगमनिका**—भावस्य प्रकटना तथा स्वदोषकथनमालोचनेति ग्राह्यम्। सुवैद्यज्ञातेनैषा गुरोर्विज्ञेया॥३॥

**टीका**—**भावस्या**ऽपराधसेवनकाले यदशुभमध्यवसितं तस्य **प्रकटना** प्रकाशना यथाऽपराधो जात**स्तथा स्वदोषकथनं** निजापराधनिवेदनम् **आलोचना** आ समन्ताद् द्रव्यक्षेत्रकालभावैर्लोचनं प्रकाशनं कथन**मितिशब्दो** निदर्शन आलोचनापदार्थ इति प्राकृतत्वेन लिङ्गव्यत्ययाद् **ग्राह्यं** बोद्धव्यम्। अथवा 'गुज्झो' इति पाठं संभाव्य **गुह्यः** स्वदोषकथनमालोचनारहस्यार्थ इति। कस्य दातव्यैषेति दृष्टान्तपुरस्सरमाह—**सुवैद्यज्ञातेन** यथा सुज्ञव्याधितः **सुवैद्यस्य** आयुर्वेदनिष्णातस्याग्रे स्वकीयव्याधिव्यतिकरं निवेदयति **तथा** तद्ध**देषा**ऽऽलोचना **गुरो**राचार्यस्य गीतार्थस्य वा श्रमणस्याग्रे **विज्ञेया** बोद्धव्येति॥३॥ एनमेवार्थं विशदयति—

**जह चेव दोसकहणं न विज्जमित्तस्स सुंदरं होइ।**
**अवि य सुविज्जस्स तहा विन्नेयं भावदोसे वि॥४॥**

**अक्षरगमनिका**—यथा च वैद्यमात्रस्य दोषकथनं सुन्दरं न भवति, अपि च सुवैद्यस्य तथा भावदोषेऽपि विज्ञेयम्॥४॥

**टीका**—**यथा च** यद्वद्य **वैद्यमात्रस्य** आयुर्वेदविज्ञानविरहितस्य नाममात्रस्य भिषजः पुरतो **दोषकथनं**

दोषः स्वकीयव्याधिविकारस्तस्य कथनं निवेदनं **सुन्दरं** शोभनं **न** नैव **भवति** जायतेऽकिञ्चित्करत्वात्**तस्य, अपि च** परं **सुवैद्यस्य** निपुणभिषजः अग्रे निवेदनं गुणकरं भवति। **तथा** तद्वद् **भावदोषेऽपि** चारित्रकायविषयकापराधेऽपि **विज्ञेयं** बोद्धव्यमिति ॥४॥ एतदेवाऽभ्युच्चयति—

**तत्थ सुविज्जो य इमो आरोग्गं जो विहाणओ कुणइ।**
**चरणारुग्गकरो खलु एवमित्थ गुरू वि विन्नेओ ॥५॥**

**अक्षरगमनिका**—तत्र यो विधानत आरोग्यं करोति अयं च सुवैद्यः, एवमत्रापि चरणाऽऽरोग्यकरः खलु गुरुर्विज्ञेयः ॥५॥

**तत्र** व्याधिते **यो विधानत** आयुर्वेदोक्तविधिना चिकित्साकरणेन **आरोग्यम्** अनामयं **करोति** विदधाति स **एवायं चशब्दो**ऽवधारणे **सुवैद्यो** भिषग्वरः। **एवम्** अनेन प्रकारेण **अत्रापि** चारित्रकायविषयकापराधेऽपि प्रायश्चित्तग्रन्थोक्तविधिना प्रायश्चित्तप्रदानेन यो **चरणाऽऽरोग्यकरः** चारित्रनैर्मल्याऽऽपादकः स एव **खलु**शब्दोऽवधारणे **गुरुः** सुगुरुर्योग्यो आलोचनाया **विज्ञेयो** बोद्धव्य इति ॥५॥ अथ सुगुरुस्वरूपमाह—

**जस्स समीवे भावाउरा तहा पाविऊण विहिपुव्वं।**
**चरणारुग्गं पकरंति सो गुरू सिद्धकम्मुत्थ ॥६॥**

**अक्षरगमनिका**—तथा भावातुरा विधिपूर्वं यस्य समीपे प्राप्य चरणारोग्यं प्रकुर्वन्ति स गुरुरत्र सिद्धकर्मा ॥६॥

**टीका**—यथा विधानत आरोग्यं करोति ससुवैद्यस्**तथा** तद्वद् **भावातुरा** मायादिशल्यपीडिता **विधिपूर्वं** छेदसूत्रोक्तविधानपुरस्सरमात्मनिवेदनाद् **यस्य** गुरोः भावनिर्देशात् प्राकृतत्वेन विभक्तिव्यत्ययाच्च **सामीप्यं** सान्निध्यं प्राप्य, अथवा यस्य समीपे प्रायश्चित्तं ज्ञानादि वा **प्राप्य** लब्ध्वा **चरणारोग्यं** चारित्रनैर्मल्यं **प्रकुर्वन्ति** प्रकर्षेण विदधति **स गुरु**राचार्यादिः **अत्र** भावरोगविषये **सिद्धकर्मा** निष्णातः स्थिरहस्तः सफलक्रियः इति यावत् ॥६॥ कथमेतादृशः सिद्धकर्मा गुरुर्भवतीत्याशङ्क्याह—

**धम्मस्स पभावेण जायइ एयारिसो न सव्वो वि।**
**विज्जो व सिद्धकम्मो जइयव्वं एरिसे विहिणा ॥७॥**

**अक्षरगमनिका**—सिद्धकर्मा वैद्य इव धर्मस्य प्रभावेणैतादृशो जायते न सर्वोऽपि। ईदृशे विधिना यतितव्यम् ॥७॥

**टीका**—**सिद्धकर्मा** निष्णातो **वैद्य इव** भिषगिव **धर्मस्य** श्रुतचारित्रधर्मस्य **प्रभावेण** गरिम्णा **एतादृश** ईदृशः स्थिरहस्तो गीतार्थो **जायते** भवति **न** नैव **सर्वोऽपि** निखिलोऽपि यतिवर्गः, अपि तु कश्चिदेव स्वल्पानामेव लघुकर्मित्वाद् भाविभद्रत्वाद् धर्मनिष्ठत्वात्तथोद्यतत्वाच्च। अत **ईदृशे** धर्मप्रभावेण जातसिद्धकर्मणि गुरौ **विधिना** छेदग्रन्थोक्तविधानेन **यतितव्यम्** आलोचनादाने प्रयतितुं युज्यत इति ॥७॥ सिद्धकर्मगुरुमेव विशिनष्टि—

**एसो पुण नियमेणं गीयत्थाइगुणसंजुओ चेव।**
**धम्मकहापक्खेवगविसेसओ होइ उ विसिट्ठो ॥८॥**

**अक्षरगमनिका**—एष पुनर्नियमेन गीतार्थादिगुणसंयुक्त एव धर्मकथाप्रक्षेपकविशेषतस्तु भवति विशिष्टः ॥८॥

**टीका**—**एषः** अनन्तरोक्तसिद्धकर्मा गुरुः **पुनः**शब्दो विशेषे **नियमेन** नियोगेन **गीतार्थादिगुणसंयुक्तो** गीतः अध्ययनाध्यापनपरिशीलनादिना सात्मीभावं नीतः अर्थ आगमार्थो येन स गीतार्थस्तस्य भावो गीतार्थत्वम्, आदिपदात् संविग्नत्वादिगुणैः संयुक्तः समन्वित **एव**। **धर्मकथाप्रक्षेपकविशेषतो** भावनिर्देशाद् धर्मकथया प्रक्षेपकत्वगुणविशेषात् सदृष्टान्तमालोचनादाने निःशल्यत्वचारित्रशुद्धिचित्तप्रसादादिमोक्षाऽवाप्तिपर्यन्तान् गुणान् प्रदर्श्याऽनालोचिते च सशल्यत्वे भयङ्करभवपरम्परां प्रदर्श्य श्रोतॄणां स्वदुश्चरितकथनं प्रति भावोल्लासन-गुणविशेषादेव **तु**शब्दोऽवधारणे **भवति** जायते **विशिष्ट** उत्तम इति ॥८॥ किञ्च—

**धम्मकहाउज्जुत्तो भावन्नू परिणओ चरित्तम्मि।**
**संवेगवुड्ढिजणओ सम्मं सोमो पसंतो य ॥९॥**

**अक्षरगमनिका**—धर्मकथोद्युक्तो भावज्ञश्चारित्रे परिणतः सम्यक् संवेगवृद्धिजनकः सौम्यः प्रशान्तश्च ॥९॥

**टीका**—**धर्मकथोद्युक्तो** धर्मकथायां दृष्टान्तपुरस्सरमैहिकपारलौकिकान् दुर्भिक्षदुर्बलत्वदुर्लभबोधि-कत्वादीनपायान् प्रदर्श्याऽऽलोचनादापनायोद्युक्तस्तत्परः, तथा **भावज्ञ** इङ्गितादिभिः परचेतोनिश्चायकः अत एव प्रायश्चित्तदाने समर्थः, तथा **चारित्रे** संयमे ज्ञानाऽऽसेवाभ्यां **परिणतः** अपुष्टालम्बनातिचारपरिहारेण सात्मीभूतचारित्र आज्ञानुसारिणीचर्यावानित्यर्थः अत एव श्रद्धेयत्वात् **सम्यग्** अवितथभावेन **संवेगवृद्धिजनको** भवभीरुतावर्धको मोक्षतीव्राभिलाषजनको वा भावाद्भावप्रसूतिरिति, तथा **सौम्यः** प्रकृत्याकारवाणीव्यवहारैर्मृदुः, अत एवादरणीयः तथा **प्रशान्त**स्तथाविधकषायोपशमादन्तो बहिश्च प्रशमगुणान्वितः शीतगृहादप्यधिकः शीत इत्यर्थः, **चः** समुच्चये। एतद्गुणगणसमलङ्कृतो नियमेन विशिष्टो भवतीति ॥९॥ अथैतादृशे गुरौ कीदृशेनाऽऽलोचयितव्यमित्याह—

**एयारिसम्मि नियमा संविग्गेणं पमायदुच्चरियं।**
**अपुणकरणुज्जएणं पयासियव्वं जइजणेणं ॥१०॥**

**अक्षरगमनिका**—एतादृशे संविग्नेनाऽपुनःकरणोद्यतेन यतिजनेन नियमात् प्रमाददुश्चरितं प्रकाशयितव्यम् ॥१०॥

**टीका**—**एतादृशे** अनन्तरगाथाद्वयोक्तगुणविशिष्टगुरुपार्श्वे **संविग्नेन** भवभीरुणा संविग्नस्यैव दुष्कराऽऽलोचनादानं यदागमः—"अवि राया चए रज्जं न य दुच्चरियं कहे" तथाऽ**पुनःकरणोद्यतेन** पुनर्मुहुः करणं विधानं पुनःकरणं, न पुनःकरणम् अपुनःकरणं प्रकाशिताऽपराधस्य, तत्रोद्यतेन दृढसङ्कल्पबलादिना प्रयत्नवता **यतिजनेन** साधुलोकेन **नियमा**दवश्यंतया **प्रमाददुश्चरितं** विषयकषायादिप्रमाददोषाद् जातं दुश्चरितं दुरनुष्ठितं **प्रकाशयितव्यम्** आलोचयितव्यमिति ॥१०॥ अथ कथमालोचयितव्यमित्याह—

**जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ।**
**तं तह आलोइज्जा मायामयविप्पमुक्को य ॥११॥**

**अक्षरगमनिका**—यथा बालः कार्यमकार्यं च जल्पन् ऋजुकं भणति तथा तन्मायामदविप्रमुक्तश्चालो-चयेत् ॥११॥

**टीका**—**यथा** येन प्रकारेण मात्रादिकं प्रति **बालः** शिशुः **कार्यं** कृत्यम् **अकार्यं** निन्द्यकर्म **चः**

समुच्चये **जल्पन्** भाषमाणः **ऋजुकम्** अवक्रं **भणति** भाषते **तथा** तेन प्रकारेण यतिरपि **तद्** स्वकीयदुश्चरितं **मायामदविप्रमुक्तो** माया च निकृतिर्मदश्चावलेपः स च जात्यादिभेदादष्टधा मायामदौ ताभ्यां विप्रमुक्तो विरहित एव **चशब्दो**ऽवधारणे **आलोचयेत्** कथयेदिति ॥११॥ प्रसङ्गतोऽन्यमतं प्रदर्श्य तन्निराचिकीर्षुराह—

**पच्छित्तमयं करणा अन्ने सुद्धिं भणंति नाणस्स।**
**तं च न; जम्हा एयं ससल्लवणरोहणप्पायं॥१२॥**

**अक्षरगमिनका**—अन्ये च प्रायश्चित्तमात्रकरणाद् ज्ञानस्य शुद्धिं भणन्ति। तन्न, यस्मादेतत् सशल्यव्रणरोहणप्रायम् ॥१२॥

**टीका**—**अन्ये च** स्वव्यतिरिक्ता आचार्याश्च **प्रायश्चित्तमात्रकरणात्** केवलस्याऽऽलोचनारहितस्य प्रायश्चित्तस्य विधानाद् **ज्ञानस्य** बोधस्य कथञ्चिद्धर्मधर्मिणोरभेदाद् जीवस्य **शुद्धिं** शोधिं **भणन्ति** दिशन्ति। एतन्निराकरणायाह–यदुक्तमन्यैस्तन्न तन्नैव, **यस्मात्** कारणाद् **एतद्** आलोचनां विनैव प्रायश्चित्तमात्रकरणं **सशल्यव्रणरोहणप्रायः** सशल्यो दुष्टगर्भितो व्रणः क्षतं तस्य रोहणं रूढताऽऽपादनं तत्प्रायस्तेन तुल्यमहितमित्यर्थः अनन्तसंसारकारणत्वादिति ॥१२॥ एतदेव स्पष्टयति—

**अवराहा खलु सल्लं एयं मायाइभेयओ तिविहं।**
**सव्वं पि गुरुसमीवे उद्धरियव्वं पयत्तेण॥१३॥**

**अक्षरगमनिका**—अपराधाः खलु शल्यं मायादिभेदतस्त्रिविधमेतत् सर्वमपि प्रयत्नेन गुरुसमीप उद्धर्तव्यम् ॥१३॥

**टीका**—**अपराधाश्चा**रित्रमालिन्यापादका एव **खलु**शब्दोऽवधारणे चित्तं शलत इति **शल्यं** तोमर-कण्टकादय इव भावशल्यं **मायादिभेदतो** मायानिदानादिप्रकारत**स्त्रिविधं** त्रिप्रकारम्।**एतद्** भावशल्यं **सर्वमपि** निखिलमेव **प्रयत्नेन** प्रयासेन **गुरुसमीपे** आचार्यादिपार्श्वे **उद्धर्तव्यं** समूलमुन्मूलयितव्यमालोचनादाने- नेति ॥१३॥ अथानुद्धृतभावशल्यस्य विपाककटुतामावेदयन्नाह—

**न य तं सत्थं व विसं व दुप्पउत्तु व्व कुणइ वेयालो।**
**जंतं व दुप्पउत्तं सत्तु व्व पमाइओ कुद्धो॥१४॥**

**जं कुणइ भावसल्लं अणुद्धियं उत्तिमट्ठकालम्मि।**
**दुल्लहबोहीयत्तं अणंतसंसारियत्तं च॥१५॥**

**अक्षरगमनिका**—न च तं शस्त्रं वा विषं वा दुष्प्रयुक्तो वा वेतालो दुष्प्रयुक्तं वा यन्त्रं प्रमादितो वा क्रुद्धः शत्रुः करोति यमनुद्धृतं भावशल्यमुत्तमार्थकाले दुर्लभबोधिकत्वमनन्तसांसारिकत्वं च ॥१४-१५॥

**टीका**—**न च** नैव **तम**पायं करोतीति सम्बन्धः। **शस्त्रं वा** करवालादि, **विषं** वा हलाहलं, **दुष्प्रयुक्तो वा** दुःसाधितो वा **वेतालः** पिशाचः, **दुष्प्रयुक्तं वा** दुर्व्यापारितं वा **यन्त्रं** शतघ्न्यादि, **प्रमादितो** वाऽवहीलितो वा **क्रुद्धः** कुपितः **शत्रुः** रिपुः क्वचिद् ग्रन्थान्तरे 'सप्पो' त्ति पाठमाश्रित्याऽवगीतः क्रुद्धः सर्पः, **वाशब्दा** विकल्पार्थाः ॥१४॥ **यमपायं करोति** विधत्ते, **अनुद्धृतम्** अनिष्कासितं चारित्रकायाद् **भावशल्यम्** अनालोचितदुश्चरितम् **उत्तमार्थकाले** उत्तमार्थः सर्वोत्कृष्टप्रयोजनं पण्डितमरणमनशनादिविधानलक्षणं तस्य कालः अवसर उत्तमार्थकालस्तस्मिन्। शस्त्रादीनि ह्येकभविकमेव मरणं विदधति। एतच्चाऽनन्तजन्ममरण-

परम्पराम्। अत एवाह—**दुर्लभबोधित्वमसुलभजिनधर्मताम् अनन्तसांसारिकत्वं चानन्तभवभ्रमणं** करोति। भावशल्योद्धारे तु जीवः स्वल्पसंसारी स्याद् यत आलोचनापरिणामपरिणतो जीवः कदाचित् क्षीण आयुषि मृतः सन्नपि उत्कृष्टतस्त्रीन् भवान् कृत्वा प्राप्नोति निर्वाणम्। यदागम :—आलोयणा परिणओ सम्मं काऊण सुविहिओ कालं। उक्कोसं तिण्णि भवे गंतूण लहेइ निव्वाणं ॥१५॥ [illegible] किं कुर्वन्तीत्याह—

**तो उद्धरंति गारवरहिया मूलं पुणब्भवलयाणं।**
**मिच्छद्दंसणसल्लं मायासल्लं नियाणं च ॥१६॥**

**अक्षरगमनिका**—ततो गौरवरहिता उद्धरन्ति पुनर्भवलतानां मूलं मायाशल्यं निदानं मिथ्यादर्शनशल्यं च ॥१६॥

**टीका**—यतः शल्योद्धारेऽनुद्धारे चानन्तरोक्तगुणदोषास्ततस्तस्मात् कारणात् श्रमणा **गौरवरहिता** ऋद्ध्यादिगौरवविप्रमुक्ता **उद्धरन्ति** चारित्रदेहान्निष्कासयन्ति **पुनर्भवलतानां** पुनर्मुहुर्मुहुर्भवा जन्मानि त एव लतास्तासां **मूलम्** प्राथमिककारणं भावशल्यं तच्च त्रिविधम्, तथाहि—**मायाशल्यं** माययाऽऽलोचनतोऽनालोचनतश्च विहितं शल्यं दुश्चरितं तथा **निदानं** भीमो भीमसेन इति न्यायाद् निदानशल्यं नितरां दीयतेऽनेनेति निदानं धर्मस्य सांसारिकफलयाचनं तदेव शल्यम् उक्तस्वरूपं तथा **मिथ्यादर्शनशल्यं** मिथ्यादर्शनं श्रीजिनोक्तादन्यथा श्रद्दधानं तदेव शल्यं भगवत्यविश्वासाद् महत्याशातनेति। **च**ः समुच्चये। एतत्रिविधमपि भावशल्यं मायामदविप्रमुक्ताः श्रमणा उद्धरन्तीति ॥१६॥ अनुद्धृते शल्येऽत्रैव भवे यद्भवति तदाह—

**चरणपरिणामधम्मे दुच्चरियं अद्धिइं दढं कुणइ।**
**कह वि पमायावट्टिय जाव न आलोइयं गुरुणो ॥१७॥**

**अक्षरगमनिका**—चरणपरिणामधर्मे कथमपि प्रमादावर्तितं दुश्चरितं यावन्नालोचितं गुरोरधृतिं दृढां करोति ॥१७॥

**टीका**—**चरणपरिणामधर्मे** चरणं चारित्रं तस्य परिणामः परिणमनं स एव दुर्गतौ पतन्तं जन्तुं धारणाद् धर्मस्तस्मिन् **कथमपि** केनापि प्रकारेण **प्रमादावर्तितं** प्रमादेन, तथाहि—रागेण वा द्वेषेण वा मोहेन वा जानता वाऽजानता वाऽऽवर्तितं मुहुर्मुहुरासेवितं **दुश्चरितं** दुरनुष्ठितं **यावद**वधि **नालोचितं** न कथितं **गुरो**राचार्यादेस्तावद् **अधृतिम्** अधैर्यं **दृढां** निबिडां **करोति** विदधाति। जीवमत्यन्तमस्वस्थं करोतीत्यर्थः। तस्मात् सशल्येन क्षणमप्येकं न स्थातव्यमिति ॥१७॥ एतदेवाह—

**जं जाहे आवज्जइ दुच्चरियं तं तहेव जत्तेणं।**
**आलोएयव्वं खलु सम्मं सइयारमरणभया ॥१८॥**

**अक्षरगमनिका**—सातिचारमरणभयाद् यद्दुश्चरितं यदाऽऽपद्यते तत्तदैव यत्नेन खलु सम्यगालोचयितव्यम् ॥१८॥

**टीका**—**सातिचारमरणभयाद्** अनालोचितत्वाद् अतिचारेण सह सातिचारं च तन्मरणं सातिचारमरणं तस्मात्तस्य कटुविपाकाद्वा भयं भीतिस्तस्माद् **यद्दुश्चरितं** यद्दुरनुष्ठितं **यदा** यस्मिन् काले **आपद्यते** जायते तद्दुश्चरितं **तदैव** तस्मिन्नेव काले **यत्नेन** प्रयत्नेनैव **खलु**शब्दोऽवधारणे **सम्यग्** अवितथम् **आलोचयितव्यं** गुरोः

पार्श्वे प्रकाशयितव्यमिति ॥१८॥ ननु यदाऽपराध आपद्यते तदैवाऽऽलोच्यते तर्हि पक्षे चातुर्मास्येऽवश्यमालोचना दातव्येति यत् प्रागुक्तं तत् कथं सङ्गच्छेतेत्याशङ्क्याऽऽह—

**एवमवि य पक्खाई जायइ आलोयणाओ विसओ त्ति।**
**गुरुकज्जाणालोयणा भावाणाभोगओ चेव ॥१९॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—एवमपि भावाऽनाभोगत एव गुरुकार्याऽनालोचनात् पक्षादिर्जायत आलोचनाया विषय इति ॥१९॥

**टीका**—**एवमपि** अनन्तरोक्तनीत्या तत्कालमाऽऽलोचितेऽपि **भावाऽनाभोगत एव** परमार्थाऽनुपयोगेनैव **गुरुकार्याऽनालोचनाद्** गुरुकार्यं प्रथमप्रावृषि निरवशेषोपधिप्रक्षालनप्रभृतिकं तत्र व्यग्रत्वेन पौरुषीप्रतिलेखनादिविस्मृतेरनालोचनादेव **पक्षादिः** पक्षचातुर्मास्यसंवत्सररूपः अवसरो **जायते** भवति **आलोचनाया** स्वाऽपराधकथनस्य **विषयो** गोचरो गृहकचवरादिदृष्टान्तेन। आह च–

जह गेहं पतिदियहं पि सोहियं तह य पक्खसंधीसु।
सोहिज्जइ सविसेसं एवमिहयं पि नायव्वं ॥१॥

**इतिः** समाप्तौ ॥१९॥ उपसंहरन्निष्कर्षमाह—

**जं जारिसेण भावेण सेवियं किं पि इत्थ दुच्चरियं।**
**तं तत्तो अहिगेणं संवेगेणं तहाऽऽलोए ॥२०॥**

इति आलोचनाविंशिका पञ्चदशी ॥१५॥

**अक्षरगमनिका**—अत्र यत् किमपि दुश्चरितं यादृशेन भावेन सेवितं तत्ततोऽधिकेन संवेगेन तथाऽऽलोचयेत् ॥२०॥

**टीका**—**अत्र** चारित्रपरिणामधर्मे आलोचनाविषये वा **यत्किमपि** स्वल्पमपि **दुश्चरितं** दुरनुष्ठितं **यादृशेन** यत्प्रकारेण **भावेन** परिणामेन **सेवितं** चेष्टितं भवेत् **तद्** दुश्चरितं **ततो** दुश्चरितसेवनभावाद् **अधिकेना**ऽतिमात्रेण **संवेगेन** भवोद्वेगेन **तथा** तेन प्रकारेण **आलोचयेद्** गुरुसकाशे स्वापराधं प्रकाशयेद् यथा दुश्चरितपापं क्षयं यायात् तथा पूर्वबद्धमपि पश्चात्तापाग्निना भस्मसाद्भवेत् चन्दनबालामृगावतीप्रभृतीनां दृष्टान्तेनेति ॥२०॥

# षोडशी प्रायश्चित्तविंशिका

समाप्ता शल्योद्धरणलक्षणाऽऽलोचनाविंशिका। अथ व्रणलेपस्थानीयप्रायश्चित्तविंशिकाऽऽरभ्यते। तस्याश्चेयमाद्या गाथा—

**पच्छित्ताओ सुद्धी तहभावालोयणेण जं होइ।**
**इहरा ण पीढबंभाइओ सआ सुकडभावे वि॥१॥**

**अक्षरगमनिका**—यत्तथाभावाऽऽलोचनेन प्रायश्चित्ताद् भवति शुद्धिर्नेतरथा पीठब्राह्म्यादेः सदा सुकृतभावेऽपि॥१॥

**टीका**—**यत्** यस्मात् **तथाभावाऽऽलोचनेन** दुरितसेवनभावादधिकसंवेगाद् भावाऽऽलोचनेन पारमार्थिकरीत्या स्वाऽपराधकथनेन युक्तात् **प्रायश्चित्ताद्** वक्ष्यमाणलक्षणाद् **भवति** जायते **शुद्धिः** पापक्षयः, यत्तदोर्नित्यसम्बन्धात् तस्माद् **नेतरथा** नैवाऽन्यथा विना प्रायश्चित्तमित्यर्थः। अत्रार्थे दृष्टान्तमाह **पीठब्राह्म्यादेः** पीठमहापीठमहामुनयोर्ब्राह्मीसुन्दरीपूर्वभवजीवयोः **सदा** सर्वदा **सुकृतभावेऽपि** स्वाध्यायप्रभृतिशोभनानुष्ठान-सत्त्वेऽपि। श्रूयते हि ताभ्यां स्वाऽऽचार्यविषये जाताऽप्रीतेस्तथाप्रायश्चित्ताऽकरणात्तन्निमित्तबद्धस्त्रीवेदस्य सदा स्वाध्यायादिसुकृतभावेऽपि शुद्धिर्न जाता चरमभवेऽपि स्त्रीत्वाऽवाप्तेः। अयं भाव :—आलोचनापूर्वकमेव प्रायश्चित्तं शुद्धिकारणं यतो गुरुसकाशे स्वदोषकथनादेव शुद्धिर्जायते। स्वदोषकथने च स्वकीयहीनतालघुतास्थानभ्रंशभयमेव प्रतिबन्धकं जायते। तत्प्रतिबन्धकमपास्य यथास्थितं च आलोचयति तस्याऽध्यवसायशुद्धिर्यादृशी विशिष्य भवति तादृशी शुद्धिः प्रायः अन्यतपःस्वाध्यायाद्यनुष्ठानेषु न संभवति। किञ्च—गीतार्थस्याग्रे स्वदोषकथनमिति ह्यालोचनाहार्दम्। अत एव स्वदोषस्य प्रायश्चित्तं जानताऽपि गीतार्थेनाऽपरगीतार्थपार्श्वे आलोचना कार्येति जिनाज्ञा। भावालोचनां विना प्रायश्चित्तमात्रस्य करणेऽपि लक्ष्मणाऽऽर्याया भववृद्धिर्जाता। अत आलोचनापूर्वकं प्रायश्चित्तं कर्तव्यमिति॥१॥ नन्वनन्तरविंशिकायां यदुक्तं—यत्किञ्चिदपि दुश्चरितं यादृशेन भावेन सेवितं तत्ततोऽधिकेन संवेगेन तथाऽऽलोचयितव्यं यथा तद्दुरितक्षयः स्यात्तर्हि प्रायश्चित्तं किंफलमित्याशङ्क्याह—

**अहिगा तक्खयभावे पच्छित्तं किंफलं इहं होइ।**
**तदहिगकम्मक्खयभावओ तहा हंत मुक्खफलं॥२॥**

**अक्षरगमनिका**—अधिकात्तत्क्षयभावे प्रायश्चित्तमिह किंफलं भवति? तथा तदधिककर्मक्षयभावतो हन्त! मोक्षफलम्॥२॥

**टीका**—**अधिकात्** सर्वं वचनं सावधारणमिति दुश्चरितसेवनभावतोऽधिकादेव संवेगात् **तत्क्षयभावे** आलोचितदुश्चरितनाशे सति **प्रायश्चित्तं** वक्ष्यमाणस्वरूपं **किंफलं** किंप्रयोजनम् **इह** मौनीन्द्रप्रवचने शुद्धिप्रस्तावे वा **भवति** जायते? न किञ्चित्फलमित्याशङ्क्याह—**तथा** तेन प्रकारेणाऽऽलोचनापूर्वकस्य प्रायश्चित्तस्य करणेन **तदधिककर्मक्षयभावतो** दुश्चरितजन्यपापकर्मणः सकाशादधिकस्य पूर्वबद्धस्यापि कर्मणः क्षयभावतो नाशभवनाद् **हन्त!** आमन्त्रणे प्रायश्चित्तं **मोक्षफलं** निर्वाणसाधकं भवति तदुक्तं च—"एवं निकाइयाण वि कम्माणं भणियमेत्थ खवणं" (प्रायश्चित्तपञ्चाशक गा. ३५-पूर्वार्धम्)॥२॥

अथ प्रायश्चित्तस्वरूपमाह—

**पावं छिंदइ जम्हा पायच्छित्तं ति भण्णए तम्हा।**
**पाएण वा वि चित्तं सोहयई तेण पच्छित्तं ॥३॥**

**अक्षरगमनिका**—यस्मात् पापं छिनत्ति तस्मात् प्रायश्चित्तं भण्यते। प्रायेण वाऽपि चित्तं शोधयति तेन प्रायश्चित्तमिति ॥३॥

**टीका**—**यस्मात्** कारणात् **पापं** दुष्कृतं **छिनत्ति** कृन्तति **तस्मात्** कारणात् पापच्छित् तदेव प्राकृतत्वेन **प्रायच्छित्त**मिति **भण्यते** कथ्यते। **प्रायेण** बाहुल्येन **वाऽपि** विकल्पेऽथवा **चित्तं** पापमलिनं स्वान्तं **शोधयति** निर्मलयति **तेन** हेतुना **प्रायश्चित्त**मित्युच्यते ॥३॥ अनन्तरोक्तमेव हेतुपरस्सरमाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**संकेसणाइभेया चित्तअसुद्धीइ बज्झई पावं।**
**तिव्वं चित्तविवागं अवेइ तं चित्तसुद्धीओ ॥४॥**

**अक्षरगमनिका**—चित्ताऽशुद्ध्या संक्लेशनादिभेदात् चित्रविपाकं तीव्रं पापं बध्यते तच्चित्तशुद्धितः अपैति ॥४॥

**टीका**—**चित्ताऽशुद्ध्या** स्वान्तमालिन्येन **सङ्क्लेशनादिभेदात्** सङ्क्लेशनं श्रीजिनाज्ञाविराधनात्मक-रागाद्यशुभाऽध्यवसाय आदौ ययोरशुद्धवाक्कायव्यापारयोस्ते तथा तेषां भेदात् तारतम्ययोगाद् यत् **चित्रविपाकं** विविधनारकादिफललाभं **तीव्रं** निबिडानुभावं **पापम्** अशुभकर्म **बध्यते** क्षीरनीरन्यायेनाऽऽत्मसात्क्रियते **तत्** पापं प्रतिपक्षभावेन **चित्तशुद्धितः** श्रीजिनाज्ञानुरूपस्वान्तनैर्मल्याद**पैति** प्रणश्यति। एवं प्रायश्चित्तं चित्तशुद्ध्या पापं छिनत्तीति ॥४॥ अथ प्रायश्चित्तविधानमाह—

**किच्चे वि कम्मणि तहा जोगसमत्तीइ भणियमेयं ति।**
**आलोयणाइभेया दसविहमेयं जहा सुत्ते ॥५॥**

**अक्षरगमनिका**—कृत्येऽपि कर्मणि तथा योगसमाप्तौ भणितमेतदिति आलोचनादिभेदाद् दशविधमेतद् यथा सूत्रे ॥५॥

**टीका**—आस्तामकृत्ये **कृत्येऽपि** विहितेऽपि **कर्मणि** भिक्षाचर्याद्यनुष्ठाने सूक्ष्मातिचारशुद्ध्यर्थं **तथा** समुच्चये **योगसमाप्तौ** योगोद्वहनान्ते यदि वा श्रमणस्य सर्वोऽपि प्रतिक्रमणादिव्यापारो योग एवेति तस्याऽन्तेऽविधिदोषशोधनार्थं **भणितं** विहितम् **एतत्** प्रायश्चित्तम् **इति** हेतोर्विहितानुष्ठानाद् **आलोचनादिभेदाद्** आलोचनाप्रतिक्रमणप्रभृतिविभागाद् **दशविधं** दशप्रकारम् **एतत्** प्रायश्चित्तं **यथा** येन प्रकारेण **सूत्रे** श्रीजिनागमेऽस्ति तथा ज्ञेयमिति ॥५॥ अथाऽऽलोचनादिभेदानाह—

**आलोयणपडिकमणे मीस विवेगे तहा विउस्सग्गे।**
**तवछेयमूलअणवट्ठया व पारंचियं चेव ॥६॥**

**अक्षरगमनिका**—आलोचनं प्रतिक्रमणं मिश्रं विवेकस्तथा व्युत्सर्गस्तपश्छेदो मूलमनवस्थाप्यता च पाराञ्चिकमेव ॥६॥

**टीका**—**आलोचन**मालोचना गुरोः स्वचरितकथनम्। तथा प्राकृतत्वाल्लिङ्व्यत्यय इति प्रतीपं क्रमणं **प्रतिक्रमण**मतिचारान्निवृत्य संयमे गमनं मिथ्यादुष्कृतदानमित्यर्थः। तथा **मिश्रम्**आलोचनामिथ्या-

दुष्कृतरूपमुभयम्। तथा **विवेकस्त्यागः** अनेषणीयाशनादीनाम्। **तथा** समुच्चये **व्युत्सर्गः** कायोत्सर्गश्चेष्टा-निरोधकल्पः। तथा **तपः** प्रतीतं निर्विकृतिकादि। तथा **छेदस्तपसा** दुर्दमस्याऽहोरात्रपञ्चकादिक्रमेण व्रतपर्यायच्छेदनम्। तथा **मूलं** महाव्रतानां मूलतः पुनरारोपणम्। **तथाऽनवस्थाप्यता** व्रतेषु पुनरवस्थाप्यत इत्यवस्थाप्यो न तथाऽनवस्थाप्यस्तस्य भावः अनवस्थाप्यता दुष्टतरपरिणामस्याऽकृततपोविशेषस्य व्रतेष्वनारोपणम्। **चः** समुच्चये। तथा **पाराञ्चिकं** पारमन्तं प्रायश्चित्तानामपराधानां वाऽञ्चति गच्छतीति पाराञ्चि तदेव पाराञ्चिकमिति ॥६॥ अथाऽमीषां प्रत्येकं स्वरूपमाह—

**वसहीओ हत्थसया बाहिं कज्जे गयस्स विहिपुव्वं।**

**गमणाइगोयरा खलु भणिया आलोयणा गुरुणा ॥७॥**

**अक्षरगमनिका**—वसतेर्हस्तशताद्बहिर्विधिपूर्वं कार्ये गतस्य गमनादिगोचरा खलु भणिताऽऽलोचना गुरुणा ॥७॥

**टीका—वसतेः** प्रतिश्रयादेः **हस्तशताद्** हस्तशतप्रमाणभूमेरूर्ध्वं **बहिर्**बाह्यं **विधिपूर्वम्** आगमोक्तनीत्या **कार्ये** भिक्षाटनविहारभूमिगमनादिप्रयोजनमाश्रित्य **गतस्य** यातस्य **गमनादिगोचरा** यातायातादिविषयैव **खलु**शब्दोऽवधारणे **भणिता** विहिता **आलोचना** पूर्वोक्तस्वरूपैव प्रायश्चित्तं **गुरुणा** जगद्गुरुणा भगवता वर्धमानेनेति ॥७॥ अथ प्रतिक्रमणमाह—

**सहसं च्चिय अस्समियाइभावगमणे य चरणपरिणामा।**

**मिच्छादुक्कडदाणा तग्गमणं पुण पडिक्कमणं ॥८॥**

**अक्षरगमनिका**—चारित्रपरिणामात् सहसैवाऽसमितादिभावगमने मिथ्यादुष्कृतदानात् पुनस्तद्गमनं प्रतिक्रमणम् ॥८॥

**टीका—चारित्रपरिणामात्** समितिगुप्तिलक्षणसंयमभावाद् बहिः **सहसैवा**ऽतर्कित एव कासक्षुतादौ **असमितादिभावगमने** असमितः समितिषु प्रमत्त आदिपदादगुप्तो गुप्तिषु प्रमत्तस्तस्य भावस्तत्राऽसमितत्वादौ गमने याने पश्चात्तापेन **मिथ्यादुष्कृतदानाद्** मिथ्याऽलिकं मे दुष्कृतं पापं भूयादित्युच्चारणात् **तद्गमनं** पुनश्चारित्रपरिणामं प्रति गमनं क्रमणं **प्रतिक्रमणं** प्रायश्चित्तमिति ॥८॥

अथ मिश्रमाह—

**सद्दाइएसु ईसिं पि इत्थ रागाइभावओ होइ।**

**आलोयणा पडिक्कमणयं च एयं तु मीसं तु ॥९॥**

**अक्षरगमनिका**—अत्र शब्दादिकेषु ईषद्रागादिभावतोऽपि भवत्यालोचना प्रतिक्रमणं चैतत्तु मिश्रं तु ॥९॥

**टीका—अत्र** चारित्रपरिणामधर्मे प्रायश्चित्ताऽधिकारे वा **शब्दादिकेषु** शब्दरूपप्रभृतिषु मनोज्ञाऽ-मनोज्ञविषयेषु **ईषद्रागादिभावतोऽपि** आस्तां तीव्ररागद्वेषादिभावो मनोमात्रेण स्वल्परागद्वेषादिभावतोऽपि **भवति** आपद्यते **आलोचना** प्रायश्चित्तं **प्रतिक्रमणं** प्रायश्चित्तं च, **एतत्तु** उभयं पुन**र्मिश्र**मेव प्रायश्चित्तं **तु**शब्दो-ऽवधारणे ॥९॥ अथ विवेकमाह—

**असणाइगस्स पायं अणेसणीयस्स कह वि गहियस्स।**

**संवरणे संचाओ एस विवेगो उ नायव्वो ॥१०॥**

**अक्षरगमनिका**—कथमपि गृहीतस्याऽनेषणीयस्याऽशनादिकस्य संवरणे प्रायः सन्त्यागस्तु विवेको ज्ञातव्यः ॥१०॥

**टीका**—**कथमपि** अनाभोगादिना **गृहीतस्य** अवाप्तस्य **अनेषणीयस्य** अकल्प्यस्य **अशनादिकस्य** आहारोपध्यादेः **संवरणे** प्रायश्चित्तपदे **प्रायः** कादाचित्कभावस्य रागादिरहितत्वादुदर एव परिष्ठापनेन परिहाराद् बाहुल्येन **सन्त्यागः** सम्यक् पारिष्ठापनिकाविधिना त्यागः अतिसर्ग एव **तु** शब्दोऽवधारणे **एष** प्रस्तुतो **विवेको ज्ञातव्यो** बोद्धव्यः प्रायश्चित्तत्वेनेति ॥१०॥ अथ व्युत्सर्गमाह—

**कुसुमिणमाइएसुं विणाभिसंधीइ जो अईयारो।**
**तस्स विसुद्धिनिमित्तं काउस्सग्गो विउस्सग्गो ॥११॥**

**अक्षरगमनिका**—कुस्वप्रादिकेष्वभिसन्धेर्विना योऽतिचारस्तस्य विशुद्धिनिमित्तं कायोत्सर्गो व्युत्सर्गः ॥११॥

**टीका**—**कुस्वप्रादिकेषु** सावद्यादिकुत्सितस्वप्नेषु आदिपदाद् उच्चारप्रश्रवणाद्युत्सर्गस्य नावा नद्यादेरुत्तारादेश्च ग्रहणम्, तेषु **अभिसन्धिं** तथादुराशयं **विना** ऋते प्रमादादिना **यः अतिचारः** अपराधो जायते **तस्यातिचारस्य विशुद्धिनिमित्तं** परिमार्जनार्थं **कायोत्सर्ग**श्चेष्टानिरोधलक्षणः अनुष्ठानविशेषो **व्युत्सर्गः** प्रायश्चित्तमिति ॥११॥ अथ तप आह—

**पुढवाईणं संघट्टणाइभावेण तह पमायाओ।**
**अइयारसोहणट्ठा पणगाइतवो तवो होइ ॥१२॥**

**अक्षरगमनिका**—तथा प्रमादात् पृथिव्यादीनां सङ्घट्टनादिभावेनातिचारशोधनार्थं पञ्चकादितपस्तपो भवति ॥१२॥

**तथाप्रमादाद्** विकथादिप्रमादात् **पृथिव्यादीनां** पृथिव्यप्कायादीनां **सङ्घट्टनादिभावेन** सङ्घट्टपरितापादिभवनेन **अतिचारशोधनार्थं** अपराधशुद्ध्यर्थं **पञ्चकादितपो** निर्विकृतिकादिषण्मासावसानं **तपः** प्रायश्चित्तं **भवति** वर्तत इति ॥१२॥ अथ छेदमाह—

**तवसा उ दुद्दमस्सा पायं तह चरणमाणिणो चेव।**
**संकेसविसेसाओ छेओ पणगाइओ तत्थ ॥१३॥**

**अक्षरगमनिका**—तपसा तु दुर्दमस्य तथाचरणमानिनश्च प्रायः सङ्क्लेशविशेषात्तत्र पञ्चकादिकश्छेदः ॥१३॥

**टीका**—**तपसा**ऽनन्तरोक्ताऽहोरात्रपञ्चकादिषण्मासाऽवसानेन तपोरूपेण **तु**शब्दो विशेषार्थः, तपःसुकरत्वाद् **दुर्दमस्य** दुर्दान्तस्य **तथाचरणमानिनश्च** कृतापराधमप्यात्मानं सच्चारित्रमिति मन्यमानस्य **प्रायो** बाहुल्येन **सङ्क्लेशविशेषाद्** विशिष्टरागादिसङ्क्लिष्टाऽध्यवसायात् **तत्र** प्रायश्चित्तपदे **पञ्चकादिकः** अहोरात्रपञ्चकदशकादिकालमानः **छेद**श्चारित्रपर्यायच्छेदः अवमरात्निकत्वेन लघुताऽऽपादनं छेदाभिधानं प्रायश्चित्तमिति ॥१३॥ अथ मूलमाह—

**पाणवहाईमि पाओ भावेणासेवियम्मि सहसा वि।**
**आभोगेणं जइणो पुणो वयारोवणा मूलं ॥१४॥**

**अक्षरगमनिका**—प्रायो भावेनाऽऽभोगेन सहसापि आसेविते प्राणवधादौ यतेः पुनर्व्रतारोपणा मूलम् ॥१४॥

**टीका**—**प्रायो** बाहुल्येन **भावेन** वस्तुत **आभोगेन** जानताऽऽकुट्टितः सङ्कल्पेनेत्यर्थः, तथा **सहसापि** असमीक्षितकारितयाऽपि **आसेविते** विहिते **प्राणवधादौ** तत्तद्वतोरभेदोपचारात् प्राणिहिंसादौ आदिपदाद् मृषावादाऽदत्तमैथुनादिपरिग्रहः, चारित्रनाशाद् **यतेः** श्रमणस्य चाऽऽवृत्तचरणपरिणामस्य दोषपरिहारमाश्रित्य तदुत्तरकालं **पुनर्मुहुर्व्रतारोपणा** महाव्रतेषु न्यासो महाव्रतानां वाऽऽरोपणं **मूलं** मूलाभिधेयं प्रायश्चित्तमिति ॥१४॥ अथाऽनवस्थाप्यमाह—

**साहम्मिगाइतेणाइभावओ संकिलेसभेएण।**
**तक्खणमेव वयाण वि होइ अजोगो उ अणवट्ठा ॥१५॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—सङ्क्लेशभेदेन साधर्मिकादिस्तेनादिभावतस्तत्क्षणमेव व्रतानामपि भवत्ययोग्यस्त्वनवस्थाप्यः ॥१५॥

**टीका**—**सङ्क्लेशभेदेन** चारित्रविगमहेतुदुष्टाऽध्यवसायविशेषेण **साधर्मिकादिस्तेनभावतः** साधर्मिकाः साधुप्रभृतय आदिपदादन्यपाषण्डिका गृहस्थाश्च तेषां शिष्यशिशुसुवर्णादिरुत्कृष्टद्रव्यस्य स्तेनादिभावतः स्तेनस्य भावः स्तैन्यं चौर्यमादिपदाद् घोरपरिणामत आलनः परस्य वा मरणनिरपेक्षयष्टिमुष्ट्यादिप्रहारदानादिग्रहस्ततः**तत्क्षणमेव** तत्कालमेव **व्रतानामपि** पुनर्व्रतारोपणलक्षणमूलप्रायश्चित्तस्यापि **भवति** जायते **अयोग्यः** अनर्ह एव **तु**शब्दोऽवधारणे। न चाऽनासेविते तदवस्थोचिताऽऽगमोक्ततपसि स्थाप्यते यो महाव्रतेषु सोऽ**नवस्थाप्यः**। तदभेदोपचारात् प्रायश्चित्तमपि तथोच्यत इति ॥१५॥ अथ पाराञ्चिकमाह—

**पुरिसविसेसं पप्पा पावविसेसं च विसयभेएण।**
**पायच्छित्तस्संतं गच्छंतो होइ पारंची ॥१६॥**

**अक्षरगमनिका**—पुरुषविशेषं विषयभेदेन च पापविशेषं प्राप्य प्रायश्चित्तस्यान्तं गच्छन् भवति पाराञ्ची ॥१६॥

**टीका**—**पुरुषविशेषं** विशिष्टाऽऽचार्यस्थानीयं पुरुषद्रव्यं तथा **विषयभेदेन** पापगोचरविशेषेण **चः** समुच्चये **पापविशेषं** विशिष्टपापं **प्राप्या**ऽऽश्रित्य, तथाहि—पौनःपुन्येन परस्परं वेदविकारणं तथा पञ्चमनिद्रावशविवर्तनं तथा दुष्टं तच्च द्विविधं कषायतो विषयतश्च, तत्र स्वपक्षे कषायतो लिङ्गिघातः, विषयतस्तु लिङ्गिनीप्रतिषेवा, परपक्षे तु कषायतो राजवधो विषयतस्तु राजपत्नीसेवा तथा तीर्थकराद्याशातनाप्रभृतिविषयभेदेन पापविशेषमाश्रित्य **प्रायश्चित्तस्य** पूर्वोक्तस्वरूपस्य तपसा चतुर्थादिषण्मासपर्यन्तेन कालेन च षण्मासादिद्वादशवर्षावसानेन **अन्तं** पारं **गच्छन्** अञ्चन् **भवति** जायते **पाराञ्ची** प्रायश्चित्तपारगामी। तदभेदात् प्रायश्चित्तमपि पाराञ्चिकम्। एवम्भूतश्चासौ दीक्ष्यते नान्यथा। अत्र मतान्तरेण तु ये जीवा ऋषिघातका अर्हत्प्रतिमाविनाशकाः प्रवचनोपघातकारिणो लिङ्गिनीप्रतिषेवकाश्चैत्यद्रव्यविनाशकाश्च ते पाराञ्चिका उच्यन्ते वर्तमानभवे भवान्तरेषु च चरणाऽयोग्या हतबोधिलाभत्वात् च पायश्चित्ताऽगोचरा इत्यर्थः। यदागमः—संजइ चउत्थभंगो चेइयदव्वे य पवयणुड्डाहे। रिसिघायणे चउत्थे मूलग्गी बोहिलाभस्स ॥१॥१६॥

अथ प्रायश्चित्तफलमाह—

**एवं कुणमाणो खलु पावमलाभावओ निओगेण।**
**सुज्झइ साहू सम्मं चरणस्साराहणा तत्तो ॥१७॥**

**अक्षरगमनिका**—एवं कुर्वाणः खलु साधुः पापमलाभावतो नियोगेन शुध्यति। ततः सम्यक् चरणस्याऽऽराधना ॥१७॥

**टीका**—**एवम्** अनन्तरोक्तनीत्या प्रायश्चित्तेन दुश्चरितशुद्धिं **कुर्वाणो** विदधान एव **खलु**शब्दोऽवधारणे **साधुः** श्रमणः **पापमलाभावतः** अशुभमलक्षयाद् **नियोगेन** नियमेन **शुध्यति** निर्मलीभवति। **ततो** निर्मलीभवनात् **सम्यग्** अवितथं **चरणस्य** चारित्रस्य **आराधना** साधना भवतीति शेषः ॥१७॥

चरणाराधनाफलप्रदर्शनपुरस्सरमुपदिशन्नाह—

**अविराहियचरणस्स य अणुबंधो सुंदरो उ हवइ त्ति।**
**अप्पो य भवो पायं ता इत्थं होइ जइयव्वं ॥१८॥**

**अक्षरगमनिका**—अविराधितचरणस्य चाऽनुबन्धः सुन्दरस्तु भवतीति प्रायः अल्पश्च भवस्तस्मादत्र भवति यतितव्यम् ॥१८॥

**टीका**—**अविराधितचरणस्य चा**ऽक्षतचारित्रस्यैव, **अनुबन्धः** प्रकृतस्याऽनिवर्तनरूपो भवान्तरे च चारित्रधर्मप्राप्तिलक्षणः संस्कारविशेषः **सुन्दरः** शोभन एव **तु**शब्दोऽवधारणे **भवति** जायते **इति** हेतोः**प्रायो** बाहुल्येन **अल्पः** स्तोक एव **चो**ऽवधारणे **भवो** जन्मादिसंसार उत्कृष्टतः सत्ताऽष्टौ वा भवा इति। **तस्मात्** कारणाद् **अत्र** प्रायश्चित्तलक्षणे प्रधानतपसि **भवति** युज्यते **यतितव्यम्** उद्यन्तव्यमिति ॥१८॥ एतदेव दृष्टान्तपुरस्सरमाह—

**किरियाए अपच्चारे जत्तवओ णावगारगा जह य।**
**पच्छित्तवओ सम्मं तह पव्वजाए अइयारे ॥१९॥**

**अक्षरगमनिका**—यथा च क्रियायां यत्नवतः अपथ्यानि तथा प्रव्रज्यायां सम्यक् प्रायश्चित्तवतः अतिचारा नाऽपकारकाः ॥१९॥

**टीका**—**यथा च** यद्वच्च **क्रियायां** रोगप्रतिक्रियायां चिकित्सायामित्यर्थः **यत्नवतः** प्रयत्नवतः **अपथ्यानि** स्वास्थ्यहानिकराणि द्रव्याणि नाऽपकारकाणि भवन्ति **तथा** तद्वत् **प्रव्रज्यायां** चारित्रधर्मे **प्रायश्चित्तवतः** पापनिष्कृतिवतः **अतिचाराः** चारित्रमालिन्यापादका अपराधाः प्रायश्चित्तेन शोधनाद् **न** नैव **अपकारका** अनिष्टकारिणो भवन्तीति शेषः। तदुक्तं च–सव्वावि पवज्ञा पायच्छित्तं भतरकडाणं पावाणं कम्माणं ॥१९॥

उपसंहरन्नाह—

**एवं भावनिरुज्झो जोगसुहं उत्तमं इहं लहइ।**
**परलोगे य नरामरसिवसुक्खं तत्फलं चेव ॥२०॥**

इति प्रायश्चित्तविंशिका षोडशी ॥१६॥

**अक्षरगमनिका**—एवं भावनिरुज इहोत्तमं योगसुखं परलोके च तत्फलं नरामरशिवसौख्यमेव लभते ॥२०॥

**टीका**—**एवम्** अनन्तरोक्तनीत्या प्रायश्चित्तविधौ यत्नवान् **भावनिरुजो** भावारोग्यवान् **इह** अत्र जन्मनि **उत्तमं** श्रेष्ठं **योगसुखं** प्रशमसुखं शारदपूर्णिमाचन्द्रचन्द्रिकोज्ज्वलयशःप्रभृतिकं च लभते, तदुक्तं च—किञ्चान्ययोगतः स्थैर्यं, धैर्यं श्रद्धा च जायते। मैत्री जनप्रियत्वं च, प्रातिभं तत्त्वभासनम् ॥१॥ विनिवृत्ताग्रहत्वं च, तथा द्वन्द्वसहिष्णुता। तदभावश्च लाभश्च बाह्यानां कालसङ्गतः ॥२॥ धृतिः क्षमा सदाचारो, योगवृद्धिः शुभोदया। आदेयता गुरुत्वं च शमसौख्यमनुत्तरम् ॥३॥ योगबिन्दुश्लोकाः ५२-५३-५४। **परलोके** प्रेत्य च **तत्फलं** प्रायश्चित्तफलं योगफलं वा **नरामरशिवसौख्यमेव** मनुजसुरमुक्तिसुखमेव **लभते** प्राप्नोतीति ॥२०॥

# सप्तदशी योगविधानविंशिका

अनन्तरविंशिकायां भावनिरुज उत्तमं योगसुखमिह लभत इति यदुक्तं तदत्र विंशिकायां योगविधानमाह—

**मुक्खेण जोयणाओ जोगो सव्वो वि धम्मवावारो।**
**परिसुद्धो विन्नेओ ठाणाइगओ विसेसओ ॥१॥**

**अक्षरगमनिका**—मोक्षेण योजनात् सर्वोऽपि परिशुद्धो धर्मव्यापारो योगो विज्ञेयो विशेषेण स्थानादिगतः ॥१॥

**टीका**—अस्याश्च विंशिकाया न्यायाचार्यकृतविशदव्याख्या विद्यते तथापि स्थानाऽशून्यार्थं तामनुसृत्यैव किञ्चिल्लिख्यते—

**मोक्षेण** कृत्स्नकर्मक्षयादाऽऽत्मनः परमानन्देन सह **योजनाद्** घटनाद् हेतोः **सर्वोऽपि** निरवशेषोऽपि **परिशुद्धः** प्रणिधानादिशुभाशयात् पावनो **धर्मव्यापार** आवश्यकस्वाध्यायप्रतिलेखनभिक्षाटनादिलक्षणो मोक्षकारणीभूताऽऽत्मव्यापारत्वाद् निश्चयेन **योगो** सम्यग्ज्ञानादिलक्षणो **विज्ञेयो** बोद्धव्यस्तथाऽपि आत्मनः प्रदेशस्थिरत्वलक्षणपरगुणसिद्ध्यर्थं **विशेषेण** योगशास्त्रकृतव्यवहारप्राधान्येन **स्थानादिगतो** वक्ष्यमाणलक्षणस्थान-वर्णार्थाऽऽलम्बनादिविषयको धर्मव्यापारो योगपदप्रवृत्तेर्योगो विज्ञेयः। अथ के ते प्रणिधानादयः शुभाशयाः? उच्यते–प्रणिधानं प्रवृत्तिर्विघ्नजयः सिद्धिर्विनियोगश्चेति पञ्च। आह च षोडशकप्रकरणे प्रणिधिप्रवृत्ति-विघ्नजयसिद्धिविनियोगभेदतः प्रायः। धर्मज्ञैराख्यातः शुभाशयः पञ्चधाऽत्र विधौ ॥३-६॥ अत्र विधौ योगविधावित्यर्थः। आशयभेदा एते सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः। भावोऽयमनेन विना चेष्टा द्रव्यक्रिया तुच्छा ॥३-१२॥१॥ अथ के ते स्थानादयः? कतिभेदं च तत्र योगत्वम्? इत्याह—

**ठाणुन्नत्थालंबणरहिओ तंतम्मि पंचहा एसो।**
**दुगमित्थ कम्मओगो तहा तियं नाणजोगो उ ॥२॥**

**अक्षरगमनिका**—स्थानोर्णार्थालम्बनरहित एष पञ्चधा तन्त्रे। अत्र द्वयं कर्मयोगस्तथा त्रयं ज्ञानयोगस्तु ॥२॥

**टीका**—स्थीयतेऽनेनेति **स्थानं** पद्मासनादि।**ऊर्णः** शब्दः स च क्रियादावुच्चार्यमाणसूत्रवर्णलक्षणः। **अर्थस्तु** सूत्राभिधेयव्यवसायः। **आलम्बनं** बाह्यप्रतिमादिविषयध्यानम्। **रहितो** रूपिद्रव्यालम्बनविनिर्मुक्तो निरालम्बनो निर्विकल्पचिन्मात्रसमाधिरूपः। **सर्वः एष योगः पञ्चधा** पञ्चप्रकारः **तन्त्रे** योगप्रधानशास्त्रे प्रतिपादित इति शेषः। **अत्र** योगविधौ **द्वयं** स्थानोर्णलक्षणं स्थानस्य साक्षाद् उर्णस्य चोच्चारणांशे क्रियारूपत्वात् **कर्मयोगः, तथा** प्रकारान्तरे **त्रयम्** अर्थाऽऽलम्बननिरालम्बनलक्षणम् अर्थादीनां साक्षाद् ज्ञानस्वरूपत्वाद् **ज्ञानयोग** एव **तु**रवधारणे ॥२॥ एष कर्मयोगो ज्ञानयोगो वा कस्य भवतीत्याह—

**देसे सव्वे य तहा नियमेणेसो चरित्तिणो होइ।**
**इयरस्स बीयमित्त इत्तो च्चिय केइ इच्छंति ॥३॥**

**अक्षरगमनिका**—देशस्तथा सर्वतश्च चारित्रिण एष नियमेन भवति। इत एवेतरस्य केचिदिच्छन्ति बीजमात्रम् ॥३॥

**टीका**—प्राकृतत्वेन विभक्तिव्यत्ययाद् **देशतः सर्वतश्च चारित्रिणः** संयमवत एव **एष** स्थानादिरूपो योगो **नियमेन** निश्चयेन **भवति** जायते। **इत एव** देशसर्वचारित्रं विना योगसम्भवाऽभावादेव **इतरस्य** देशविरत्यादिगुणहीनस्याऽपुनर्बन्धकादेः **केचिद्** व्यवहारप्रधाना आचार्या **बीजमात्रं** योगबीजमात्रम् **इच्छन्ति** वाञ्छन्ति। एतेन सकृद्बन्धकादीनां तु निश्चयतो व्यवहारतश्च योगाभावः अवसेयः। ग्रन्थकृतैवोक्तं योगबिन्दौ–सकृदावर्तनादीनामतात्त्विक उदाहृतः। प्रत्यपायफलप्रायस्तथा वेषादिमात्रतः ॥३७०॥३॥

अथ स्थानादीनामेव प्रतिभेदानाह—

**इक्किक्को य चउद्धा इत्थं पुण तत्तओ मुणेयव्वो।**
**इच्छापवित्तिथिरसिद्धिभेयओ समयनीईए ॥४॥**

**अक्षरगमनिका**—अत्र पुनरेकैकश्च चतुर्धा तत्त्वतः समयनीत्येच्छाप्रवृत्तिस्थिरसिद्धिभेदतो मुणितव्यः ॥४॥

**टीका**—**अत्र** स्थानादौ **पुनः** कर्मयोगज्ञानयोगाऽपेक्षया भूय **एकैकश्च** प्रत्येकं **चतुर्धा** चतुष्प्रकारः **तत्त्वतः** परमार्थतः **समयनीत्या** योगशास्त्रविहितक्रमेण **इच्छाप्रवृत्तिस्थिरसिद्धिभेदतो** वक्ष्यमाणस्वरूपानिच्छा-प्रवृतिस्थिरसिद्धिभेदानाश्रित्य **मुणितव्यो** ज्ञातव्य इति ॥४॥ अथेच्छादीनां स्वरूपमाह—

**तज्जुत्तकहापीईइ संगयाविपरिणामि इच्छा।**
**सव्वत्थुवसमसारं तप्पालणमो पवत्ती उ ॥५॥**
**तह चेव एयबाहगचिंतारहियं थिरत्तणं नेयं॥**
**सव्वं परत्थसाहगरूवं पुण होइ सिद्धि त्ति ॥६॥**

**अक्षरगमनिका**—तद्युक्तकथाप्रीत्या सङ्गता विपरिणामिनीच्छा। सर्वत्रोपशमसारं तत्पालनं तु प्रवृत्तिः ॥५॥ तथैवैतद्बाधकचिन्तारहितं स्थिरत्वं ज्ञेयम्। सर्वं परार्थसाधकरूपं पुनः सिद्धिर्भवति ॥६॥

**टीका**—**तद्युक्तकथाप्रीत्या** तद्युक्तानां स्थानादियोगवतां कथायां वार्तायां प्रीतिः पदार्थबोध-जनितहर्षलक्षणा तया **सङ्गता** सहिता **विपरिणामिनी** विचित्रं बहुमानादिगर्भं परिणाममादधाना **इच्छा** स्थानादियोग-चिकीर्षारूपमिति। अथ प्रवृत्तिस्वरूपमाह—**सर्वत्र** सर्वावस्थायाम् **उपशमसारम्** उपशमप्रधानं **तत्पालनं**

स्थानादियोगपालनमेव ओ प्राकृतत्वादलाक्षणिकः **तुरवधारणे** **प्रवृत्तिः** स्थानादिप्रवृत्तिस्वरूपमित्यर्थः ॥५॥ **तथैव** प्रवृत्तिवदेव सर्वत्रोपशमसारम् **एतद्बाधकचिन्तारहितम्** शुद्धिविशेषेण बाधकचिन्ताऽनुत्थानाद् निरतिचारं पालनं **स्थिरत्वं ज्ञेयं** बोद्धव्यम्। इदं त्वत्र ध्येयम्-प्रवृत्तिरूपं स्थानादियोगविधानं सातिचारत्वाद् बाधकचिन्तासहितं तदपेक्षया स्थिरत्वं तु तद्रहितमेव भवतीति। अथ सिद्धिमाह—**सर्वं** स्थानादि स्वस्मिन्नुपशमविशेषादिफलजननद्वारा **परार्थसाधकरूपं** स्वसान्निध्यस्थानां स्थानादियोगशुद्धभावववतामपि तत्सिद्धिविधानद्वारा परगतस्वसदृश-फलसम्पादकं **पुनः** सिद्धिर्भवति। अत एव सिद्धाऽहिंसादीनां योगिनां सान्निध्ये हिंसादिपापशीला अपि हिंसादिपापं कर्तुं नालम्। **इतिः** समाप्तौ ॥६॥ अथेच्छादीनां हेतूनाह—

**एए य चित्तरूवा तहक्खओवसमजोगओ हुंति।**

मार्गदर्शक :– आचार्य श्री सुविधिसागर जी महाराज

**तस्स उ सद्धापीयाइजोगओ भव्वसत्ताणं॥७॥**

**अक्षरगमनिका**—एते च चित्ररूपास्तस्य तु श्रद्धाप्रीत्यादियोगतो भव्यसत्त्वानां तथाक्षयोपशमयोगतो भवन्ति॥७॥

**टीका**—**एते च** इच्छादयः **चित्ररूपाः** तारतम्ययोगतः स्वस्थानेऽप्यसङ्ख्येयभेदभाजो भवन्तीति सम्बन्धः। अत्र हेतुमाह—**तस्य** स्थानादियोगस्यैव **तुरवधारणे** **श्रद्धाप्रीत्यादियोगतः** श्रद्धा इदमित्थमेवेति प्रतिपत्तिः, प्रीतिस्तत्करणादौ हर्षः, आदिपदाद् धृतिधारणादिग्रहस्तद्योगाद् **भव्यसत्त्वानां** मुक्तिगमन-योग्याऽपुनर्बन्धकादिजीवानां **तथाक्षयोपशमयोगतः** तत्तत्कार्यजननानुकूलविचित्रक्षयोपशमसम्पत्त्या इच्छादी-नामसङ्ख्येयभेदा **भवन्ति** जायन्ते। इच्छायोगादिविशेषे प्रणिधानप्रवृत्त्याद्याशयभेदाभिव्यङ्ग्यः क्षयोपशमभेदो हेतुरित्यर्थः। अत एव यस्य यावन्मात्रः क्षयोपशमस्तस्य तावन्मात्रेच्छादिसम्पत्त्या मार्गे प्रवर्तमानस्य सूक्ष्मबोधाऽभावेऽपि मार्गानुसारिता न व्याहन्यत इति सम्प्रदायः॥७॥ अथेच्छादीनां कार्यभेदमाह—

**अणुकंपा निव्वेओ संवेगो होइ तह य पसमु त्ति।**
**एएसिं अणुभावा इच्छाईणं जहासंखं॥८॥**

**अक्षरगमनिका**—अनुकम्पा निर्वेदः संवेगस्तथा प्रशमश्चेत्येषामिच्छादीनां यथासङ्ख्यमनुभावा भवन्ति॥८॥

**टीका**—**अनुकम्पा** दुःखिदुःखच्छेदनेच्छा, **निर्वेदो** नैर्गुण्यपरिज्ञानाद् भवचारकादुद्वेगः, **संवेगो** मोक्ष-तीव्राभिलाषः, **तथा** प्रकारान्तरे, **प्रशम**स्तथाविधकषायोपशमः। **चः** समुच्चये। **इति** एवमनन्तरोक्ता इमेऽनुकम्पादय **एतेषां** प्रस्तुतानाम् **इच्छादीनाम्** इच्छादियोगानां **यथासङ्ख्यं** क्रमशः अनु पश्चाद् भवन्तीति भावा **अनुभावाः** कार्याणि **भवन्ति** जायन्ते। यद्यपि सम्यक्त्वस्यैवैते कार्यभूतानि लिङ्गानि प्रवचने प्रसिद्धानि, तथापि योगानुभवसिद्धानां विशिष्टानामेतेषामिहेच्छायोगादिकार्यत्वमभिधीयमानं न विरुध्यत इति द्रष्टव्यम्। वस्तुतः केवलसम्यक्त्वलाभेऽपि व्यवहारेणेच्छादियोगप्रवृत्तेरेवानुकम्पादिभावसिद्धेः। अनुकम्पादिसामान्ये इच्छायोगादिसामान्यस्य तद्विशेषे च तद्विशेषस्य हेतुत्वमित्येव न्यायसिद्धम्। अत एव शमसंवेग-निर्वेदाऽनुकम्पाऽऽस्तिक्यगुणानां पश्चानुपूर्व्येव लाभक्रमः, प्राधान्याच्चेत्यमुपन्यास इत्यत्रैव ग्रन्थे सद्धर्मविंशिकायां प्रतिपादितम्॥८॥ तदेवमिच्छादिहेतुभेदेनानुकम्पाद्यनुभावभेदेन च स्थानादिभेदविवेचनं कृतम्। तथा च स्थानादावेकैकस्मिन्निच्छादिभेदचतुष्टयसमावेशादेतद्विषया अशीतिर्भेदाः संपन्नाः एतन्निवेदनपुरस्सरमिच्छादि-भेदभिन्नानां स्थानादीनां सामान्येन योजनां शिक्षयन्नाह—

**एवं ठियम्मि तत्ते नाएण उ जोयणा इमा पयडा।**
**चिइवंदणेण णेया नवरं तत्तन्नुणा सम्मं ॥९॥**

**अक्षरगमनिका**—एवं तत्त्वे स्थिते ज्ञातेन तु चैत्यवन्दनेनेयं प्रकटा योजना केवलं तत्त्वज्ञेन सम्यग् ज्ञेया ॥९॥

**टीका**—**एवम्** अनन्तरोक्तनीत्याऽशीतिभेदो योगः, सामान्यतस्तु पञ्चभेद इति **तत्त्वे** योगतत्त्वे **स्थिते** व्यवस्थिते सति **ज्ञातेन तु** दृष्टान्तेनैव **चैत्यवन्दनेन** प्रतीतेन **इयम्** अनन्तरोक्ता **प्रकटा** योगक्रियाऽभ्यासिजनप्रत्यक्षा **योजना** प्रतिनियतविषयव्यवस्थापना **नवरं** प्राकृतत्वात् केवलं **तत्त्वज्ञेन** योगविषयकनिष्णातेन **सम्यग्** अवितथं **ज्ञेया** बोद्धव्येति ॥९॥ योजनामेवाह—

**अरहंतचेइयाणं करेमि उस्सग्ग एवमाईयं।**
**सद्धाजुत्तस्स तहा होइ जहत्थं पयन्नाणं ॥१०॥**

**अक्षरगमनिका**—'अरिहंत चेइयाणं करेमि काउस्सग्गं' एवमादि श्रद्धायुक्तस्य तथा यथार्थं पदज्ञानं भवति ॥१०॥

**टीका**—"अरिहंत" इत्यादि "अरिहंत चेइयाणं करेमि काउस्सग्गं" एवमादिचैत्यवन्दनविषयकं **श्रद्धायुक्तस्य** अनुष्ठानास्थावतः, **तथा** तेन प्रकारेणोच्चार्यमाणस्वरसम्पन्मात्रादिशुद्धस्फुटवर्णानुपूर्वीलक्षणेन **यथार्थं** भ्रान्तिरहितं **पदज्ञानम्** उच्चार्यमाणपदबोधो **भवति** जायते, परिशुद्धपदोच्चारे दोषाभावे सति परिशुद्धपदज्ञानस्य श्रावणसामग्रीमात्राऽऽधीनत्वादिति भावः ॥१०॥ एतदेव विशेषेणाह—

**एयं चत्थालंबणजोगवओ पायमविवरीयं तु।**
**इयरेसिं ठाणाइसु जत्तपराणं परं सेयं ॥११॥**

**अक्षरगमनिका**—एतच्चार्थाऽऽलम्बनयोगवतः प्रायः अविपरीतं तु। इतरेषां स्थानादिषु यत्नपराणां परं श्रेयः ॥११॥

**टीका**—**एतच्च** पदज्ञानम् **अर्थालम्बनयोगवतः** अर्थः उपदेशपदप्रसिद्धपदवाक्यमहावाक्यैदम्पर्यार्थ-परिशुद्धज्ञानम् आलम्बनं च प्रथमे दण्डकेऽधिकृततीर्थकृद्, द्वितीये सर्वे तीर्थकृतः, तृतीये प्रवचनम्, चतुर्थे सम्यग्दृष्टिः शासनाधिष्ठायक इत्यादि, तद्योगवतः तत्प्रणिधानवतः **प्रायो** बाहुल्येन **अविपरीतं तु** अभीप्सितपरमफलसम्पादकमेव भवति, अर्थालम्बनयोगयोर्ज्ञानयोगतयोपयोगरूपत्वात्। तत्सहितस्य चैत्यवन्दनस्य भावचैत्यवन्दनत्वसिद्धेः, भावचैत्यवन्दनस्य चामृतानुष्ठानत्वेनावश्यं निर्वाणफलत्वादिति भावः। प्रायोग्रहणं च सापाययोगवद्व्यावृत्त्यर्थम्। **इतरेषाम्** अर्थालम्बनयोगाभाववतां **स्थानादिषु** प्राकृतत्वात् स्थानवर्णयोश्च **यत्नपराणां** प्रयत्नवतामर्थालम्बनयोश्च तीव्राभिलाषवतां **परं** केवलं **श्रेयः** कल्याणम्। अर्थालम्बनयोगाभावे वाचनायां पृच्छनायां परावर्तनायां वा तत्पदपरिज्ञानस्यानुप्रेक्षाऽसंवलितत्वेन "अनुपयोगो द्रव्यम्" इति कृत्वा द्रव्यचैत्यवन्दनरूपत्वेऽपि स्थानोर्णयोगयत्नातिशयादर्थालम्बनस्पृहालुतया च तद्धेत्वनुष्ठानरूपतया भावचैत्यवन्दनद्वारा परम्परया स्वफलसाधकत्वादिति भावः ॥११॥ स्थानादियत्नाभावे च तच्चैत्यवन्दनानुष्ठानमप्रधानद्रव्यरूपतामास्कन्दन्निष्फलं वा स्यादिति लेशतोऽपि स्थानादियोगाभाववन्तो नैतत्प्रदानयोग्या इत्युपदिशन्नाह—

**इहरा उ कायवासियपायं अहवा महामुसावाओ।**
**ता अणुरूवाणं चिय कायव्वो एयविन्नासो॥१२॥**

**अक्षरगमनिका**—इतरथा तु कायवासितप्रायमथवा महामृषावादस्ततः अनुरूपाणामेव कर्तव्य एतद्विन्यासः॥१२॥

**टीका**—**इतरथा तु** अर्थालम्बनयोगाभाववतां स्थानादियत्नाभावे तु तच्चैत्यवन्दनानुष्ठानं **कायवासितप्रायं** सम्मूर्च्छनजप्रवृत्तितुल्यकायचेष्टिततुल्यं मानसोपयोगशून्यत्वात्, उपलक्षणाद् वाग्वासितप्रायमपि द्रष्टव्यम्। तथा चाननुष्ठानरूपत्वान्निष्फलमेतदिति भावः। **अथवा** दोषान्तरे तच्चैत्यवन्दनं **महामृषावादो** महानृतभाषणम् "ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि" इति प्रतिज्ञायां स्थानादिभङ्गे महामृषावादस्य स्फुटत्वात्। स्वयं विधिविपर्ययप्रवृत्तौ परेषामेतदनुष्ठाने मिथ्यात्वबुद्धिजननद्वारा तस्य लौकिकमृषावादादतिगुरुत्वाच्च, तथा च विपरीतफलं तेषामेतदनुष्ठानं सम्पन्नम्।

येऽपि स्थानादिशुद्धमप्यैहिककीर्त्यादीच्छयाऽऽमुष्मिकस्वर्लोकादिविभूतीच्छया वैतदनुष्ठानं कुर्वन्ति, तेषामपि "बोहिलाभवत्तिआए निरुवसग्गवत्तियाए" इति मोक्षार्थकप्रतिज्ञया विहितमेतद्विपरीतार्थतया क्रियमाणं विषगरानुष्ठानान्तर्भूतत्वेन महामृषावादानुबन्धित्वाद् विपरीतफलमेव। **ततः** तस्माद् **अनुरूपाणामेव** योग्यानामेव **एतद्विन्यासः** चैत्यवन्दनसूत्रप्रदानरूपः **कर्तव्यो** विधातव्य इति॥१२॥ के एतद्विन्यासानुरूपा इत्याकाङ्क्षायामाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**जे देसविरइजुत्ता जम्हा इह वोसिरामि कायं ति।**
**सुव्वइ विरईए इमं ता सव्वं चिंतियव्वमिणं॥१३॥**

**अक्षरगमनिका**—ये देशविरतियुक्ता यस्मादिह व्युत्सृजामि कायमिति श्रूयते इदं च विरतौ, ततः सम्यक् चिन्तितव्यमिदम्॥१३॥

**टीका**—**ये देशविरतियुक्ताः** पञ्चमगुणस्थानकपरिणामवन्तस्ते इहाऽनुरूपा इति शेषः, **यस्मात्** कारणाद् **इह** चैत्यवन्दनसूत्रे **व्युत्सृजामि कायम् इति** एवं **श्रूयते** निशम्यते। **इदं च** कायव्युत्सृजनं **विरतौ** चारित्रे देशतः सर्वतो वा सत्यां सम्भवति, तदभावे कायव्युत्सर्गाऽसम्भवात्, तस्य गुप्तिरूपविरतिभेदत्वात्। **ततः** तस्मात् **सम्यग्** आगमाऽवैपरीत्येन **चिन्तितव्यं** परिभावनीयम् **इदं** यदुत "कायं व्युत्सृजामि" इति प्रतिज्ञाऽन्यथाऽनुपपत्त्या देशविरतिपरिणामयुक्ता एव चैत्यवन्दनाऽनुष्ठानेऽधिकारिणः। तेषामेवाऽऽगम-परतन्त्रतया विधियत्नसंभवेनामृतानुष्ठानसिद्धेरिति।

एतच्च मध्यमाऽधिकारिग्रहणं तुलादण्डन्यायेनाऽऽद्यन्तलक्षणानां सर्वविरतिनामविरतसम्यग्दृशां च ग्रहणं द्रष्टव्यम्। तेन परमामृतानुष्ठानपराः सर्वविरतास्तत्त्वत एव। तद्धेत्वनुष्ठानपराः अपुनर्बन्धका अपि च व्यवहारादिहाधिकारिणो गृह्यन्ते। कुग्रहविरहसम्पादनेनाऽपुनर्बन्धकानामपि चैत्यवन्दनानुष्ठानस्य फलसम्पादकतायाः पञ्चाशकादिप्रसिद्धत्वादित्यवधेयम्।

ये त्वपुनर्बन्धकादिभावमप्यस्पृशन्तो विधिबहुमानादिरहिता गतानुगतिकतयैव चैत्यवन्दनाद्यनुष्ठानं कुर्वन्ति ते सर्वथाऽयोग्या एवेति व्यवस्थितम्॥१३॥ नन्वविधिनाऽपि चैत्यवन्दनाद्यनुष्ठाने सति तीर्थप्रवृत्तिर-व्यवच्छिन्ना स्यात्, विधिरेवाऽन्वेषणे तु द्वित्राणामेव विधिपराणां लाभात् क्रमेण तीर्थोच्छेदः स्यादिति तदनुच्छेदायाऽविध्यनुष्ठानमप्यादरणीयमित्याऽऽशङ्कायामाह—

**तित्थस्सुच्छेयाई वि नालंबणमित्थ जं स एमेव।**
**सुत्तकिरियाइ नासो एसो असमंजसविहाणो ॥१४॥**

**अक्षरगमिनका**—अत्र तीर्थोच्छेदाद्यपि नालम्बनं यदेवमेवाऽसमञ्जसविधानात् सूत्रक्रियानाशः स एषः ॥१४॥

**टीका**—**अत्र** अविध्यनुष्ठाने **तीर्थोच्छेदाद्यपि** तीर्थो मोक्षमार्गस्तदनुष्ठायी वा सङ्घस्तस्योच्छेदो विनाशः, आदिपदात् तीर्थाभासग्रहणं **नालम्बनं** तीर्थानुच्छेदायाविध्यनुष्ठानमपि कर्तव्यमिति नालम्बनीयम्। **यद्** यस्माद् **एवमेव** अविध्यनुष्ठाने क्रियमाण एव **असमञ्जसविधानाद्** विहितान्यथाकरणादशुद्धपारम्पर्यप्रवृत्त्या **सूत्रक्रियाया नाश** आगमोक्तानुष्ठानस्योच्छेदः। **स** सूत्रक्रियाया नाश एव **एष** तीर्थोच्छेदः। आगमविहितयथोचितानुष्ठातैव तीर्थः। न हि तीर्थनाम्ना जनसमुदाय एव तीर्थम्, आज्ञारहितस्य तस्याऽस्थिसंघातरूपत्वप्रतिपादनात् ॥१४॥
सूत्रक्रियाविनाशस्यैवाऽहितावहतां स्पष्टयन्नाह—

**सो एस वंकओ चिय न य सयमयमारियाणमविसेसो।**
**एयं पि भावियव्वं इह तित्थुच्छेयभीरूहिं ॥१५॥**

**अक्षरगमनिका**—स एष वक्र एव, न च स्वयंमृतमारितयोरविशेषः। एतदपि भावयितव्यमिह तीर्थोच्छेदभीरुभिः ॥१५॥

**टीका**—**स एष** सूत्रक्रियाविनाशो **वक्र एव** दुरन्तदुःखफल एव तीर्थोच्छेदहेतुत्वात्। ननु यथाकथञ्चिदनुष्ठानावलम्बने च जैनक्रियाविशिष्टजनसमुदायरूपं तीर्थं न व्यवच्छिद्यते। न च कर्तुरविधिक्रियया गुरोरुपदेशकस्य कश्चिद्दोषः अविधिक्रियाकर्तुस्तस्य स्वपरिणामाधीनप्रवृत्तिकत्वात्, केवलं क्रियाप्रवर्तनेन गुरोस्तीर्थव्यवहाररक्षणाद् गुण एवेत्याशङ्कायामाह—**न च स्वयं मृतमारितयोरविशेषः** किन्तु विशेष एव, स्वयं मृते स्वदुष्टाशयस्याऽनिमित्तत्वात्, मारिते च मार्यमाणकर्मविपाकसमुपनिपातेऽपि स्वदुष्टाशयस्य निमित्तत्वात्, तद्वदिह स्वयमक्रियाप्रवृत्तं जीवमाश्रित्य गुरोर्न दूषणम्, तदीयाऽविधिप्ररूपणमवलम्ब्य श्रोतुरविधिप्रवृत्तौ च तस्योन्मार्गप्रवर्तनपरिणामादवश्यं महादूषणमेव, एतदर्थकं ग्रन्थकृता योगशतकेऽप्युक्तम्—

गुरुणो अजोगिजोगो, अच्चंतविवागदारुणो णेओ।
जोगिगुणहीलणा, णट्ठणासणा धम्मलाघवओ ॥३७॥

एतद्वृत्ति :—**गुरोः** आचार्यस्य योगिन इत्यर्थः, **अयोगियोगः** अयोगिव्यापारो विपरीतोपदेशादिः, **अत्यन्तविपाकदारुणो ज्ञेयः** अतिशयेन दारुण इत्यर्थः। कुतः? इत्याह—**योगिगुणहीलनात्** कारणात्। एवं हि विडम्बकप्रतिपत्तिन्यायेन तद्गुणा हीलिता भवन्ति।

"उत्तमपदस्थस्य तद्धर्माननुपालनमघोषणा विडम्बना" इति वृद्धाः। तथा **नष्टनाशनाद्** नष्टा एते प्राणिनोऽयोग्यतया विपरीतोपदेशेन नाशिता भवन्ति। तथा **धर्मलाघवात्** हेतोः विपरीतोपदेशाद्धि तत्त्वाप्रतिपत्त्या वितथासेवनेन धर्मलाघवम् ॥३७॥ एतदर्थकं श्रुतकेवलिनोपि वचनम्—

जह शरणमुवगयाणं, जीवाण सिरो निकिंतए जो उ। एवं आयरिओ वि हु, उस्सुत्तं पण्णवेंतो य ॥ उपदेशमाला ॥५१८॥

किञ्च—**एतदपि भावयितव्यमिह तीर्थोच्छेदभीरुभिः**—विधिव्यवस्थापनेनैव ह्येकस्यापि जीवस्य सम्यग् बोधिलाभे चतुर्दशरज्ज्वात्मकलोकेऽमारिपटहवादनात्तीर्थोन्नतिः, अविधिस्थापने च विपर्ययात्तीर्थोच्छेद एव।

इदं त्वत्र ध्येयम्-विधिप्रवृत्तावपि अनाभोगानादिनाऽविधिदोषः छद्मस्थस्य भवतीति तद्क्रिया तु तत्त्यागो नैव कार्यः, तादृश्यस्य प्रज्ञापनीयस्याऽविधिदोषस्य निरनुबन्धित्वादिति ॥१५॥ ननु किमेतावद्गूढार्थ-गवेषणया? "महाजनो येन गतः स पन्थाः" इति वचनाद् जीतव्यवहारस्यैवेदानीं बाहुल्येन प्रवृत्तेस्तस्यैव आतीर्थकालभावित्वेन तीर्थव्यवस्थापकत्वादित्याशङ्कायामाह—

**मुत्तूण लोगसन्नं उड्ढूण य साहुसमयसब्भावं।**
**सम्मं पयट्टियव्वं बुहेणमइनिउणबुद्धीए ॥१६॥**

**अक्षरगमनिका**—मुक्त्वा लोकसंज्ञामूढ्वा च साधुसमयसद्भावं सम्यक् प्रवर्तितव्यं बुधेनाऽति-निपुणबुद्ध्या ॥१६॥

**टीका**—**मुक्त्वा** विहाय **लोकसंज्ञां** 'लोक एव प्रमाणमि'त्येवंरूपां शास्त्रनिरपेक्षां मतिम्, **ऊढ्वा च** शिरोमान्यकृत्वा **साधुसमयसद्भावं** समीचीनसिद्धान्तरहस्यं **सम्यग्** यथाविधि **प्रवर्तितव्यं** चैत्यवन्दनादौ **बुधेन** पण्डितेन **अतिनिपुणबुद्ध्या** अतिशयितसूक्ष्ममत्या। साधुसमयसद्भावश्चायम्–

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

लोकमालम्ब्य कर्तव्य, कृत बहुभिरेव चेत्।
तथा मिथ्यादृशां धर्मो, न त्याज्यः स्यात्कदाचन॥ (ज्ञानसार २३-४)

एकोऽपि शास्त्रनीत्या यो, वर्तते स महाजनः।
किमज्ञसार्थैः? शतमप्यन्धानां नैव पश्यति॥

यत्संविग्नजनाचीर्णं श्रुतवाक्यैरबाधितम्।
तज्जीतं व्यवहाराख्यं, पारम्पर्यविशुद्धिमत्॥

यदाचीर्णमसंविग्नैः श्रुतार्थानवलम्बिभिः।
न जीतं व्यवहारस्तदन्धसन्ततिसम्भवम्॥

आकल्पव्यवहारार्थं श्रुतं न व्यवहारकम्।
इति वक्तुरर्हत्तन्त्रे प्रायश्चित्तं प्रदर्शितम्॥

तस्माच्छ्रुतानुसारेण विध्येकरसिकैर्जनैः।
संविग्नजीतमालम्ब्यमित्याज्ञा पारमेश्वरी ॥इत्यादिः॥१६॥

अथेमं प्रसक्तमर्थं संक्षिपन् प्रकृतं च निगमयन्नाह—

**कयमित्थ पसंगेणं ठाणाइसु जत्तसंगयाणं तु।**
**हियमेयं विन्नेयं सदणुट्ठाणत्तणेण तहा॥१७॥**

**अक्षरगमनिका**—कृतमत्र प्रसङ्गेन, स्थानादिषु यत्नसङ्गतानां त्वेतद् हितं विज्ञेयं तथा सदनुष्ठान-त्वेन॥१७॥

**टीका**—**कृतं** पर्याप्तम् **अत्र** योगविधिनिरूपणे **प्रसङ्गेन** स्मृतार्थविस्तारेण। **स्थानादिषु** पूर्वोक्त-योगभेदेषु **यत्नसङ्गतानां तु** प्रयत्नवतामेव **एतत्** चैत्यवन्दनाद्यनुष्ठानं **हितं** मोक्षसाधकं **विज्ञेयं** बोद्धव्यं चैत्य-वन्दनादिगतस्थानादियोगस्य मोक्षहेतुत्वे चैत्यवन्दनाद्यनुष्ठानस्यापि मोक्षप्रयोजकत्वादिति भावः। **तथा** प्रकारान्तर-समुच्चये **सदनुष्ठानत्वेन** चैत्यवन्दनादेः स्वातन्त्र्येणाऽपि मोक्षहेतुत्वादिति भावः ॥१७॥ अथ सदनुष्ठानभेदानेव

प्ररूपयंश्चरमानुष्ठानभेदे चरमयोगभेदमन्तर्भावयन्नाह—

**एयं च पीइभत्तागमाणुगं तह असंगयाजुत्तं।**
**नेयं चउव्विहं खलु एसो चरमो हवइ जोगो॥१८॥**

**अक्षरगमनिका**—एतच्च प्रीतिभक्त्यागमानुगं तथाऽसङ्गतायुक्तं चतुर्विधं खलु ज्ञेयम्, एष चरमो योगो भवति॥१८॥

**टीका**—**एतच्च** सदनुष्ठानं प्रीतिभक्त्यागमाननुगच्छतीति **प्रीतिभक्त्यागमानुगं** प्रीत्यनुष्ठानं भक्त्यनुष्ठानं वचनानुष्ठानं चेति त्रिभेदं **तथा** प्रकारान्तरे **असङ्गतायुक्तम्** असङ्गतया युक्तम् असङ्गानुष्ठानम् इत्येवं **चतुर्विधं खलु** चतुष्प्रकारमेव **ज्ञेयं** बोद्धव्यम्। एतेषां भेदानां लेशतः स्वरूपं यतिशिक्षाऽधिकारे भणितमेव। एतेषु चानुष्ठानभेदेषु **एष** समीपतरवृत्तिवाचकत्वात् समीपाभिहिताऽसङ्गानुष्ठानलक्षणः **चरमो योगः** अनालम्बनयोगो **भवति** जायते सङ्गत्यागस्यैवाऽनालम्बनलक्षणत्वादिति भावः॥१८॥ अथाऽऽलम्बनभेदप्रदर्शनेनैव निरालम्बनस्वरूपमाह—

**आलंबणं पि एयं रूविमरूवी य इत्थ परमु त्ति।**
**तग्गुणपरिणइरूवो सुहुमोऽणालंबणो नाम॥१९॥**

**अक्षरगमनिका**—आलम्बनमप्येतदत्र रूपि चारूपी परम इति। तद्गुणपरिणतिरूपः सूक्ष्मः अनालम्बनो नाम॥१९॥

**टीका**—**आलम्बनमपि** चतुर्थयोगभेदरूपमपि **अत्र** योगविचारे **रूपि** समवसरणस्थजिनरूपतत्प्रतिमादिलक्षणम्, **चः** समुच्चये **अरूपी परमः** सिद्धात्मा **इति** एवं द्विविधम्। **तद्गुणपरिणतिरूपः** तस्य सिद्धात्मनो गुणाः केवलज्ञानादयस्तेषां परिणतिरूपः समापत्तिलक्षणः, तथाहि–ध्याता निरालम्बनयोगी, ध्येयं सिद्धात्मकेवलज्ञानादिगुणाः, ध्यानं च सजातीयज्ञानधारा **सूक्ष्मः** अतीन्द्रियविषयत्वाद् **अनालम्बनो नाम** योगः अरूप्यालम्बनस्येषदालम्बनत्वेन "अलवणा यवागूः" इत्यत्रेवात्र नञ्पदप्रवृत्तेरविरोधात्। "सुहुमो आलंबणो नाम" त्ति क्वचित्पाठस्तत्रापि सूक्ष्मालम्बनो नामैष योगस्ततोऽनालम्बन एवेति भाव उन्नेयः। उक्तं च चतुर्दशे षोडशके ग्रन्थकृतैव—

सालम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः।
जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः॥१॥

अयं चानालम्बनो योगः

शास्त्रसन्दर्शितोपायस्तदतिक्रान्तगोचरः।
शक्त्युद्रेकाद्विशेषेण सामर्थ्याख्योऽयमुत्तमः॥यो. दृ. स.॥५॥

इति श्लोकोक्तस्वरूपक्षपकश्रेणीद्वितीयापूर्वकरणभाविक्षायोपशमिकक्षान्त्यादिधर्मसन्न्यासरूपसामर्थ्ययोगतो निःसङ्गानवरतप्रवृत्ता या परतत्त्वदर्शनेच्छा तल्लक्षणो मन्तव्यः। आह च—

सामर्थ्ययोगतो या, तत्र दिदृक्षेत्यसङ्गशक्त्याढ्या।
साऽनालम्बनयोगः, प्रोक्तस्तददर्शनं यावत्॥षोडशक १५-८॥

एतद्वृत्ति :—**तत्र** परतत्त्वे द्रष्टुमिच्छा **दिदृक्षा इति** एवंस्वरूपा **असङ्गशक्त्या** निरभिष्वङ्गाविच्छिन्नप्रवृत्त्या

**आढया** पूर्णा **सा** परमात्मदर्शनिच्छा अनालम्बनयोगः परतत्त्वस्याऽ**दर्शनम्** अनुपलम्भं **यावत्**। परमात्मस्वरूपदर्शने तु केवलज्ञानेनानालम्बनयोगो न भवति, तस्य तदालम्बनत्वात्।

स्यादेतत्, यदि क्षपकश्रेणीभाविसामर्थ्ययोग एवानालम्बनयोगो ग्रन्थकृताऽभिहितस्तदा जिनकल्पिकादीनामपि निरालम्बनध्यानाभिधानमसङ्गतं स्यादिति? मैवं, यद्यपि तत्त्वतः परतत्त्वलक्ष्यवेधाभिमुखतदविसंवादी सामर्थ्ययोग एव निरालम्बनस्तथापि परतत्त्वलक्ष्यवेधप्रगुणतापरिणतिमात्रादर्वाक्तनं परमात्मगुणध्यानमपि मुख्यनिरालम्बनप्रापकत्वादेकध्येयाकारपरिणतिशक्तियोगाच्च निरालम्बनमेव॥

अत एवावस्थात्रयभावने रूपातीतसिद्धगुणप्रणिधानवेलायामप्रमत्तानां शुक्लध्यानांशो निरालम्बनोऽनुभवसिद्ध एव। आस्तामप्रमत्तानां, नैगमनयाभिप्रायेण पुनः अपुनर्बन्धकस्य व्यवहारनयाभिप्रायेण च सम्यग्दृष्ट्यादेः संसार्यात्मनोऽपि रूपातीतसिद्धगुणभावनप्रवृत्तस्य निरालम्बनध्यानांशः अविरुद्धः प्रतिभाति। अपि चाऽऽस्तां सिद्धपरमात्मनः केवलज्ञानादिगुणविभावनं संसार्यात्मनोऽपि च व्यवहारनयसिद्धमौपाधिकं रूपमाच्छाद्य शुद्धनिश्चयनयपरिकल्पितसहजात्मगुणविभावने निरालम्बनध्यानं दुरपह्नमेव परमात्मतुल्यतयाऽऽत्मज्ञानस्यैव निरालम्बनध्यानांशत्वात् तस्यैव च मोहनाशकत्वात्। आह च—

जो जाणइ अरिहंते, दव्वत्त-गुणत्त-पज्जयत्तेहिं।
मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज
सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं॥ प्रवचनसार : १-८०॥

तस्माद् रूपिद्रव्यविषयं ध्यानं सालम्बनं, अरूपिविषयं च निरालम्बनमिति स्थितम्॥१९॥ अथ निरालम्बनयोगस्य फलमाह—

**एयम्मि मोहसागरतरणं सेढी य केवलं चेव।**
**तत्तो अजोगजोगो कमेण परमं च निव्वाणं॥२०॥**

इति योगविधानविंशिका सप्तदशी ॥१७॥

**अक्षरगमनिका—** एतस्मिन् मोहसागरतरणं श्रेणिश्च केवलमेव।
ततोऽयोगयोगः क्रमेण परमं च निर्वाणम्॥२०॥

**टीका—एतस्मिन्** निरालम्बनध्याने लब्धे सति **मोहसागरतरणं** मोहसागरस्य दुरन्तरागादिभावसन्तानसमुद्रस्य तरणं पारगमनं भवति। ततश्च **श्रेणिः** क्षपकश्रेणिर्निर्व्यूढा भवति। एष एव सम्प्रज्ञातसमाधिस्तीर्थान्तरीयैर्गीयते। ततश्च **केवलमेव** केवलज्ञानमेव भवति। अयं चासम्प्रज्ञातः समाधिः परैर्गीयते। अयं चासम्प्रज्ञातः समाधिर्द्विधा–सयोगिकेवलिभावी अयोगिकेवलिभावी च। आद्यो मनोवृत्तीनां विकल्पज्ञानरूपाणामत्यन्तोच्छेदात् सम्पद्यते, अन्त्यश्च परिस्पन्दरूपाणाम्, अयं च केवलज्ञानस्य फलभूतः। एतदेवाह–**ततः** केवलज्ञानलाभादनु पश्चाच्च **अयोगयोगः** अयोगिगुणस्थानभावी वृत्तिबीजदाहाऽयोगाख्यः समाधिर्भवति, अयं च धर्ममेघः अमृतात्मा भवशत्रुः शिवोदयः सत्त्वानन्द इत्याद्यभिधानैः पतञ्जलिप्रभृतिभिर्गीयते। **क्रमेण** प्रदर्शितपारम्पर्येण ततोऽयोगयोगात् **परमं** सर्वोत्कृष्टं फलं **निर्वाणम्** अजरामरत्वं भवतीति॥२०॥

# अष्टादशी केवलज्ञानविंशिका

अनन्तरविंशिकायां निरालम्बनध्यानस्य फलं केवलज्ञानादि निर्दिष्टं तदत्र विंशिकायां केवलज्ञानस्वरूपमेव निरूपयति—

**केवलनाणमणंतं जीवस्वरूवं तयं निरावरणं।**
**लोगालोगपगासगमेगविहं निच्चजोइ त्ति॥१॥**

**अक्षरगमनिका**—निरावरणं जीवस्वरूपं लोकालोकप्रकाशकमनन्तमेकविधं नित्यज्योतिरिति तकं केवलज्ञानम्॥१॥

**टीका**—यत्तदोर्नित्यसम्बन्धाद् यद् **निरावरणं** ज्ञानावरणीयाद्यावरणविगमाद् **जीवस्वरूपं** घातिकर्मक्षयोत्थशुद्धात्मस्वरूपं, लोकश्चालोकश्च लोकालोकौ तौ प्रकाशयतीति **लोकालोकप्रकाशकं** सर्वद्रव्यपर्यायविषयत्वाद् **अनन्तं** विषयाऽऽनन्त्याद् **एकविधं** मतिज्ञानादिवत् प्रकारान्तराभावाद् **नित्यज्योतिः** क्षायिकभावेनाऽऽविर्भावात् शाश्वतप्रकाशम् **इति** एवंस्वरूपं **तकं** तत् **केवलज्ञानमिति**॥१॥ ननु केवलज्ञानं केवलदर्शनं चोभयमपि जीवस्वरूपं तर्हि किमिति केवलज्ञानमेव जीवस्वरूपत्वेनोक्तमित्याशङ्क्याह—

**मणपज्जवनाणंतो नाणस्स य दंसणस्स य विसेसो।**
**केवलनाणं पुण दंसणं ति नाणं ति य समाणं॥२॥**

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**अक्षरगमनिका**—मनःपर्यवज्ञानान्तो ज्ञानस्य च दर्शनस्य च विशेषः। केवलज्ञानं पुनर्दर्शनमिति ज्ञानमिति च समानम्॥२॥

**टीका**—**मनःपर्यवज्ञानान्तो** यावन्मतिश्रुतावधिमनःपर्यवज्ञानं तावदेव **ज्ञानस्य च** विशेषबोधस्य च **दर्शनस्य च** सामान्यबोधस्य च **विशेषो** भेदः असर्ववस्तुविषयत्वात्। यावत् छाद्मस्थ्यं तावदेव ज्ञानदर्शनयोर्विशेष इति भावः। कैवल्ये तु निरावरणत्वेन सर्ववस्तुविषयत्वाद् यद् ज्ञानं तदेव दर्शनम् तथा यद् दर्शनं तदेव ज्ञानमित्येतद् द्वयमपि समानम्। एतदेवाह—**केवलज्ञानं** पुनः स्वोत्पत्त्यनन्तरसमयमुपसर्जनीकृत्य विशेषान् सामान्यसङ्ग्रहपरं भवति तदा **दर्शनं** केवलदर्शनम् **इति** एवं व्यपदिश्यते। ततस्तदेव केवलदर्शनं समयानन्तरं पुनरुपसर्जनीकृत्य सामान्यं विशेषग्रहणप्रवणं भवति तदा **ज्ञानं** केवलज्ञानम् **इति** एवमभिधीयते। तथा च द्वयमपि निरावरणत्वेन सर्ववस्तुविषयत्वात् **समानं** तुल्यमिति॥२॥ एतदेव स्पष्टयन्नाह—

**संभिन्नं पासंतो लोगमलोगं च सव्वओ नेयं।**
**तं नत्थि जं न पासइ भूयं भव्वं भविस्सं च॥३॥**

**अक्षरगमनिका**—पश्यन् सर्वतो संभिन्नं लोकालोकं च भूतं भव्यं भविष्यच्च ज्ञेयं तन्नास्ति यन्न पश्यति॥३॥

**टीका**—केवलज्ञानी **पश्यन्** दर्शनगोचरं कुर्वन् **सर्वतो** द्रव्यक्षेत्रकालभावतः **संभिन्नं** सम् एकीभावेन द्रव्यपर्यायैर्भिन्नं व्याप्तं परिपूर्णमित्यर्थः, **लोकालोकं च** पूर्वोक्तस्वरूपं च **भूतम्** अतीतं भवतीति **भव्यं** वर्तमानमिति भावः, **भविष्यच्च** अनागतं च **ज्ञेयं** सर्वं चराचरं द्रव्यादि ज्ञानगोचरस्त**न्नास्ति** तन्नैव विद्यते **यद्** द्रव्यादि **न पश्यति** नैव दर्शनविषयं करोति, अपि तु सर्वं पश्यति। एवं सर्वं त्रैकालिकं ज्ञेयं च

पश्यन्नुपलक्षणात् सर्वं दृश्यं च जानन्निति भणता केवलज्ञानकेवलदर्शनयोरैक्यमेवोक्तमिति ॥३॥ ननु हलबोलमिवैकमेवार्थं भूतभाविवर्तमानतया पश्यतः प्रतिनियतरूपग्रहणाभावः प्रसज्येतेत्याशङ्क्याह—

**भूअं भूअत्तेणं भव्वं पेएण तह भविस्सं च।**
**पासइ भविस्सभावेण जं इमं नेयमेवं ति॥४॥**

**अक्षरगमनिका**—भूतं भूतत्वेन भव्यमप्येतेन तथा भविष्यच्च भविष्यद्भावेन पश्यति यदिदं ज्ञेयं एवमिति ॥४॥

यथा ज्ञेयं तथाऽसौ केवलज्ञानी पश्यति, तथाहि—**भूतम्** अतीतं **भूतत्वेन** अतीतरूपेण, न केवलं भूतमेव **भव्यमपि** वर्तमानमपि **एतेन** भव्यत्वेन **तथा भविष्यच्च** अनागतं पुन**र्भविष्यद्भावेन** अनागतत्वेन **पश्यति** दर्शनविषयं करोति,**यद्** यस्माद् **इदं** दर्शनगोचरो भवद् **ज्ञेयं** सर्वं चराचरं वस्तु **एवं** भूतभवद्भविष्यद्रूपेणैव **इतिशब्दो**ऽवधारणे। यदुत वर्तमानं कुण्डलं वर्तमानपर्यायेण कुण्डलत्वेन, तदेव भूतपर्यायेण कटकत्वेन तथा भविष्यत्पर्यायेण कङ्कणत्वेन सत् तथैव ज्ञानविषयं दर्शनविषयं च भवत् केन निवारयितुं शक्यम्? न केनापीति भावः। तस्माद् दूरापास्त एव प्रतिनियतरूपग्रहणाऽभाव इति ॥४॥ ननु भूतं भूतत्वेन पश्यतीत्यादि यदुक्तं तत् कथं सङ्गच्छेत? भूतस्य विनष्टत्वेन भविष्यतश्चानुत्पन्नत्वेनाऽसत्त्वादित्याशङ्क्याह—

**नेयं च विसेसेणं विगमइ केणावि इहरथा नेयं।**
**नेयं ति तओ चित्तं एयमिणं जुत्तिजुत्तं ति॥५॥**

**अक्षरगमनिका**—ज्ञेयं च केनापि विशेषेण विगच्छति, नेतरथैतद् ज्ञेयमिति। ततश्चित्रमेतद्। युक्तियुक्तमिदमिति ॥५॥

**टीका**—**ज्ञेयं च** घटपटादि वस्तु पुनः **केनापि** केनचिद् **विशेषेण** विशिष्टपर्यायेण **विगच्छति** नश्यति,**न** नैव **इतरथा** सर्वथा विशेषसामान्योभयरूपेण नश्यति द्रव्यपर्यायोभयस्वरूपेणेति भावः। अत्र हेतुमाह-**एतद्** घटपटादि विनष्टमपि कपालादिरूपेण **ज्ञेयं** ज्ञानगोचरो भवति **इति** हेतोः। सर्वथा सत्त्वद्रव्यत्वादिनाऽपि विनष्टे कथं ज्ञानगोचरो भवेत्? भवति च ज्ञानगोचरस्**ततः** कारणात् **चित्रं** सामान्यविशेषरूपेण शबलम् **एतद्** ज्ञेयम्। न चैतत् कपोलकल्पितं किन्तु **युक्तियुक्तं** युक्त्योपपन्नम्, **इदम्** ज्ञेयस्स शबलत्वम्। युक्तिश्च लेशतः प्राग् दर्शितैव। **इति** हेतोः समीचीनमेव यदुक्तं भूतं भूतत्वेन पश्यतीत्यादि सर्वमिति ॥५॥ एतदेवाह—

**सागाराणागारं नेयं जं नेयमुभयहा सव्वं।**
**अणुमाइयं पि नियमा सामन्नविसेसरूवं तु॥६॥**

**अक्षरगमनिका**—अण्वादिकमपि ज्ञेयं नियमात् सामान्यविशेषरूपं तु यत् सर्वं ज्ञेयं साकाराऽनाकारमुभयथा ॥६॥

**टीका**—न केवलमाकाशादि ज्ञेयम् **अण्वादिकमपि** अणुद्व्यणुकादिकमपि **ज्ञेयं** ज्ञानगोचरो **नियमाद्** नियोगेन **सामान्यविशेषरूपं तु** तथाहि-अणोरणुत्वद्रव्यत्वादिना सामान्यरूपं पृथिव्यादिपर्यायेण तु विशेषरूपमेव **यद्** यस्मात् **सर्वं** निरवशेषं **ज्ञेयं** घटपटादि **साकाराऽनाकारं** साकारं च रक्तशुक्लादिपर्यायेण विशेषरूपम् अनाकारं च घटत्वपटत्वसत्त्वद्रव्यत्वादिना सामान्यरूपमिति **उभयथा** साकारनिराकाररूपमिति ॥६॥ तस्माद् ज्ञेयग्राहकं केवलज्ञानमपि साकारनिराकाररूपमित्याह—

**ता एवं पि तह च्चिय तग्गाहगभावओ उ नायव्वं।**
**आगारोऽपि य एयस्स नवरं तग्गहणपरिणामो ॥७॥**

**अक्षरगमनिका**—तस्मादेतदपि तद्ग्राहकभावतस्तु तथैव ज्ञातव्यम्। आकारोऽपि चैतस्य केवलं तद्ग्रहणपरिणामः ॥७॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**—यस्मात् सर्वं ज्ञेयं साकारनिराकाररूपं **तस्मात्** कारणात् तद्विषयकं न केवलं मत्यादिज्ञानम् **एतदपि** केवलज्ञानमपि **तद्ग्राहकभावतस्तु** ज्ञेयग्राहकभावादेव **तथैव** ज्ञेयवत् साकारनिराकाररूपमेव **ज्ञातव्यं** बोद्धव्यम्। ननु ज्ञानस्यामूर्तत्वात् कथं तस्याऽऽकारो घटेतेत्याशङ्क्याह—**आकारोऽपि च** आस्तां ज्ञानं तदाकारोऽपि सामान्यविशेषलक्षण एव, **एतस्य** केवलज्ञानस्य **नवरं** प्राकृतत्वात् केवलं **तद्ग्रहणपरिणामः** वस्तु- विषयकज्ञानपरिणतिलक्षणः। ज्ञेयगतसामान्यविशेषाऽऽकारौ हि ज्ञाने ज्ञानरूपेण परिणमेतेऽतो विषय-गताऽऽकारसम्बन्धी ज्ञानपरिणाम एव ज्ञानस्याऽऽकार इति भावः ॥७॥ अन्यथाऽघटमानतामाह—

**इहरा उ अमुत्तस्सा को वाऽऽगारो न यावि पडिबिंबं।**
**आदरिसगिव्व विसयस्स एस तहजुत्तिजोगाओ ॥८॥**

**अक्षरगमनिका**—इतरथाऽमूर्तस्य तु को वाऽऽकारः? अपि च नैष विषयस्य आदर्शक इव प्रतिबिम्बं तथायुक्तियोगात्तु ॥८॥

**टीका**—**इतरथा** ज्ञेयग्रहणपरिणामलक्षणस्य ज्ञानाकारस्याऽनभ्युपगमे **अमूर्तस्य** तु अरूपिणो ज्ञानस्य पुनः **को वाऽऽकारः?** न कोऽपि आकार इति भावः। **अपि च** समुच्चये **न** नैव **एष** ज्ञानाकार **आदर्शके** दर्पणे **इव विषयस्य** ज्ञेयस्य **प्रतिबिम्बं** प्रतिच्छायाऽभ्युपगम्यते, धर्मास्तिकायादीनामूर्तत्वेन तत्प्रतिबद्ध-छायापुद्गलाभावात्। एवमनभ्युपगमे किं प्रमाणमित्याह—**तथायुक्तियोगात्तु** यथा ज्ञाने ज्ञेयस्य प्रतिबिम्बं नाभ्युपगम्यते तथा युक्तिलाभादेवेति हेतोः ॥८॥ प्रतिज्ञातयुक्तिप्रदर्शनार्थं भूमिकामारचयन्नाह—

**सामा उ दिया छाया अभासरगया निसिं तु कालाभा।**
**स च्चेय भासरगया सदेहवन्ना मुणेयव्वा ॥९॥**

**जे आरिसस्स अंतो देहावयवा हवंति संकंता।**
**तेसिं तत्थुवलद्धी पगासजोगा ण इयरेसिं ॥१०॥**

**अक्षरगमनिका**—छाया दिवा त्वभास्वरगता श्यामा, निशि तु कालाभा, सैव भास्वरगता स्वदेहवर्णा मुणितव्या ॥९॥ आदर्शस्याऽन्तर्ये देहावयवा भवन्ति सङ्क्रान्तास्तेषां तत्रोपलब्धिः प्रकाशयोगाद् नेतरेषाम् ॥१०॥

**टीका**—**छाया** प्रतिबिम्बितघटपटादिविषयस्य प्रतिबिम्बरूपा **दिवा तु** वासरे पुनः**अभास्वरगता** अदेदीप्यमानपृथिव्यादिषु सङ्क्रान्ता **श्यामा** प्रियङ्गुप्रभेव नीलवर्णा, **निशि तु** रात्रौ पुनः **कालाभा** कृष्णवर्णा,**सैव** छाया **भास्वरगता** देदीप्यमानादर्शादिपदार्थेषु सङ्क्रान्ता सती **स्वदेहवर्णा** स्वस्य प्रतिबिम्बितविषयस्य देहः पुद्गलोपचयरूपस्तस्य यो रक्तादिवर्णस्तद्वर्णा **मुणितव्या** बोद्धव्या ॥९॥ नन्वादर्शसन्मुखा ये देहावयवास्त एव तत्रोपलभ्यन्ते नाऽपरे तत्कथमित्याशङ्क्याह—**आदर्शस्य** दर्पणस्य **अन्तर्मध्ये ये देहावयवा** ये विषयदेशा **भवन्ति** जायन्ते **सङ्क्रान्ताः** प्रतिबिम्बितास्तेषां देहावयवानामेव **तत्राऽऽदर्शे उपलब्धिः** साक्षात्कारः **प्रकाशयोगात्**

सूर्यादिप्रकाशसंयोगाद् भवति, **न** नैव **इतरेषाम्** आदर्शेऽसङ्क्रान्तानामिति ॥१०॥ ततः किमित्याह—

**छायाणुवेहओ खलु जुज्जइ आयरिसगे पुण इमं ति।**
**सिद्धम्मि तेजश्छायाणुजोगविरहा अदेहाओ॥११॥**

**अक्षरगमनिका**—छायाणुवेधत आदशकि खलु युज्यत इदं सिद्धे पुनरदेहात् तेजश्छायाणुयोगविरहात्॥११॥

**टीका**—**छायाणुवेधतः** छायाया येऽणवस्तेषां **वेधतः** सङ्क्रमत **आदशकि** दर्पणे एव **खलु**शब्दोऽवधारणे **युज्यते** संगच्छते **इदं** विषयप्रतिबिम्बम्। **सिद्धे पुनः** सिद्धपरमात्मनि तु **अदेहात्** शरीराभावात् **तेजश्छायाणुयोगविरहात्** तेजः सूर्यादिप्रकाशस्तस्य विप्रकृष्टत्वेनाऽयोगात् तथा छायाणवो ज्ञेयसत्कछायाणवस्तेषां योगविरहात् सिद्धानां देहाभावेनैव तत्र सङ्क्रमाभावात् सम्बन्धाभाव इति केवलज्ञाने ज्ञेयप्रतिबिम्बं कथं युज्येत? नैव युज्यत इति भावः ॥११॥ एतदेवाह—

**छायाणुहिं न जोगोऽसंगत्ताओ उ हंदि सिद्धस्स।**
**छायाणवोऽ वि सव्वे वि णाऽणुमाईण विज्जंति॥१२॥**

**अक्षरगमनिका**—हन्त! सिद्धस्याऽसङ्गत्वात्तु छायाणुभिर्न योगः, छायाणवोऽपि सर्वेषामण्वादीनां न विद्यन्ते ॥१२॥

**टीका**—**हन्त!** आमन्त्रणे **सिद्धस्य** सिद्धपरमात्मनः **असङ्गत्वात्तु** देहादिरूपिपदार्थसार्थलक्षणसङ्गाभावादेव **छायाणुभि**र्विषयप्रतिबद्धैः सहाऽऽकाशस्येव **न** नैव **योगः** सम्बन्धः। न केवलं छायाणुभिर्योगाभावः, **छायाणवोऽपि** उक्तस्वरूपाः **सर्वेषां** निखिलानाम् **अण्वादीनां** परमाणुद्व्यणुकादीनां सूक्ष्मपदार्थानां प्रतिसमयं संघातविघटनाभावेन निस्यन्दाभावाद् धर्मास्तिकायादीनां चाऽमूर्तपदार्थानां छायाऽभावादेव **न** नैव **विद्यन्ते** वर्तन्त इति॥१२॥ ननु यावन्तः पदार्थाः केवलज्ञाने प्रतिबिम्ब्यन्ते तेषां प्रत्यक्षं ज्ञानं भवतु, शेषपदार्थानां ग्रहणं चानुमानतो जायेतामित्याशङ्क्याह—

**तंमित्तवेयणं तह ण सेसगहणमणुमाणओ वा वि।**
**तम्हा सरूवनिययस्स एस तग्गहणपरिणामो॥१३॥**

**अक्षरगमनिका**—तथा तन्मात्रवेदनं नाऽपि शेषग्रहणमनुमानतो वा। तस्मात् स्वरूपनियतस्यैष तद्ग्रहणपरिणामः॥१३॥

**टीका**—घण्टालोलन्यायेन नशब्दस्यात्राप्युपादानाद् नैव **तथा** तेन प्रकारेण प्रतिबिम्बद्वारेण केवलज्ञाने **तन्मात्रवेदनं** प्रतिबिम्बितमात्रपदार्थानां ज्ञानमभ्युपगम्यते तस्य सर्वावभासकत्वात् **नापि** परिहारसमुच्चये नैव **शेषग्रहणं** शेषाणां प्रतिबिम्बितव्यतिरिक्तानां पदार्थानां ग्रहणं ज्ञानम् **अनुमानतो वा** विकल्पे लिङ्गलिङ्गिज्ञानतः अभ्युपेयते केवलज्ञानस्य प्रत्यक्षत्वेनाऽभ्युपगमात्। स्यादेतत्, केवलज्ञानं सर्वगतमस्तु। मैवं, गत्युपष्टम्भकधर्मास्तिकायविरहितेऽनन्तेऽलोके गमनाभावात् समयमात्रेण च सामस्त्येन गमने तस्यानन्तत्वविरोधाच्च। **तस्मात्** कारणात् **स्वरूपनियतस्य** स्वात्मप्रदेशपरिमितक्षेत्रस्थस्य केवलज्ञानस्यैव **एष** आकारः **तद्ग्रहणपरिणामः** ज्ञेयगताकारज्ञानपरिणतिलक्षणो बोद्धव्य इति शेषः ॥१३॥ अत्र पर आह—

**चंदाइच्चगहाणं पहा पयासेइ परिमियं खित्तं।**
**केवलियनाणलंभो लोयालोयं पयासेइ॥१४॥**

**तह सव्वगयाभासं भणियं सिद्धंतमम्मनाणीहिं।**
**एयसरूवनियत्तं एवमिणं जुज्जइ कह णु ?॥१५॥**

**अक्षरगमनिका**—चन्द्रादित्यग्रहाणां प्रभा प्रकाशयति परिमितं क्षेत्रं कैवलिकज्ञानलाभो लोकालोकं प्रकाशयति ॥१४॥ तथा सर्वगताभासं भणितं सिद्धान्तमर्मज्ञानिभिरेतत् स्वरूपनियतम्। एवमिदं कथं नु युज्यते ? ॥१५॥

**टीका**—ननु श्रूयते, यदुत–स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया। चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवत् ॥१॥ तथा च **चन्द्रादित्यग्रहाणां** शशिरविग्रहाणां **प्रभा** दीप्तिः **प्रकाशयति** दीपयति **परिमितं** सीमितं **क्षेत्रं** स्वकीयप्रकाश्यक्षेत्रम्। इतः **कैवलिकज्ञानलाभः** केवलज्ञान्येव केवली तस्येदं कैवलिकं, तच्च ज्ञानं कैवलिकज्ञानं तस्य लाभ उत्पत्तिस्तु **लोकालोकं** पूर्वोक्तस्वरूपं **प्रकाशयति** दीपयति। तत् कथं युज्यते ? परस्पर विरुद्धत्वादिति भावः ॥१४॥ **तथा** शङ्कान्तरसमुच्चये, **सर्वगताभासं** सर्वेषु वस्तुषु गतः प्राप्त आभासः प्रकाशो यस्य तत् केवलज्ञानं **भणितं** कथितं **सिद्धान्तमर्मज्ञानिभिः** प्रवचनोपनिषद्विचारचतुरैः। **एतत्** केवलज्ञानमेव भवद्भिः **स्वरूपनियतं** स्वात्मप्रदेशपरिमितक्षेत्रस्थं भण्यते। **एवं** परस्परविरुद्धत्वात् **इदम्** अनन्तरोक्तं केवलज्ञानस्य प्रकाश्यं परिमितक्षेत्रं लोकालोकं च, तथा स्वरूपनियतत्वं सर्वगतत्वं च **कथं** केन प्रकारेण **नु** वितर्के **युज्यते** घटते ? नैव युज्यत इत्यर्थः ॥१५॥ आचार्यः समाधत्ते—

**आभासो गहणं चिय जम्हा तो किं न जुज्जए इत्थं।**
**चंदप्पभाइणायं तु णायमित्तं मुणेयव्वं॥१६॥**

**अक्षरगमनिका**—यस्मादाभासो ग्रहणमेव ततः किं न युज्यतेऽत्र ? चन्द्रप्रभादिज्ञातं तु ज्ञातमात्रं मुणितव्यम् ॥१६॥

**टीका**—**यस्मात्** कारणाद् **आभासः** प्रकाशो **ग्रहणमेव** ज्ञानशक्तिरेव **ततः** तस्मात् स्वरूपनियतत्व-सर्वगतत्वादि **किं न युज्यते** सङ्गच्छते ? सर्वं युज्यत एवेति भावः **अत्र** केवलज्ञानविचारे। **चन्द्रप्रभादिज्ञातं तु** शशिप्रभादिदृष्टान्तं पुनः **ज्ञातमात्रम्** उपमामात्रमेव **मुणितव्यं** ज्ञातव्यं, न तु तद्दृष्टान्तावष्टम्भेन केवलज्ञानस्यापि तथास्वरूपम् ॥१६॥ कथं चन्द्रप्रभादिज्ञातं ज्ञातमात्रमित्याह—

**जम्हा पुग्गलरूवा चंदाईणं पभा ण तद्धम्मो।**
**नाणं तु जीवधम्मो ता तं नियओ अयं नियमा॥१७॥**

**अक्षरगमनिका**—यस्माच्चन्द्रादीनां प्रभा पुद्गलरूपा न तद्धर्मः, ज्ञानं तु जीवधर्मस्ततस्तन्नियतः अयं नियमात् ॥१७॥

**टीका**—**यस्मात्** कारणात् **चन्द्रादीनां** शशिरविप्रभृतीनां **प्रभा** दीप्तिः पुद्गलरूपा परमाणुप्रचयलक्षणा चक्षुर्ग्राह्यत्वात् "तमश्छायोद्योतातपश्चेति" वचनप्रामाण्याच्च। तस्माद् **न** नैव **तद्धर्मः** चन्द्रादिधर्मः प्रभा, तस्या द्रव्यान्तरत्वात्। अत एव चन्द्रादिकमतिक्रम्याऽन्यत्रापि विषयदेशे सा गच्छन्ती न विरुध्यते। **ज्ञानं तु** केवलज्ञानादि पुनः **जीवधर्म** आत्मधर्मः समये परिमितमान आत्मस्थो मतः, तस्य गुणत्वात् तथासंवेदनाच्च। अत एव केवलज्ञानमात्मानमतिरिच्य न गच्छति विषयदेशे किन्तु आत्मस्थमेव लोकालोकं परिच्छिनत्ति। **ततः** तस्मात् **तन्नियतः** जीवप्रतिबद्धः **अयं** केवलज्ञानलक्षणजीवधर्मो **नियमाद्** नियोगादिति ॥१७॥ किञ्च—केवलज्ञानस्य स्वरूपनियतत्वाऽनभ्युपगमे बाधामाह—

**जीवो य ण सव्वगओ ता तद्धम्मो कहं भवइ बाही ?।**
**कह वाऽलोओ धम्माइविरहओ गच्छइ अणंते ॥१८॥**

**अक्षरगमनिका**—जीवश्च न सर्वगतस्ततस्तद्धर्मः कथं भवति बहिः ? कथं वाऽनन्तेऽलोके धर्मादिविरहतो गच्छति ? ॥१८॥

**टीका**—**जीवश्च** आत्मा पुनः **न** नैव **सर्वगतः** लोकालोकव्यापी स्वभावस्थस्य तस्य लोकाऽसङ्ख्येयभागमात्रेऽवगाहनात्। **ततः** तस्मात् **तद्धर्मः** केवलज्ञानलक्षणो जीवधर्मः **कथं** केन हेतुना **भवति** वर्तते **बहिः** स्वात्मप्रदेशक्षेत्रव्यतिरिक्तदेशे ? नैव भवतीति भावः। **कथं वा** केन वा प्रकारेण **अनन्ते** अन्तविरहिते **अलोके** केवलाऽऽकाशे **धर्मादिविरहतो** धर्माधर्मास्तिकायादिविरहेण गमनाभावात् **गच्छति** याति ? नैव गच्छतीत्यर्थः। तस्य ज्ञेयदेशगमने चात्मनो निःस्वभावत्वापत्तेः, गमनादिसद्भावेऽपि अलोकस्यानन्तत्वेन गमनतो ज्ञातुमशक्यत्वादसर्वविषयत्वापत्तेश्च। अयं विशेषः—अनेकान्तवादाऽभ्युपगमे च कथञ्चित् केवलज्ञानस्य परिच्छेद्यपरिच्छेदकभावेन सर्वविषययोगात् सर्वगतत्वमपि न दुर्घटम्। एवमेव ज्ञानज्ञानिनोः कथञ्चिदभेदात् केवलिपरमात्माऽपि केवलज्ञानेन भवत्येव सर्वव्यापकः ॥१८॥ ततः किमित्याह—

**तम्हा सरूवनिययस्स चेव जीवस्स केवलं धम्मो।**
**आगारो वि य एयस्स साहु तग्गहणपरिणामो ॥१९॥**

**अक्षरगमिनका**—तस्मात् स्वरूपनियतस्यैव जीवस्य केवलं धर्मः। आकारोऽपि चैतस्य तद्ग्रहणपरिणामः साधु ॥१९॥

**टीका**—**तस्मात्** केवलज्ञानस्य जीवधर्मत्वेन बहिरसत्त्वादलोके च धर्मादिविरहेण गमनाभावात् **स्वरूपनियतस्यैव** क्षीणघातिकर्मत्वात् स्वरूपस्थस्यैव **जीवस्य** आत्मनः **केवलं** केवलज्ञानं **धर्मः** स्वभावः। **आकारोऽपि** न केवलं केवलज्ञानं जीवस्य धर्मः किन्तु **एतस्य** केवलज्ञानस्य **तद्ग्रहणपरिणामः** तस्य जीवस्य ग्रहणपरिणामो वस्तुविषयकज्ञानपरिणतिलक्षणो गुणधर्म इति यत् प्रागुक्तं तत् **साधु** समीचीनमेव युक्तियुक्तत्वादिति ॥१९॥ अथोपसंहरन् केवलज्ञानस्य फलमाह—

**एयम्मि भवोवग्गाहिकम्मखयओ उ होइ सिद्धत्तं।**
**नीसेससुद्धधम्मासेवणफलमुत्तमं नेयं ॥२०॥**

इति केवलज्ञानविंशिका अष्टादशी ॥१८॥

**अक्षरगमनिका**—एतस्मिन् भवोपग्राहिकर्मक्षयतस्तु भवति सिद्धत्वम्। निःशेषशुद्धधर्मासेवनफलमुत्तमं ज्ञेयम् ॥२०॥

**टीका**—**एतस्मिन्** केवलज्ञाने प्रादुर्भूते सति **भवोपग्राहिकर्मक्षयतस्तु** वेदनीयायुर्नामगोत्रकर्मचतुष्टयक्षयादेव **भवति** जायते **सिद्धत्वम्** अजरामरत्वम्। एतच्च सिद्धत्वं **निःशेषशुद्धधर्मासेवनफलं** निःशेषः अष्टादशसहस्रशीलाङ्गरथलक्षणः शुद्धधर्म आशंसादिदोषरहितश्रुतचारित्रलक्षणस्तस्यासेवनं सर्वात्मनाऽभ्यासस्तस्य फलं कार्यम् **उत्तमं** श्रेष्ठं **ज्ञेयं** बोद्धव्यमिति ॥२०॥

*

# सिद्धविभक्तिविंशिका

अनन्तरं केवलज्ञानविंशिकामुपसंहरता निःशेषशुद्धधर्मासेवनफलमुत्तमं सिद्धत्वं ज्ञेयमिति यदुक्तं तत्सिद्धत्वप्राप्तानां सिद्धभगवतामत्र विंशिकायां सामान्यतो भेदान् निरूपयितुकाम आह—

**सिद्धाणं च विभत्ती तहेगरूवाण वीअतत्तेण।**
**पनरसहा पन्नत्तेह भगवया ओहभेएण॥१॥**

**अक्षरगमनिका**—इह विदिततत्त्वेन भगवता तथैकरूपाणां च सिद्धानां विभक्तिरोधभेदेन पञ्चदशधा प्रज्ञप्ता॥१॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**टीका**—**इह** मौनीन्द्रप्रवचने **विदिततत्त्वेन** आविर्भूतकेवलालोकेन ज्ञातजीवाजीवस्वरूपेण **भगवता**ऽद्भुतयोगसाम्राज्यस्वामितीर्थकृता यथा निखिलशुद्धधर्मासेवनफलं प्राप्यते **तथा** तेन प्रकारेण प्राप्तानन्तचतुष्टयलक्षणेन **एकरूपाणां चै**कं तुल्यं रूपं स्वरूपं येषां ते तथा तेषामेव **सिद्धानां** सीतं बद्धं कर्म ध्मातं यैस्ते सिद्धास्तेषां **विभक्तिः** केवलावाप्तेः प्राक् छद्मस्थावस्थाऽपेक्षया भेदलक्षणा **ओघभेदेन** सामान्यतो विभागेन **पञ्चदशधा** पञ्चदशप्रकारेण **प्रज्ञप्ता** निरूपितेति॥१॥ अथ भेदानाह—

**तित्थाइसिद्धभेया संघे सइ हुंति तित्थसिद्ध त्ति।**
**तदभावे जे सिद्धा अतित्थसिद्धा उ ते नेया॥२॥**

**तित्थगरा तस्सिद्धा हुंति तदन्ने अतित्थगरसिद्धा।**
**सगबुद्धा तस्सिद्धा एवं पत्तेयबुद्धा वि॥३॥**

**इय बुद्धबोहिया वि हु इत्थी पुरिसे णपुंसगे चेव।**
**एवं सलिंगगिहिअन्नलिंगसिद्धा मुणेयव्वा॥४॥**

**एगाणेगा य तहा तदेगसमयम्मि हुंति तस्सिद्धा।**
**सेढी केवलिभावे सिद्धी एते उ भवभेया॥५॥**

**अक्षरगमनिका**—तीर्थादिसिद्धभेदाः—सङ्घे सति भवन्ति तीर्थसिद्धा इति तदभावे ये सिद्धा अतीर्थसिद्धास्तु ते ज्ञेयाः॥२॥ तीर्थकरास्तत्सिद्धा भवन्ति तदन्येऽतीर्थकरसिद्धाः। स्वयंबुद्धास्तत्सिद्धा एवं प्रत्येकबुद्धा अपि॥३॥ एवं बुद्धबोधिता अपि खलु स्त्री पुरुषो नपुंसकश्च। एवं स्वलिङ्गगृह्यन्यलिङ्गसिद्धा मुणितव्याः॥४॥ तथैकानेकाश्च तदेकसमये भवन्ति तत्सिद्धाः। श्रेणिकेवलिभावे सिद्धिः। एते तु भवभेदाः॥५॥

**टीका**—**तीर्थादिसिद्धभेदाः** तीर्थसिद्धाऽतीर्थसिद्धप्रभृतिभेदाः पञ्चदश, तथाहि—**सङ्घे** सङ्घश्च चतुर्विधः साधुसाध्वीप्रभृतिलक्षणः प्रवचनाधारत्वाद् भावतीर्थस्तस्मिन् **सति** विद्यमाने ये गणधरप्रमुखाः सिद्धा **भवन्ति** जायन्ते ते **तीर्थसिद्धा** इति प्रथमो भेदः। तथा **तदभावे** तीर्थाऽभावे **ये** मरुदेव्यादयः **सिद्धास्ते अतीर्थसिद्धास्तु ज्ञेया** बोद्धव्या इति द्वितीयो भेदः॥२॥ तथा **तीर्थकराः** सन्तो ये ऋषभादयः **सिद्धास्ते तत्सिद्धाः** तीर्थकरसिद्धा **भवन्ति** सन्तीति तृतीयो भेदः। तथा **तदन्ये** तीर्थकरेभ्यः अन्ये ये पुण्डरिकादयः सामान्यकेवलिनः सिद्धास्ते **अतीर्थकरसिद्धा** इति चतुर्थो भेदः। स्वयम् आत्मना बुद्धास्तत्त्वं ज्ञातवन्तः **स्वयंबुद्धाः** सन्तः

कपिलप्रभृतयो ये सिद्धास्ते **तत्सिद्धाः** स्वयंबुद्धसिद्धा इति पञ्चमो भेदः। **एवम्** अनन्तरोक्तनीत्या प्रतीत्य एकं किञ्चिद् वृषभादिकमनित्यादिभावनाकारणं वस्तु बुद्धाः परमार्थमवगता इति **प्रत्येकबुद्धा अपि** करकण्ड्वादयो ये सिद्धास्ते प्रत्येकबुद्धसिद्धा ज्ञेया इति षष्ठो भेदः॥३॥ **एवम्** उक्तरीत्यैव बुद्धा आचार्यास्तैर्बोधिता सन्तो येऽनेके सिद्धास्ते **बुद्धबोधिता अपीति** सप्तमो भेदः। भावप्रधाननिर्देशात् **स्त्रीत्वे** सति ये सिद्धास्ते स्त्रीलिङ्गसिद्धाश्चन्दनबालाप्रभृतय इत्यष्टमो भेदः। एवमेव **पुरुषत्वे** सति ये सिद्धास्ते गौतमादयः पुरुषसिद्धा इति नवमो भेदः। तथा **नपुंसकत्वे** सति ये सिद्धास्ते गाङ्गेयप्रमुखा नपुंसकसिद्धाश्चेति दशमो भेदः। इदं तु ध्येयम्—स्त्रीत्वादिकमत्र शरीरनिर्वृत्तिमाश्रित्य ज्ञेयं वेदे सति मुक्त्यभावात् नेपथ्यस्य चाऽप्रामाण्यादिति। **एवं** पूर्ववत् **स्वलिङ्गगृहिलिङ्गाऽन्यलिङ्गसिद्धाः** स्वलिङ्गे रजोहरणादिलक्षणे व्यवस्थिताः सन्तो ये ऋषभसेनप्रमुखाः सिद्धास्ते स्वलिङ्गसिद्धा इत्येकादशो भेदः, तथा गृहिणो गृहस्थाः सन्तो ये भरतादयः सिद्धास्ते गृहिलिङ्गसिद्धा इति द्वादशो भेदः तथा अन्यलिङ्गे परिव्राजकादिसत्के वल्कलकाषायादिरूपे ये वल्कलचीर्यादयः सिद्धास्ते अन्यलिङ्गसिद्धा **मुणितव्या** बोद्धव्या इति त्रयोदशो भेदः॥४॥ **तथा** समुच्चये **एकानेकाश्च** एके अनेके च तथाहि– **तदेकसमये** तस्य सिद्धिगमनस्यैकस्मिन् समये एकका एव सन्तो ये जम्ब्वादयो **भवन्ति** जायन्ते सिद्धास्ते **तत्सिद्धा** एकसिद्धा इति चतुर्दशो भेदः, तथैकस्मिन् समये ये अनेके सन्तः श्रीऋषभादयः सिद्धास्ते अनेकसिद्धा इति पञ्चदशो भेदः। ननु क्षपकश्रेणिफलभूतैर्वीतरागत्वसर्वज्ञत्वादिगुणैस्तुल्याः सन्तः सर्वे सिद्धाः श्रूयन्ते तर्हि किमिति भेदप्रपञ्चः ?—इति चेद्,–सत्यम्, **श्रेणिकेवलिभावे** श्रेणिः क्षपकश्रेणिस्तत्फलं केवलिभावः केवलज्ञानं सर्वज्ञत्वादीति यावत् ततः **सिद्धिः** मुक्तिप्राप्तिः सर्वेषां तथापि **एते तु** अनन्तरोक्ताः पञ्चदश भेदाः पुनः **भवभेदा** भवं छाद्मस्थ्यमाश्रित्य भेदाः प्रकारा विशेषपरिज्ञानार्थं प्रदर्शिता इति बोद्धव्यम्॥५॥ स्यादेतत्, स्त्रीमुक्तिस्तु कैश्चित् स्वयूथ्यैर्नेष्यते तत्कथं स्त्रीसिद्धभेदः सङ्गच्छेत? उच्यते—

**पडिबंधगा ण इत्थं सेढीए हुंति चरमदेहस्स य**
**थीलींगादीया वि हु भावा समयाविरोहाओ॥६॥**

**अक्षरगमनिका**—चरमदेहस्याऽत्र श्रेण्यां स्त्रीलिङ्गादिका अपि भावा न खलु प्रतिबन्धकाः समयाऽविरोधात्॥६॥

**टीका**—**चरमदेहस्य** चरमः पर्यन्तवर्ती देहः शरीरं यस्य स तथा तस्य सत्त्वस्य तद्भवमुक्तिगामिन इत्यर्थः, **अत्र** सिद्धिगमनविचारे **श्रेण्यां** प्रस्तावात् क्षपकश्रेण्याम् आस्तां दृढप्रहार्यादीनामिव क्रूरभावाः **स्त्रीलिङ्गादिका अपि** स्त्रीलिङ्गनपुंसकलिङ्गादिका अपि **भावाः** पूर्वोपार्जिततथाविधकर्मोदयसम्पाद्या **न** नैव **हु** प्राकृतत्वादवधारणे **प्रतिबन्धकाः** प्रतिरोधका भवन्ति। अत्र हेतुमाह–**समयाऽविरोधात्** श्रीजिनागमाऽविरोधादिति॥६॥ समयाऽविरोधमेव भावयति—

**नवगुणठाणविहाणा इत्थीपमुहाण होइ अविरोहो।**
**समएण सिद्धसंखाभिहाणओ चेव नायव्वा॥७॥**

**अक्षरगमनिका**—स्त्रीप्रमुखाणां नवगुणस्थानविधानात् समयेन सिद्धसङ्ख्याऽभिधानतश्चाऽविरोधो ज्ञातव्यो भवति॥७॥

**टीका**—**स्त्रीप्रमुखाणां** स्त्रीनपुंसकप्रभृतीनां **नवगुणस्थानविधानाद्** नवानां प्रमत्तयतिसत्कषष्ठगुणस्थान-प्रभृत्ययोगिकेवलिसम्बन्धिचतुर्दशगुणस्थानपर्यन्तानां गुणस्थानानां **विधानाद्** निरूपणात् तीर्थकरगणधरैः, **समयेन**

एकेन कालसमयेनोत्कृष्टतः स्त्रीणां विंशतिरिति **सिद्धसङ्ख्याऽभिधानतश्च** सिद्धानां मुक्तानां सङ्ख्या गणना तस्या अभिधानतः कथनाच्च **अविरोधः** श्रीजिनागमेन सह विरोधाभावो **ज्ञातव्यो** बोद्धव्यो **भवति** युज्यते। यदागमः–अट्ठसयं पुरिसाणं, वीसं इत्थीण दस णपुंसाणं। ओहेण एक्कसमए, पुरिसाण य होइ सट्ठाणे ॥४६॥ सिद्धप्राभृतः ॥७॥ ततः किमित्याह—

**अणियट्टिबायरो सो सेढिं नियमेणमिह समाणेइ।**
**तीए य केवलं केवले य जम्मक्खए सिद्धी ॥८॥**

**अक्षरगमनिका**—अनिवृत्तिबादरः स इह नियमेन श्रेणिं समाप्नोति तस्यां च केवलं केवलं च जन्मक्षये सिद्धिः ॥८॥

**टीका**—अनन्तरोक्तनीत्या स्त्रीप्रमुखाणां नवगुणस्थानकविधानात्तदन्तर्गतनवमगुणस्थानके वर्तमानस्तात्स्थ्यात्तद्व्यपदेश इति **अनिवृत्तिबादरः स** स्त्रीक्षपकजीवोऽपि **इह** सिद्धिविचारे **नियमेन** नियोगेन **श्रेणिं** क्षपकश्रेणिं **समाप्नोति** निष्ठापयति। **तस्यां च** समाप्तायां च श्रेण्यां **केवलं** केवलज्ञानं **केवले च** केवलज्ञाने च प्रादुर्भूते सति **जन्मक्षये** जन्मनिमित्ताऽऽयुष्ककर्मक्षये सति यदि वा जन्म भवस्तदुपग्राहिकर्मक्षये सति **सिद्धिः** मुक्तिः स्त्रीणामपीति ॥८॥ ननु पुंवेदाऽऽरूढस्यैवाऽनिवृत्तिबादरगुणस्थानके बध्यमाने पुंवेदे स्त्रीवेदसङ्क्रमो भवति, न तु स्त्रीवेदारूढस्य तथेत्याशङ्क्य परिहरति—

**पुरिसस्स वेयसंकमभावेणं इत्थ गमणिगाऽजुत्ता।**
**इत्थीण वि तब्भावो होइ तया सिद्धिभावाओ ॥९॥**

**अक्षरगमनिका**—अत्र पुरुषस्य वेदसङ्क्रमभावेन गमनिकाऽयुक्ता स्त्रीणामपि सिद्धिभावात् तद्भावस्तदा भवति ॥९॥

**टीका**—ननु **अत्र** क्षपकश्रेण्यां **पुरुषस्य** पुंवेदाऽऽरूढस्यैव **वेदसङ्क्रमभावेन** वेदस्य स्त्रीवेदस्य बध्यमाने पुरुषवेदे सङ्क्रमभावेन सङ्क्रमभवनात् सिद्धिर्भवति, स्त्रीवेदाऽऽरूढस्य तु न तथेति चेत्, न, एवं **गमनिका** व्याख्या **अयुक्ता** युक्तिविकला यतो न केवलं पुरुषस्य **स्त्रीणामपि** स्त्रीवेदाऽऽरूढाणामपि **सिद्धिभावाद्** मुक्तिभवनात् **तद्भावः** बध्यमाने पुरुषवेदे स्त्रीवेदसङ्क्रमलक्षणो **भवति** जायते **तदा** क्षपकश्रेण्यामिति यत्किञ्चिदेतदिति ॥९॥ किञ्च—

**लिंगमिह भावलिंगं पहाणमियरं तु होइ देहस्स।**
**सिद्धी पुण जीवस्सा तम्हा एयं न किंचिदिह ॥१०॥**

**अक्षरगमनिका**—इह भावलिङ्गं प्रधानमितरत्तु लिङ्गं देहस्य भवति, सिद्धिः पुनर्जीवस्य तस्मादेतन्न किञ्चिदिह ॥१०॥

**टीका**—**इह** सिद्धिविचारे **भावलिङ्गं** सम्यग्दर्शनज्ञानचारित्रलक्षणं मुक्तिप्रदत्वात् **प्रधानं** मुख्यम् **इतरत्तु** शरीरनिर्वृत्तिमाश्रित्य पुरुषत्वस्त्रीत्वादिलक्षणं **तु**शब्दोऽवधारणे भिन्नक्रमश्च **लिङ्गं** द्रव्यलिङ्गं **देहस्य** शरीरस्यैव **भवति** जायते। **सिद्धिः पुनः** मुक्तिस्तु **जीवस्या**ऽऽत्मनो भवति, न तु जडदेहस्य। **तस्माद्** युक्तिविकलत्वाद् **एतद्** द्रव्यलिङ्गं यदि वा स्त्रीत्वे सति न मुक्तिरिति कथनं **न** नैव **किञ्चित्** प्रमाणम् **इह** सिद्धिविचार इति ॥१०॥ स्यादेतत्, सप्तमनरकगमनप्रतिषेधो यथाऽधोगमने तथोर्ध्वगमनेऽपि सिद्धिप्रतिषेधो भवतु तासामिति चेन्न—

**सत्तममहिपडिसेहो रुद्दपरिणामविरहओ तासिं।**
**सिद्धीए इट्ठफलो न साहुणित्थीण पडिसेहो ॥११॥**

**अक्षरगमनिका**—सप्तममहीप्रतिषेधस्तु तासां रौद्रपरिणामविरहतः। सिद्धाविष्टफलः। न साध्वीस्त्रीणां प्रतिषेधः ॥११॥

**टीका**—**सप्तममहीप्रतिषेधस्तु** सप्तमनरक भूमिगमननिषेधः पुनः **तासां** स्त्रीणां **रौद्रपरिणामविरहतः** तीव्रतमसङ्क्लिष्टाऽध्यवसायाभावाद् बोद्धव्यः। **साध्वीस्त्रीणां** संयतीनां च स रौद्रपरिणामविरहः **सिद्धौ** मुक्तिगमने **इष्टफल** इष्टफलसाधक इति भावः, परं **न** नैव **प्रतिषेधः** स्त्रीणां सिद्धिनिषेधक इत्यर्थः ॥११॥ ननु स्त्रीणां चक्र्याद्युत्तमपदप्रतिषेधात् सिद्धिप्रतिषेधोऽपि जायतामित्याशङ्क्याह—

**उत्तमपयपडिसेहो तासिं सहगारिजोगयाऽभावे।**
**नियवीरिएण उ तहा केवलमवि हंदि अविरुद्धं ॥१२॥**

**अक्षरगमनिका**—सहकारियोग्यताभावे तु तासामुत्तमपदप्रतिषेधः। निजवीर्येण तु तथा केवलमपि हन्ताऽविरुद्धम् ॥१२॥

**टीका**—**सहकारियोग्यताभावे तु** प्राकृतत्वेन विभक्तिव्यत्ययात् पुंवेदोदयादिसहकारिकारण-लक्षणयोग्यताभावादेव **तासां** स्त्रीणाम् **उत्तमपदप्रतिषेधः** चक्र्यादिप्रधानपदनिषेधो बोद्धव्यः, न पुनः अभव्यस्येव स्वरूपयोग्यताभावात्। एतदेव प्रकारान्तरेणाह- **निजवीर्येण तु** स्वकीयवीर्योल्लासेन पुनर्यथा पुरुषाणां **तथा** तद्वत् **स्त्रीणां** महिलानां न केवलं चारित्रादिभावाः **केवलमपि** केवलज्ञानमपि **हन्त**! आमन्त्रणे **अविरुद्धं** निर्बाधं युक्तियुक्तत्वाज्जिनागमसम्मतत्वाच्चेति ॥१२॥ आगमसम्मतत्वमाह—

**वीसित्थिगा उ पुरिसाण अट्ठसयमेगसमयओ सिज्झे।**
**दस चेव नपुंसा तह उवरिं समएण पडिसेहो ॥१३॥**

**अक्षरगमनिका**—एक समयतो विंशतिस्तु स्त्रियः पुरुषाणामष्टशतं सिध्येत् तथा दशैव नपुंसा उपरि समयेन प्रतिषेधः ॥१३॥

**एकसमयत** एकेन समयेनोत्कर्षतः **स्त्रियो** महिला **विंशतिस्तु** विंशतिरेव सिध्यन्ति, **पुरुषाणामष्ट-शतं** पुंसामष्टोत्तरशतं **सिध्येत् तथा दशैव नपुंसाः** नपुंसका एकेन समयेन सिध्यन्ति । उक्तसङ्ख्याया **उपरि** ऊर्ध्वं सर्वत्रापि **समयेन** एकेन कालसमयेन सिध्यतां **प्रतिषेधो** निषेधो ज्ञेय इति ॥१३॥ प्रसङ्गतः प्रकारान्तरेण सङ्ख्यामाह—

**दसन्नलिंगे इय चउरो गिहिलिंगे सयं च अट्ठहियं।**
**विन्नेयं तु सल्लिंगे समएणं सिज्झमाणाणं ॥१४॥**

**अक्षरगमनिका**—एवं समयेन सिध्यतां चत्वारो गृहिलिङ्गे, दशाऽन्यलिङ्गे शतं चाष्टाधिकं तु स्वलिङ्गे विज्ञेयम् ॥१४॥

**टीका**—**एवम्** उत्कर्षत एकेन **समयेन सिध्यतां** सिद्धिसौधमारोहतां **चत्वारो गृहिलिङ्गे** गृहस्थलिङ्गे तथा **दश अन्यलिङ्गे** चरकपरिव्राजकादिलिङ्गे तथा **शतं चाष्टाधिकं तु** अष्टोत्तरशतमेव **स्वलिङ्गे** यतिलिङ्गे **विज्ञेयं** बोद्धव्यम्। मुद्रितपुस्तके 'सलिङ्गसिद्धे' इति पाठः स त्वपपाठ इति संभाव्यतेऽत एव तमनादृत्य 'दसन्नलिङ्गे'

इति पाठो ग्रन्थान्तरतो गृहीत इति ॥१४॥ तथा—

**दो चेवुक्कोसाए चउरो जहन्नाइ मज्झिमाए य।**
**अट्ठाहिगं सयं खलु सिज्झइ ओगाहणाइ तहा ॥१५॥**

**अक्षरगमनिका**—उत्कृष्टायामवगाहनायां द्वावेव जघन्यायां चत्वारस्तथा मध्यमायां चाष्टाधिकं शतं खलु सिध्यति ॥१५॥

**टीका**—एकेन समयेनोत्कर्षत **उत्कृष्टायामवगाहनायां** पञ्चधनुःशतमानायां **द्वावेव** तथा **जघन्यायां** हस्तद्वयप्रमाणायां **चत्वारः** सिध्यन्ति **तथा** समुच्चये **मध्यमायां चाष्टाधिकं शतं खलु** अष्टोत्तरशतमेव **सिध्यति** निर्वाति। अवगाहनाविषयकविशेषस्तु ग्रन्थान्तरोऽवसेयो ग्रन्थगौरवभयान्नोच्यत इति ॥१५॥ तथा—

**चत्तारि उड्ढलोए दुए समुद्दे तओ जले चेव।**
**बावीसमहोलोए तिरिए अट्ठुत्तरसयं तु ॥१६॥**

**अक्षरगमनिका**—ऊर्ध्वलोके चत्वारः, समुद्रे द्वौ, जले च त्रयः, अधोलोके द्वाविंशतिस्तिरश्चि त्वष्टोत्तरशतम् ॥१६॥

**टीका**—एकेन समयेनोत्कर्षत **ऊर्ध्वलोके** पाण्डकवनादौ **चत्वारः** सिध्यन्ति, तथा **समुद्रे** लवणोदध्यादौ **द्वौ** सिध्यतः, तथा **जले** पद्मद्रहादिजलमध्ये **त्रयः** सिध्यन्ति, सिद्धप्राभृते तु जले चत्वार उक्ताः 'जले चउक्कं'त्ति। तथाऽ**धोलोके** नलिनावत्यादिविजयेषु **द्वाविंशतिः** सिध्यन्ति, सिद्धप्राभृते पुनर्विंशतिपृथक्त्वमुक्तं 'वीसपहुत्तं अहोलोए'त्ति तथोत्तराध्ययनेषु जीवाजीवविभक्त्यध्ययने विंशतिरिति दृश्यते। तथा **तिरश्चि तु** तिर्यग्लोके पुनः **अष्टोत्तरशतम्** अष्टाधिकं शतं सिध्यतीति ॥१६॥ अथोत्कर्षतः कालमाश्रित्याष्टौ समयान्, सप्त समयान्, षट् समयान् यावदेकं समयं सिध्यन्तो निरन्तरं क्रमश एकादयो द्वात्रिंशदष्टचत्वारिंशत्षष्टिप्रभृतयो यावदष्टोत्तरं शतं प्राप्यन्ते तानाह—

**बत्तीसा अडयाला सट्ठी बावत्तरी उ बोद्धव्वा।**
**चुलसीई छन्नउई दुरहियमट्ठुत्तरसयं च ॥१७॥**

**अक्षरगमनिका**—द्वात्रिंशदष्टचत्वारिंशत् षष्टि र्द्विसप्ततिश्चतुरशीतिः षण्णवतिर्द्व्यधिकं शतमष्टोत्तरशतं च बोद्धव्यम् ॥१७॥

**टीका**—प्रथमे समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत् सिध्यन्ति, द्वितीयेऽपि समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत्, एवं तृतीयेऽपि यावदष्टमेऽपि समये जघन्यत एको द्वौ वा सिध्यत उत्कर्षतो **द्वात्रिंशत्** सिध्यन्ति, परतोऽवश्यमन्तरं समयादिकं, न कोऽपि सिध्यतीत्यर्थः, तथा त्रयस्त्रिंशदादयः **अष्टचत्वारिंशत्**पर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः सप्त समयान् यावत्प्राप्यन्ते, परतो नियमादन्तरं समयादिकं, तथा एकोनपञ्चाशदादयः **षष्टि**पर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः षट् समयान् यावत् प्राप्यन्ते, ततः परमवश्यमन्तरं, तथा एकषष्ट्यादयो **द्विसप्तति**पर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः पञ्च समयान् यावत्प्राप्यन्ते, ततः ऊर्ध्वं नियमादन्तरं, तथा त्रिसप्तत्यादय**श्चतुरशीति**पर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतश्चतुरः समयान् यावत्प्राप्यन्ते, परतोऽवश्यमन्तरं, तथा पञ्चाशीत्यादयः **षण्णवति**पर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतस्त्रीन् समयान् यावदासाद्यन्ते, परतो नियमादन्तरं, तथा सप्तनवत्यादयो **द्व्युत्तरशत**पर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतो द्वौ समयौ यावत्प्राप्यन्ते, परतो नियमादन्तरं, तथा त्र्युत्तरशतादयः**अष्टोत्तरशत**पर्यन्ताः सिध्यन्तो नियमादेकमेव

समयं यावत्प्राप्यन्ते, परतोऽवश्यमन्तरं समयादिकमिति जघन्यतः, उत्कर्षतश्च षण्मासान्तरं षण्मासान् यावद् न कोऽपि सिध्यतीति सर्वत्र भावना ॥१७॥ उपाधिभेदेन भेदान् प्रदर्श्योपसंहरन् प्रतिज्ञाततथैकरूपतां व्यवस्थापयन्नाह—

**एवं सिद्धाणं पि हु उवाहिभेएण होइ इह भेओ।**
**तत्तं पुण सव्वेसिं भगवंताणं समं चेव ॥१८॥**

**अक्षरगमनिका**—एवं सिद्धानामपि खलूपाधिभेदेन भवतीह भेदः। तत्त्वं पुनः सर्वेषां भगवतां सममेव ॥१८॥

**टीका**—**एवम्** अनन्तरोक्तनीत्याऽऽस्तां संसारिणां **सिद्धानामपि** मुक्तानामपि **खलूपाधिभेदेन** सिद्धेः प्रागेव द्रव्यक्षेत्रकालभावात्मकोपाधिभेदन कर्मकृतवैचित्र्यभेदेन वा **भवति** जायते **इह** सिद्धविभक्तिप्रस्तावे **भेदो** विशेषः। **तत्त्वं पुनः** अनन्तचतुष्टयलक्षणं सिद्धत्वं तु **सर्वेषां** निखिलानां **भगवतां** सिद्धपरमात्मनां **सममेव** तुल्यमेव शुद्धाऽऽत्मस्वरूपत्वादिति ॥१८॥ समत्वमेवाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**सव्वे वि य सव्वन्नू सव्वे वि य सव्वदंसिणओ एए।**
**निरुवमसुहसंपन्ना सव्वे जम्माइरहिया य ॥१९॥**

**अक्षरगमनिका**—सर्वेऽपि च सर्वज्ञाः, सर्वेऽपि च सर्वदर्शिन एते। सर्वे च निरुपमसुखसम्पन्ना जन्मादिरहिताश्च ॥१९॥

**टीका**—**सर्वेऽपि च** समस्ता अपि सिद्धभगवन्तः पुनः **सर्वज्ञाः** विश्वविश्ववेदिनः क्षीणज्ञानावरणीयकर्मत्वात्, **सर्वेऽपि** च निखिला अपि सिद्धपरमात्मनस्तु **सर्वदर्शिनः** सर्वपश्यकाः समूलदर्शनावरणीयकर्मापगमात्, **सर्वे च** निःशेषा अपि **निरुपमसुखसम्पन्ना** उपमातीतसुखसमन्विताः सर्वव्याबाधारहितत्वाद् **जन्मादिरहिताश्च** जातिजरादिदुःखरहितास्तन्निमित्तरागादिविरहात् कृत्स्नकर्मक्षयाच्चेति ॥१९॥ क्षेत्रतोऽपि समत्वं प्रदर्शयन् निराबाधसुखस्थितिमाह—

**जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का।**
**अन्नुन्नमणाबाहं चिट्ठंति सुही सुहं पत्ता ॥२०॥**

इति सिद्धविभक्तिविंशिका एकोनविंशी ॥१९॥

**अक्षरगमनिका**—यत्र चैकः सिद्धस्तत्रानन्ता भवक्षयविमुक्ता अन्योन्यमनाबाधं सुखं प्राप्ताः सुखिनस्तिष्ठन्ति ॥२०॥

**टीका**—**यत्र च** यत्रैव देशे **एकः सिद्धो** निर्वृतस्त**त्रानन्ता** अनन्तसङ्ख्याका सिद्धा **भवक्षयविमुक्ताः** भवो जन्मादिदुःखरूपः संसारस्तत्क्षयो व्युच्छित्तिस्ततो विमुक्ता विशेषेणाऽपुनर्भावेन कृत्स्नकर्मक्षयाद् मुक्ता मोक्षं प्राप्ताः, **अन्योन्यं** परस्परं तथाविधाऽचिन्त्यपरिणामत्वाद् धर्मास्तिकायादिवद् **अनाबाधं** लेशतोऽपि बाधाया देहातीतत्वेनाऽसम्भवात् **सुखम्** आनन्दं **प्राप्ताः** सम्पन्नाः, अत एव **सुखिनः** शिवशर्मसम्पन्नाः, **तिष्ठन्ति** स्वात्मप्रदेशस्थिरत्वमनुभवन्तीति ॥२०॥

*

# सिद्धसुखविंशिका

अनन्तरविंशिकान्तेऽनाबाधं सुखं प्राप्ताः सुखिनस्तिष्ठन्तीति यदुक्तं तत् सिद्धसुखमत्र विंशिकायामुच्यते। तथैतद्विंशिकासमाप्तौ च ग्रन्थसमाप्तिर्भविष्यतीति ग्रन्थाऽव्युच्छित्त्यर्थं ग्रन्थकारः अन्तिम-मङ्गलविधानार्थं परमानन्तसुखसंगतं श्रीमन्महावीरं प्रणम्य प्रतिज्ञातार्थनिरूपणार्थं भूमिकामारचयन्नाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**नमिऊणं तिहुयणगुरुं परमाणंतसुहसंगयं पि सया।**
**अविमुक्कसिद्धिविलयं च वीयरागं महावीरं॥१॥**

**वुच्छं लेसुद्देसा सिद्धाण सुहं परं अणोवम्मं।**
**नायागमजुत्तीहिं मज्झिमजणबोहणट्ठाए॥२॥**

**अक्षरगमनिका**—नत्वा वीतरागं त्रिभुवनगुरुं परमानन्तसुखसङ्गतमपि सदाऽविमुक्तसिद्धिवनितं महावीरं मध्यमजनबोधनार्थं ज्ञाताऽऽगमयुक्तिभिर्वक्ष्यामि लेशोद्देशात् सिद्धानां परमनौपम्यं सुखम्॥१–२॥

**टीका**—**नत्वा** प्रणम्य **वीतरागं** पूर्वोक्तस्वरूपं, **त्रिभुवनगुरुं** भूतपर्यायेण तीर्थकृन्नामकर्मोदयेन वचनातिशयात् त्रिजगज्जनानां तत्त्वोपदेशेन मोहाऽज्ञानादिनाशकत्वात्, परमं च निरतिशयम् अनन्तं च वक्ष्यमाणस्वरूपं परमानन्तं च तत् सुखं परमानन्तसुखं तेन सङ्गतं समन्वितं **परमानन्तसुखसङ्गतमपि सदा** नित्यम् **अविमुक्तसिद्धिवनितं** अपरित्यक्तमुक्तिमहिलम्, श्लेषाऽलङ्कारोऽयम्, **महावीरं** श्रमणभगवन्तमासन्नोप-कारित्वात्तस्य, वक्ष्ये सिद्धानां सुखमिति सम्बन्धः। किमर्थम्? **मध्यमजनबोधनार्थं** शैमुषीं समाश्रित्य मध्यमजनः अपुनर्बन्धकादिः कदाग्रहशैथिल्येन किञ्चिन्मध्यस्थत्वात् तस्य बोधनार्थं ज्ञापनार्थम्। कथम्? **ज्ञाताऽऽगमयुक्तिभिः** ज्ञातानि चोदाहरणानि आगमश्चाऽऽप्तोपदेशो युक्तयश्चहेतवो ज्ञातागमयुक्तयस्ताभिः **वक्ष्यामि** कथयिष्यामि, केन प्रकारेण? **लेशोद्देशात्** किञ्चिदभिधानेनैव न तु सर्वात्मना, बुद्ध्या बृहस्पतेरपि तथाऽक्षमत्वात्, किम्? **सिद्धानां** मुक्तानां **परं** सर्वोत्कृष्टम् **अनौपम्यम्** उपमातीतं **सुखं** शर्म। उपमातीतत्वं तु कथानकादवसेयम्, तच्चेदं–एगो महारन्नवासी मिच्छो चिट्ठति, इत्तो य एगो राया आसेण अवहरितो तं अडविं पवेसिओ तेण दिट्ठो, सक्कारिऊण जणवयं नीतो, रन्नावि सो नगरं नीओ, पच्छा उवगारित्ति गाढमुपचरितो, जहा राया तहा चिट्ठइ, धवलघराइभोगेण विभासा, कालेण रन्नं सरिउमारद्धो, रन्ना विसज्जिओ, तत्तो रन्निगा पुच्छंति—'केरिसं नयरंति'?, सो वियाणंतोऽवि तत्थोवमाभावा न सक्कइ नयरगुणे परिकहेउं। एस दिट्ठंतो, अयमर्थोपनयः—इत्येवं सिद्धानां सौख्यमनुपमं वर्तत इति॥१–२॥

प्रकारान्तरेण तत्सुखमाह—

**जं सव्वसत्तु तह सव्ववाहि सव्वत्थ सव्वमिच्छाणं।**
**खयविगमजोगपत्तीहिं होइ तत्तो अणंतमिणं॥३॥**

**अक्षरगमनिका**—सुखबोधार्थं पूर्वार्धपदानां पश्चार्धपदैः सह यथासङ्ख्यं सम्बन्धः कार्यः, तथाहि–सर्वशत्रुक्षये, सर्वव्याधिविगमे, सर्वार्थसंयोगेन तथा सर्वेच्छासंप्राप्त्या यत्ततः अनन्तगुणं भवतीदम्॥३॥

**टीका**—**सर्वशत्रुक्षये** निरवशेषरिपूणां विनाशे सति, तथा **सर्वव्याधिविगमे** निखिलरोगप्रणाशे सति, तथा **सर्वार्थसंयोगेन** प्रार्थिताऽखिलसम्पद्भिः सम्प्रयोगेन सता, तथा **सर्वेच्छासम्प्राप्त्या** कृत्स्नकामनानां निष्पत्त्या

सत्या यत् सुखं **ततः** तस्मात् सकाशाद् **अनन्तगुणं** वक्ष्यमाणस्वरूपं **भवति** जायते **इदं** सिद्धानां सुखमिति ॥३॥ कुत इत्याह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**रागाईया सत्तू कम्मुदया वाहिणो इहं नेया।**
**लद्धीओ परमत्था इच्छाणिच्छेच्छमो य तहा ॥४॥**

**अक्षरगमनिका**—इह रागादिकाः शत्रवः, कर्मोदया व्याधयो, लब्धयः परमार्थाः, तथाऽनिच्छेच्छा चेच्छा ज्ञेया ॥४॥

**टीका**—**इह** सिद्धसुखप्रस्तावे **रागादिकाः** रागद्वेषमोहाज्ञानादयः **शत्रवो** भावरिपवो जीवाऽपकारित्वात्, **कर्मोदयाः** ज्ञानावरणीयादिकर्मणां विपाकोदया **व्याधयो** रोगास्तथाजीवपीडनात्, तथा **लब्धयः** अहिंसादयः परार्थहेतुत्वेन **परमार्थाः** सर्वोत्तमसम्पदः, **तथा** समुच्चये **अनिच्छेच्छा च** अनिच्छा निःस्पृहत्वं तस्य इच्छाऽभिलाषैव इच्छा **ज्ञेया** बोद्धव्या। एतेषां क्रमशः क्षये सति, विगमे सति, संयोगेन सता तथा सम्प्राप्त्या यत् सुखं तदनन्तगुणं सिद्धानाम्। आस्तामेतच्चतुष्टयनिष्पन्नं सिद्धसुखम्, इच्छानिवृत्तिलक्षणेनैकेनाऽपि यदनुभूयते भावयोगिभिस्तदप्यद्भुतमिति ॥४॥ सिद्धसुखस्याऽनुभवगम्यतामाह—

**अणुहवसिद्धं एयं नारुग्गसुहं व रोगिणो नवरं।**
**गम्मइं इयरेण तहा सम्ममिणं चिंतियव्वं तु ॥५॥**

**अक्षरगमनिका**—केवलमनुभवसिद्धमेतत्। इतरेण न गम्यते आरोग्यसुखमिव रोगिणा। तथा सम्यगिदं चिन्तितव्यं तु ॥५॥

**टीका**—**नवरं** प्राकृतत्वात् केवलम् **अनुभवसिद्धं** सिद्धभगवतामेव प्रत्यक्षसिद्धम् **एतत्** सिद्धसुखम् **इतरेण** संसारिणा **न** नैव **गम्यते**ऽनुभूयते। अत्रार्थे दृष्टान्तमाह- **आरोग्यसुखमिव** स्वास्थ्यसुखमिव **रोगिणा** जन्मजातव्याधितेन। उक्तं च—

रागाईणमभावे जं होइ सुहं तयं जिणो जाणइ।
न हि सण्णिवायगहिओ जाणइ तदभावजं सोक्खं ॥१॥

द्रष्टान्तान्तराण्यपि स्वतः अभ्यूह्यानि, तथाहि—यतिसुखमिवाऽयतिना, दर्शनसुखमिव जन्मान्धेन, स्त्रीसुखमिव कन्ययेत्यादीनि। **तथा** तेन प्रकारेण सूक्ष्मबुद्ध्याऽऽगमयुक्तिभिः **सम्यग्** अवितथम् **इदं** सिद्धसुखं **चिन्तितव्यं तु** विचारणीयमेवेति ॥५॥ चिन्तनप्रकारमाह—

**सिद्धस्स सुक्खरासी सव्वद्धापिंडिओ जइ हविज्जा।**
**सोऽणंतवग्गभइओ सव्वागासे ण माइज्जा ॥६॥**

**अक्षरगमनिका**—सिद्धस्य सौख्यराशिः सर्वाद्धापिण्डितः सोऽनन्तवर्गभक्तः सर्वाकाशे न माति ॥६॥

**टीका**—**सिद्धस्य** सिद्धपरमात्मनः प्रतिसमयमनुभूयमानः **सौख्यराशिः** सुखसमुदयः **सर्वाद्धापिण्डितः** सर्वकालसमयलक्षणाऽनन्तसङ्ख्यया गुणितः। ततः **स** गुणितराशिः **अनन्तवर्गभक्तः** अनन्तैर्वर्गमूलैरपवर्तितः, तथाहि–२५६ राशेर्वर्गमूलं १६, तस्याऽपि ४, तस्यापि २ इत्येवं तावदपवर्तितो यावत् सर्वाद्धालक्षणेन गुणकारेण गुणने यदधिकं जातं तस्य सर्वस्याऽप्यपवर्तनैः सिद्धत्वस्याऽऽद्यसमयभाविसुखमात्रतां प्राप्तः सन्

**सर्वाकाशे न माति** लोकालोकलक्षणेऽनन्तानन्तप्रदेशात्मके न माति नैव समाविशति। अत्र विषये पूर्वसूरिसम्प्रदायः श्रीप्रज्ञापनाद्वितीयपदगतश्रीमन्मलयगिरिटीकामनुसृत्य लिख्यते—इयमत्र भावना—इह किल विशिष्टाऽऽह्लादरूपं सुखं परिगृह्यते, ततश्च यत आरभ्य शिष्टानां सुखशब्दप्रवृत्तिस्तमाह्लादमवधिकृत्य एकैकगुणवृद्धितारतम्येन तावदसावाह्लादो विशिष्यते यावदनन्तगुणवृद्ध्या निरतिशयनिष्ठामुपगतः, सोऽयमत्यन्तोपमातीतैकान्तौत्सुक्यनिवृत्तिरूपस्तिमिततमकल्पः चरमाह्लादः सदा सिद्धानां, तस्माच्चारतः प्रथमाच्चोर्ध्वमपान्तरालवर्तिनो ये गुणास्तारतम्येनाऽऽह्लादविशेषरूपास्ते सर्वाकाशप्रदेशेभ्योऽप्यतिभूयांसः, ततः किलोक्तं–"सव्वागासे न माइज्जा" इति, अन्यथा यत् सर्वाकाशे न माति तत् कथमेकस्मिन् सिद्धे मायाद् ? इति ॥६॥ एतदेवाह—

**वाबाहक्खयसंजायसुक्खलवभावमित्थमासज्ज।**
**तत्तो अणंतरुत्तरबुद्धीए रासि परिकप्पो ॥७॥**

**अक्षरगमनिका**—व्याबाधाक्षयसञ्जातसौख्यलवभावमासाद्य ततोनन्तरोक्तबुद्ध्या राशिः परिकल्प्यः ॥७॥

**टीका**—**व्याबाधाक्षयसञ्जातसौख्यलवभावं** संसारिसत्त्वस्य शरीरं मनश्चाश्रित्य या विविधा आबाधाः पीडास्तासां सिद्धत्वेन क्षयात् सञ्जातमाविर्भूतं यत् सौख्यं तस्य लवः सिद्धत्वप्रथमसमयसुखलेशः स एव भवतीति भावस्तम् **आसाद्य** आश्रित्य **ततः** तत ऊर्ध्वम् **इत्थम्** एवम् **अनन्तरोक्तबुद्ध्या** 'सर्वाद्धापिण्डित' इत्यादिप्रकारेण बुद्ध्या **राशिः** सिद्धसुखराशिः **परिकल्प्यः** स्थाप्यो यथा सर्वाकाशे न मायादिति। अथवाऽऽनन्तरगाथाटीकागतभावनामनुसृत्य संसारिसत्त्वस्य यद् जघन्यं सुखं तत आरभ्यैकैकगुणवृद्धितारतम्येन यावत्सिद्धसुखं तावद् ये सुखविशेषास्ते सर्वाकाशप्रदेशेभ्योप्यतिभूयांस इति तान् सुखविशेषानाश्रित्य सिद्धसुखराशिः परिकल्प्यः, तथा च सर्वाकाशेऽपि न मायादिति ॥७॥ एष सुखराशिश्च सर्वेषां सिद्धानां निरतिशय एकरूपश्चेत्याह—

**एसो पुण सव्वो वि हु निरइसओ एगरूवमो चेव।**
**सव्वाबाहाकारणखयभावाओ तहा नेओ ॥८॥**

**अक्षरगमनिका**—एष पुनः सर्वोऽपि सर्वाबाधाकारणक्षयभावात् खलु निरतिशयस्तथैकरूपश्च ज्ञेयः ॥८॥

**टीका**—**एष पुनः** अनन्तरोक्तसिद्धसुखराशिश्च प्रत्येकसिद्धगतः **सर्वोऽपि** निखिलोऽपि **सर्वाऽऽबाधाकारणक्षयभावात्** सर्वा निरवशेषा जन्मादिबाधास्तासां कारणं कर्माष्टकं तस्य क्षयभावाद् विगमादेव **हु** प्राकृतत्वादवधारणे **निरतिशयः** परस्परं तारतम्याभावात् सर्वोत्कृष्टः, **तथा तेनैव** कारणेन **एकरूपश्च** समानरूप एव **ज्ञेयो** बोद्धव्य इति ॥८॥ नन्वेष सिद्धसुखराशिः संसारिजीवानामिव नीरोगितासुखं धनसुखं कुटुम्बसुखमैश्वर्यसुखमित्यादिभिन्नभिन्नसुखानां समुदाय उताऽन्यथेत्याशङ्क्याह—

**न उ तह भिन्नाणं चिय सुक्खलवाणं तु एस समुदाओ।**
**ते तह भिन्ना संतो खओवसम जाव जं हुंति ॥९॥**

**अक्षरगमनिका**—न तु तथा भिन्नानामेव सुखलवानां त्वेष समुदायो यद् यावत् क्षयोपशमस्ते तथा भिन्नाः सन्तो भवन्ति ॥९॥

**टीका**—**न तु** नैव **तथा** तेन प्रकारेण **भिन्नानामेव** पृथक्पृथग्रूपाणां **सुखलवानां तु** सौख्यांशानां पुनः **एष** सिद्धसुखराशिः **समुदायः** संदोहः, **यद्** यस्माद् **यावद**वधि क्षयोपशमो ज्ञानावरणीयादिकर्मणां तावत् **ते** सुखलवास्तथा पृथक्पृथग्रूपेण **भिन्नाः** विभक्ताः **सन्तो** विद्यमाना **भवन्ति** सम्भवन्ति, न पुनः क्षायिकभावे जाते सिद्धत्वे सतीति ॥९॥ एतदेवाह—

**न य तस्स इमो भावो न य सुक्खं पि हु परं तहा होइ।**
**बहुविसलवसंविद्धं अमयं पि न केवलं अमयं॥१०॥**

मार्गदर्शक :- आचार्य श्री सुविहितसागर जी महाराज

**अक्षरगमनिका**—न च तस्याऽयं भावः, न च सौख्यमपि खलु परं तथा भवति। बहुविषलवसंविद्धममृतमपि न केवलममृतम् ॥१०॥

**टीका**—**न च** नैव **तस्य** सिद्धस्य भगवतः **अयं** क्षायोपशमिको भावः, **न च** न पुनः **सौख्यमपि** क्षायोपशमिकसुखमपि **हु** प्राकृतत्वात् परमार्थतः **परं** सर्वोत्कृष्टं यथा सिद्धस्य क्षायिकं तथा **भवति** जायते। अत्र दृष्टान्तमाह— **बहुविषलवसंविद्धं** हलाहलाऽनेककणसंपृक्तम् **अमृतमपि** सुधाऽपि **न** नैव **केवलं** शुद्धम् **अमृतम्,** अपि त्वविशुद्धमेव विषमिश्रितत्वादिति। तथैव क्षायोपशमिकं सुखमपि न केवलं सुखं, परं दुःखसंविद्धमेव सौत्सुक्यात् प्रयासप्राधान्याद् रागानुबन्धित्वाद् हिंसापूर्वकत्वाच्च ॥१०॥ अनेन सिद्धभगवतस्तु सुखं क्षायिकम्। अत एव केवलं सुखम्। तच्चानन्तम्। यत् सर्वाद्धासंपिण्डनमित्यादि प्रागुक्तं तत्तस्यानन्ततादर्शनार्थमेवेत्याह—

**सव्वद्धासंपिंडणमणंतवग्गभयणं च जं इत्थ।**
**सव्वागासामाणं चऽणंततदंसणत्थं तु॥११॥**

**अक्षरगमनिका**—सर्वाद्धासंपिण्डनमनन्तवर्गभाजनं सर्वाकाशामानं च यदत्रानन्तं तद्दर्शनार्थं तु॥११॥

**टीका**—**सर्वाद्धासंपिण्डनं** सिद्धसुखराशेः सर्वाद्धया गुणनं तथाऽनन्तवर्गभाजनम् अनन्तैर्वर्गमूलैरपवर्तनं तथा **सर्वाऽऽकाशाऽमानं च** सर्वलोकालोकलक्षणे खेऽसमावेशश्च **यदत्र** सिद्धसुखविचारे चिन्तितं तत् सिद्धसुखस्य **अनन्तं** भावप्रधाननिर्देशाद् अनन्तत्वं **तद्दर्शनार्थं तु** तस्यानन्तत्वस्य दर्शनार्थं प्रदर्शनार्थमेवेति ॥११॥ प्रकारान्तरेण सिद्धसुखस्यानन्त्यं निरूपयति—

**तिन्नि वि पएसरासी एगाणंता तु ठाविया हुंति।**
**हंदि विसेसेण तहा अणंतयाणंतया सम्मं॥१२॥**

**अक्षरगमनिका**—त्रयोऽपि प्रदेशराशय एकानन्तास्तु स्थापिता भवन्ति। हन्त! तथा विशेषेणाऽनन्ताऽनन्तता सम्यक् ॥१२॥

**टीका**—किलाऽसत्कल्पनयाऽनन्तरोक्ताः **त्रयोऽपि प्रदेशराशयः** एकस्तावत् सर्वाद्धासमयराशिः, द्वितीयस्तु सर्वाकाशप्रदेशराशिः, तृतीयः पुनः अनन्तवर्गभक्तः सिद्धसुखराशिः, **एकानन्ता तु** एकत्रैते त्रयोप्यनन्ता अनन्तसङ्ख्याका राशयः पुनः **स्थापिताः** पिण्डिता भवन्ति, तथाप्ययं पिण्डितो राशिः **हन्त** ! आमन्त्रणे सिद्धसुखं न प्राप्नोति। एवं सिद्धसुखस्य **तथा** तेन प्रकारेण **विशेषेण** पार्थक्येन **अनन्तानन्तता सम्यक्** समीचीनतया ज्ञेयेति। श्री प्रज्ञापनासूत्रे तु द्वितीये पदे भङ्ग्यन्तरेणापि प्रतिपादितम्, तथाहि—सुरगणसुहं

समत्तं सव्वद्धापिंडियं अणंतगुणं। नवि पावइ मुत्तिसहं णंताहिं वग्गवग्गूहिं ॥१६३॥

एतद्वृत्ति :—'सुरगणसुहं' इत्यादि, 'सुरगणसुखं' देवसंघातसुखं 'समस्तं' संपूर्णमतीतानागतवर्तमानकालोद्भवमित्यर्थः, पुनः 'सर्वाद्धापिण्डितं' सर्वकालसमयगुणितं तथाऽनन्तगुणमिति, तदेवंप्रमाणं किलासत्कल्पनया एकैकाकाशप्रदेशे स्थाप्यते इत्येवं सकलाकाशप्रदेशपूरणेन यद्यप्यनन्तं भवति तदनन्तमप्यनन्तैर्वर्गैर्वर्गितं तथाऽप्येवं प्रकर्षगतमपि मुक्तिसुखं सिद्धिसुखं न प्राप्नोति ॥१२॥ अथ कालभेदेनाऽपि सिद्धानां सौख्यस्य तुल्यतामाह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

**तुल्लं च सव्वहेयं सव्वेसिं होइ कालभेए वि।**
**जह जं कोडीसत्तं तह छणभेए वि सुहुममिणं॥१३॥**

**अक्षरगमनिका**—कालभेदेऽपि सर्वेषामेतत् सर्वथा तुल्यम्, यथा यत् कोटिप्राप्तं क्षणभेदेऽपि तथा। सूक्ष्ममिदम् ॥१३॥

**टीका**—आस्तां युगपत् सिद्धिं प्राप्तानां सिद्धभगवतां **कालभेदेऽपि** मुक्तिगमनकालस्य भिन्नत्वेऽपि **सर्वेषां** निखिलानां सिद्धपरमात्मनाम् **एतत्** सिद्धिसुखं **सर्वथा** सर्वात्मना **तुल्यं** समम्, **यथा** यद्वद् **यत्** किञ्चिदपि सुखादिवस्तु **कोटिसत्तं** कोटिः प्रकर्षस्तं सत्तं देशीयशब्दोऽयं प्राप्तमित्यर्थः, तथा च यत् प्रकर्षप्राप्तं तत् **क्षणभेदेऽपि** कालभेदेऽपि **तथा** तुल्यं केवलज्ञानवत्। **सूक्ष्मं** मतेरविषयत्वाद् **इदं** सिद्धसुखमिति ॥१३॥ असत्कल्पनया भावयितुमाह—

**सव्वं पि कोडिकप्पियमसंभवठवणाइ जं भवे ठवियं।**
**तत्तो तस्सुहसामी न होइ इह भेयगो कालो॥१४॥**

**अक्षरगमनिका**—असम्भवस्थापनया सर्वमपि कोटिकल्पितं यद् भवेत् स्थापितं ततस्तत्सुखस्वामी, न भवतीह कालो भेदकः ॥१४॥

**टीका**—**असंभवस्थापनया** असत्कल्पनया **सर्वमपि** निखिलं सुखं प्रत्येकस्य सिद्धभगवतः **कोटिकल्पितं** कोटिः प्रकर्षः असत्कल्पनया यावत् कोटिसङ्ख्याकं १००००००० तावत् कल्पितं छिन्नं सद् **यद्** यदि **भवेद्** जायेत पृथक् **स्थापितं** न्यस्तं **ततः** तदा यदि वा तेन तृप्तस्त**त्सुखस्वामी** सर्वः सिद्धभगवान् सुखेन भवति तुल्यः सुखस्य तुल्यत्वात्। न **भवति** जायते **अत्र** सुखमानविषये **भेदको** विशेषाऽऽपादकः **कालः** समयलक्षण इति ॥१४॥ एतदेव प्रकारान्तरेणापि निरूपयति—

**जइ तत्तो अहिगं खलु होइ सरूवेण किंचि तो भेओ।**
**न वि अन्नवासकोडीमयाण माणम्मि सो होइ॥१५॥**

**अक्षरगमनिका**—यदि ततः किञ्चिद् अधिकं खलु भवति स्वरूपेण ततो भेदः। न हि अद्यवर्षकोटिमृतयोर्मानि स भवति ॥१५॥

**टीका**—**यदि** अभ्युपगमे **ततः** प्रकर्षप्राप्तात् सिद्धसुखात् सकाशात् **किञ्चित्** स्वल्पमपि **अधिकं** समधिकं **खलु** परमार्थतो **भवति** जायते **स्वरूपेण** सिद्धसुखत्वेन **ततस्तदा** भवेद् **भेदो** विशेषः। न चाधिकं कि. ऽदपि तस्मान्न भेदः। एतदेव प्रकारान्तरेणाह– **न हि** नैव **अद्यवर्षकोटिमृतयोः** एकः अद्य मृतः अपरश्च वर्षकोटेः प्राग् मृतः, एतयोर्द्वयोरपि मृतयोर्मानि ध्वंसाभावप्रमाणे **स** भेदो **भवति** जायते द्वयोरसत्त्वेनाऽविशेषात्।

एवमेव अद्यवर्षकोटिसिद्धसुखयोर्मनि भेदो न भवतीति। अथवा प्राकृतत्वेनाऽकारप्रश्लेषाद् **अद्यवर्षकोट्यमृतयोः** अद्यभावि अमृतं पीयूषं तथा वर्षकोटेः प्राग्भावि अमृतम्, एतयोर्द्वयोरपि **माने** विषविकाराऽपाकारित्वलक्षणे **स** भेदो **न** भवति। द्वेऽपि तुल्यरूपेण विषविकारमपाकुरुत इति भावः। एवमेव कालभेदेनाऽजरामरत्वप्राप्तानां सिद्धभगवतां सुखे न भेद इति ॥१५॥ ननु सिद्धानामक्रियत्वे कथं सुखमित्याह—

**किरिया फलसाविक्खा जं तो तीए ण सुक्खमिह।**
**तम्हा मुगाइभावो लोगिगमिव जुत्तिओ सुक्खं ॥१६॥**

**अक्षरगमनिका**—यत् क्रिया फलसापेक्षा ततस्तस्यां न सौख्यमिह। तस्माद् मूकादिभावो लौकिकं सौख्यमिव ॥१६॥

**टीका**—**यद्** यस्मात् **क्रिया** चेष्टा निवृत्तिप्रवृत्तिरूपा **फलसापेक्षा** इष्टानिष्टप्राप्तिपरिहारलक्षण-प्रयोजनमाश्रित्य भवति **ततः** असुखस्वरूपादौत्सुक्यात् **तस्यां** क्रियायां सत्यां **न** नैव **सौख्यं** सुखम् **इह** संसारे। **तस्मात्** कारणाद् **मूकादिभावो** मूकान्धबधिरत्वं **लौकिकं** लोके भवं लौकिकं **सौख्यं** सुखमिव सिद्धानां सुखं कृतक्रियत्वात्। लोकोक्तयोऽपि 'मौनं सर्वार्थसाधनम्' 'दृष्टे दुःखम्' 'परचिन्ताऽधमाधमा' इत्यादिरूपा उक्तार्थसाधिका इति ॥१६॥ किञ्च—

**सव्वूसगवावित्ती जत्थ तयं पंडिएहिं जत्तेण।**
**सुहुमाभोगेण तहा निरूवणीयं अपरतंतं ॥१७॥**

**अक्षरगमनिका**—यत्र सर्वौत्सुक्यव्यावृत्तिस्तकमपरतन्त्रं पण्डितैः सूक्ष्माभोगेन तथा यत्नेन निरूपणीयम् ॥१७॥

**टीका**—**यत्र** देशे काले च यस्य **सर्वौत्सुक्यव्यावृत्तिः** निःशेषोत्सुकताया विशेषेण अपुनर्भाविन आवृत्तिर्निवृत्तिः व्यावृत्तिस्तत्र तस्य **तकं** तत् सिद्धसुखम् **अपरतन्त्रं** स्वाधीनम्। अथवा 'अपरितंतं' **त्ति** पाठमाश्रित्य तत्सिद्धसुखम् **अपरितान्तं** निर्निर्वेदं **पण्डितैः** विद्वद्भिः **सूक्ष्माभोगेन** निपुणोपयोगेन **तथा** प्रशान्तचेतोवृत्त्या **यत्नेन** योगाभ्यासलक्षणेन स्वात्मनि **निरूपणीयम्** अन्वेषणीयमिति ॥१७॥ ननु परिमितक्षेत्रेऽनन्तानां सिद्धभगवतां निवसतां परस्परमाकीर्णत्वाद् हुतवहपरीते गृह इव कुतः सुखसम्भव इत्याशङ्कायामाह—

**जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का।**
**अन्नुन्नमणाबाहं चिट्ठंति सुही सुहं पत्ता ॥१८॥**

**अक्षरगमनिका**—यत्र चैकः सिद्धस्तत्रानन्ता भवक्षयविमुक्ता अन्योन्यमनाबाधं सुखं प्राप्ताः सुखिनस्तिष्ठन्ति ॥१८॥

**टीका**—एषा गाथा तु व्याख्यातप्रायाऽनन्तरविंशिकान्ते इति न पुनर्व्याख्यायते ॥१८॥ अथ सिद्धानामनन्तरोक्तसुखानभ्युपगमे बाधामाह—

**एमेव लवो इहरा ण जाउ सन्ना तयंतरमुवेइ।**
**एगेए तह भावो सुक्खसहावो कहं स भवे? ॥१९॥**

**अक्षरगमनिका**—एवमेव लव इतरथा न जातु संज्ञा तदन्तरमुपैति तथा एकैकस्मिन् स

सौख्यस्वभावो भावो कथं भवेत् ? ॥१६॥

**टीका**—**एवमेव** अनन्तरोक्तनीत्यैव सिद्धानां सुखस्य **लवः** लेशः कण इति यावत् प्रदर्शितः, सम्पूर्णस्य तस्य वचनाऽगोचरत्वात्, यदागमः–सव्वे सरा नियट्टंति तक्का जत्थ न विज्जइ, मई तत्थ न गाहिआ। आचाराङ्ग श्रु. स्क. १. अ. ५. उ. ६. सू. १७१. **इतरथा** सिद्धभगवतां वचनातीतसुखाऽनभ्युपगमे **न** नैव **जातु** कदाचित् **संज्ञा** व्यपदेशः 'अन्नुन्नमणाबाहं चिट्ठंति सुही सुहं पत्ता' इत्यादिरूपा **तदन्तरं** तत् सुखं तदन्तरं सुखं विना व्यवहारपथम् **उपैति** प्राप्नोति, नैवोपेयादिति भावः, उपैति च तस्मात् सिद्धानां तथा सौख्यमभ्युपगन्तव्यम्। किञ्च–सिद्धभगवतामनाबाधसुखाऽनभ्युपगमे **एकैकस्मिन्** पृथक् पृथक् सिद्धभगवति **सः** अनन्तरोक्त **सौख्यस्वभावः** सौख्यं सुखं स्वभावो यस्य स **भावः** क्षायिकः **कथं** कया रीत्या **भवेद्** जायेत ? नैव भवेदिति भावः। अस्ति च स सौख्यस्वभावस्तस्मात् सिद्धसुखमभ्युपगन्तव्यम्। क्वचिद् 'लवो' त्ति स्थाने 'भवो' त्ति पाठस्तमाश्रित्य **भवः** संसारो मत्स्यगलागलन्यायेन परस्परं व्याबाधाबाधितत्वाद् जन्मजरामरणरोगशोकादिव्याकुलत्वाच्च दुःखरूप एव, सिद्धिस्तु **इतरथा** एकान्तसुखरूपा। शेषः पूर्ववदिति ॥१६॥ उपसंहरन्नाह—

**तम्हा तेसि सरूवं सहावणिययं जहा उण स मुत्ती।**
**परमसुहाइसहावं नेयं एगंतभवरहियं॥२०॥**

इति सिद्धसुखविंशिका विंशतितमी समाप्ता ॥२०॥

इति श्रीविंशतिविंशिकाप्रकरणं समाप्तम् ॥

**अक्षरगमनिका**—यथा सा पुनर्मुक्तिस्तस्मात्तेषामेकान्तभवरहितं परमसुखादिस्वभावं स्वरूपं स्वभावनियतं ज्ञेयम् ॥२०॥

**टीका**—यस्माद् **यथा** यद्वत् **सा पुनः** निःशेषशुद्धधर्मासेवनफला तु **मुक्तिः** सिद्धिः कर्मोदयजन्य-समस्तद्वन्द्वनिवर्तनादाविर्भूतजीवशुद्धस्वभावाच्च स्वभावनियता **तस्मात्** कारणात् तथैव **तेषां** सिद्धपरमात्मनाम्, **एकान्तभवरहितम्** अत्यन्तजन्मादिवियुक्तं **परमसुखादिस्वभावं** निरतिशयाऽनन्तसुखज्ञानादिलक्षणानन्तचतुष्टयाऽऽत्मकं **स्वरूपं** स्वाभाविकं रूपं **स्वभावनियतं** सांसिद्धिकधर्मसंस्थितं **ज्ञेयं** बोद्धव्यम्। विशेषार्थिना तु श्रीमदाचाराङ्गसूत्रं श्री सिद्धप्राभृतप्रकरणं श्री पञ्चसूत्रगतपञ्चमसूत्रं च निरूपणीयमिति ॥२०॥

मूलग्रन्थकाराऽऽशीर्वचनम्—

**काऊण पगरणमिणं जं कुसलमुवज्जियं मए तेण।**
**भव्वा भवविरहत्थं लहंतु जिणसासणे बोहिं॥**

कृतिः सिताम्बराचार्यहरिभद्रसूरेर्धर्मतो याकिनीमहत्तरासूनोः ॥

# प्रशस्तिः

मार्गदर्शक :- आ… सुविधिसागर जी महाराज

श्रीमद्वीरजिनेशस्य श्रीसुधर्मा गणाधिपः। तपागच्छतरोर्मूलं श्रीगणिपिटकस्य च ॥१॥
तस्य परम्पराऽऽयातः प्रवचनप्रभावकः। श्रीमद्विजयसिंहाख्यः सिंहो दुर्वादिकुम्भिषु ॥२॥
तस्य पट्टाम्बरे सूर्यः शैथिल्यध्वान्तशोषणः। श्रीसत्यविजयोऽभूच्च सत्यनिष्ठशिरोमणिः ॥३॥
पट्टे तदीयके श्रीमान् कर्पूरविजयाभिधः। अभवदतिकर्पूरः प्रसरच्छीलसौरभः ॥४॥
तत्पट्टाभ्रनिशानाथः सनाथः सौम्यभावतः। क्षमाभृतां पुरोगामी श्रीक्षमाविजयोऽभवत् ॥५॥
जिनोत्तम-पद्म-रूप-कीर्ति-कस्तूरपूर्वकाः। विजयान्ताः क्रमाऽऽयाताः वित्त्वकवित्वधीधनाः ॥६॥
तत्पट्टे स्वतपस्तेजस्तिरस्कृतनभोमणिः। श्रीमणिविजयश्चिन्तामणिरीप्सितदोऽभवत् ॥७॥
तस्य शिष्योऽभवद् बुद्धया विनिर्जितबृहस्पतिः। श्रीबुद्धिविजयः सेव्यो बुधैर्बुद्धिगुणान्वितः ॥८॥
तत्पट्टे न्यायपाथोधिः धिया धृत्या समन्वितः। सदैव सत्यतत्त्वान्विट् सिद्धान्त-रै-कषोपलः ॥९॥
अपूर्वग्रन्थनिर्माता मिथ्यामतनिकन्दनः। नाम्नाऽपरेण विख्यात आत्मारामेति सात्त्विकः ॥१०॥
भूरिसुशिष्यकः प्रौढः आद्य आचार्यनायकः। अभूच्छ्रीविजयानन्दो जगदानन्ददायकः ॥११॥
॥ कुलकम् ॥

स्मारको जिनकल्पस्य स्वचारित्रेण साम्प्रतम्। श्रीमान् कमलसूरीशः पट्टेऽभूत्तस्य कर्मठः ॥१२॥
शिष्यः श्रीविजयानन्दसूरेर्बभूव सिद्धवाक्। श्रीविरविजयो मन्येऽन्यजन्माचीर्णसंयमः ॥१३॥
आबालभाववैराग्य उपाध्यायवरः कविः। स्वस्याद्भुतचरित्रेण सज्जनस्वान्तचित्रकृत् ॥१४॥युग्मम् ॥
विजयदानसूरीशः शिष्यस्तस्य बुधाग्रणीः। श्रुतदाने सदासक्तः सक्तः सुसाधुसर्जने ॥१५॥
तत्कालधीश्च सज्ज्योतिः सर्वागमरहस्यवित्। श्रीमत्कमलसूरीशपट्टप्रभावकोऽभवत् ॥१६॥ युग्मम् ॥
तच्छिष्यो ब्रह्मनिष्ठोऽवि प्रशस्तचरणक्रियः। विशालगच्छनिर्माता सत्सिद्धान्तमहोदधिः ॥१७॥
स्रष्टा कर्मविवृत्यादेः सप्तशतमुनीश्वरः। प्रेम्णाऽजातशत्रुर्जीयात् प्रेमसूरीश्वरः प्रभुः ॥१८॥ युग्मम् ॥
तस्य चरमशिष्याणुश्रीकुलचन्द्रसूरिणा। वैक्रमेऽब्दे शरेन्द्रियाऽभ्रनयनमिते शुभे ॥१९॥
व्यरचि श्रुताट्टीकेयं जयताञ्जिनशासने। यत्स्यात् सूत्रितमुत्सूत्रं शोधयन्तु बहुश्रुताः ॥२०॥ युग्मम् ॥